ग्राह्ये । ७९ द्वारे वा । ८० पारापते रोवा । ८१ मात्रटि वा । ८२ उदोद्वार्द्रे । ८३ ओदाल्या पंक्तौ । ८४ ह्रस्व. सयोगे । ८५ इत एद्वा । ८६ किंशुके वा । ८७ मिरायाम् । ८८ पथिपृथिवी-प्रतिश्रुन्मूषिक-हरिद्रा-विभीतकेष्वत् । ८९ शिथिलेङ्गुदे वा । ९० तित्तिरौ र. । ९१ इतौतो वाक्यादौ । ९२ ईर्जिह्वा-सिंह-त्रिंशद्विंशतौ त्या । ९३ र्लुकिनिर. । ९४ द्विन्योरुत् । ९५प्रवासीक्षौ । ९६ युधिष्ठिरे वा । ९७ ओच्च द्विधाकृग. । ९८ वा निर्झरे ना । ९९ हरीतक्यामी-तोत् ।१०० आत्कश्मीरे ।१०१ पानीयादिष्वित् ।१०२ उज्जीर्णे । १०३ ऊर्हीन-विहीने वा ।१०४ तीर्थे हे ।१०५ एत्पीयूषापीड-विभीतक-कीदृशेदृशे । १०६ नीड-पीठे वा । १०७ उतोमुकुलादिष्वत् । १०८ वोपरौ । १०९ गुरौ के वा । ११० इर्भ्रुकुटौ । १११ पुरुषे रो. । ११२ ई क्षुते । ११३ उत्सुभग-मुसले वा । ११४ अनुत्साहोत्सन्ने त्सच्छे । ११५ र्लुकिदुरो वा । ११६ ओत्सयोगे । ११७ कुतूहले वा ह्रस्वश्च । ११८ अदूत. सूक्ष्मे वा । ११९ दुकूले वा लश्च द्वि । १२० ईर्वोद्व्यूढे । १२१ उर्भ्रू-हनुमत्कण्डूयवातूले । १२२मधूके वा ।१२३ इदेतौ नूपुरे वा । १२४ ओत्कूष्माण्डी-तूणीर-कूर्पर-स्थूल-ताम्बूल गुडूचीमूल्ये । १२५ स्थूणा-तूणे वा । १२६ ऋतोत् । १२७ आत्कृशा-मृदुक-मृदुत्वे वा । १२८ इत्कृपादौ । १२९ पृष्ठे वानुत्तरपदे । १३० मसृण-मृगाङ्क-मृत्यु-शृङ्ग-धृष्टे वा । १३१ उदृत्वादौ । १३२ निवृत्त-वृन्दारके वा । १३३ वृषभे वा । १३४ गौणान्त्यस्य । १३५ मातुरिद्वा । १३६ उदूदो-न्मृषि । १३७ इदुतौ वृष्ट-वृष्टि-पृथङ्-मृदग-नप्तृके । १३८ वा बृहस्पतौ । १३९ इदेदोद्वृन्ते । १४० रि केवलस्य । १४१ ऋणर्ज्वृषभर्त्वृषौ वा । १४२ दृश क्विप्-टक्सक. । १४३ आदृते ढि । १४४ अरिर्दृप्ते । १४५ लृत इलि.क्लृप्तक्लृन्ने । १४६ एत इद्वावेदना-चपेटा-देवर-केसरे । १४७ ऊ स्तेने वा । १४८ ऐत एत् । १४९ इत्सैन्धव-शनैश्चरे । १५० सैन्ये वा । १५१ अइर्दैत्यादौ च । १५२ वैरादौ वा । १५३ एच्च दैवे । १५४ उच्चैर्नीच-स्यैअ. । १५५ ईद्धैर्ये । १५६ ओतोद्वान्योन्य-प्रकोष्ठातोद्य-शिरोवेदना-मनोहर-सरोरुहे क्तोश्च व. । १५७ ऊत्सोच्छवासे । १५८ गव्यउ-आअः १५९ औत ओत् । १६० उत्सौन्दर्यादौ । १६१ कौक्षेयके वा । १६२ अउः

पौरादौ च । १६३ आच्च गौरवे । १६४ नाव्यावः । १६५ एत्त्रयोदशादौ स्वरस्य सस्वरव्यञ्जनेन । १६६ स्थविर-विचकिलायस्कारे । १६७ वा कदले । १६८ वेत. कर्णिकारे । १६९ अयौ वैत् । १७० ओत्पूतर-बदर-नवमालिका-नवफलिका-पूगफले । १७१ न वा मयूख-लवण-चतुर्गुण चतुर्थ-चतुर्दश-चतुर्वार-सुकुमार-कुतूहलोदूखलोलूखले । १७२ अवापोते । १७३ ऊच्चोपे । १७४ उमो निषण्णे । १७५ प्रावरणे अङ्गवाऊ । १७६ स्वरादसंयुक्तस्या-नादे । १७७ क-ग-च-ज त-द-प-य-वा प्रायो लुक् । १७८ यमुना-चामुण्डा-कामुकातिमुक्तके मोनुनासिकश्च । १७९ नावर्णात्पि । १८० अवर्णो यश्रुति । १८१ कुब्ज-कर्पर-कीले क खोपुष्पे । १८२ मरकत-मदकले ग कन्दुके त्वा-दे. । १८३ किराते च । १८४ शीकरे भ-हौ वा । १८५ चन्द्रिकाया मः । १८६ निकष-स्फटिक-चिकुरे ह. । १८७ ख-घ-थ-ध-भाम् । १८८ पृथकि धो वा । १८९ शृङ्खले ख क. । १९० पुन्नाग-भागिन्योर्गो मः । १९१ छागे ल । १९२ ऊत्वे दुर्भग-सुभगे व । १९३ खचित-पिशाचयोश्च. स-ल्लौ वा । १९४ जटिले जो झो वा । १९५ टो ड । १९६ सटा-शकट-कैटभे ढ । १९७ स्फटिके ल । १९८ चपेटा-पाटौ वा । १९९ ठो ढ. । २०० अङ्कोठे ल्ल. । २०१ पिठरे हो वा रश्च ड । २०२ डो ल. । २०३ वेणौ णो वा । २०४ तुच्छे तश्च छौ वा । २०५ तगर-त्रसर-तूवरे ट. । २०६ प्रत्यादौ ड. । २०७ इत्वे वेतसे । २०८ गर्भितातिमुक्तके ण । २०९ रुदिते दिना ण्णः । २१० सप्ततौ र । २११ अतसी-सातवाहने ल । २१२ पलिते वा । २१३ पीते वो ले वा । २१४ वितस्ति-वसति-भरत-कातर-मातुलिङ्गे ह. । २१५ मेथि-शिथिर-शिथिल-प्रथमे थस्य ढ. । २१६ निशीथ-पृथिव्योर्वा । २१७ दशन-दष्ट-दग्ध- दोला-दण्ड-दर-दाह-दम्भ दर्भ-कदन दोहदे दो वा ड । २१८ दश-दहो २१९ संख्या-गद्गदे र । २२० कदल्यामद्रुमे । २२१ प्रदीपि-दोहदे ल. । २२२ कदम्बे वा । २२३ दीपौ धो वा । २२४ कदर्थिते व । २२५ ककुदे ह । २२६ निषधे धो ढः । २२७ वौषधे । २२८ नो ण । २२९ वादौ २३० निम्ब-नापिते-ल-ण्हं वा । २३१ पो व । २३२ पाटि-परुष-परिघ-परिखा-पनस-पारिभद्रे फ. । २३३ प्रभूते वः । २३४ नीपापीडे मो वा ।

२३५ पापर्द्धो र । २३६ फो भही । २३७ बो व । २३८ विसिन्या भ । २३९ कवन्धे म यौ । २४० कैटभे भो व । २४१ विषमे मो ढो वा । २४२ मन्मथे वः । २४३ वाभिमन्यौ । २४४ भ्रमरे सो वा । २४५ आदेर्यो जः । २४६ युष्मद्यर्थपरे त । २४७ यष्टया ल । २४८ वोत्तरीयानीय-तीय-कृद्ये ज्ज । २४९ छायाया हो कान्तौ वा । २५० डाह-वौ कतिपये । २५१ किरि-भेरे रो ड. । २५२ पर्याणे डा वा । २५३ करवीरे ण । २५४ हरिद्रादौ ल । २५५ स्थूले लो र । २५६ लाहल-लाङ्गल-लाङ्गूले वादेर्ण । २५७ ललाटे च । २५८ शबरे वो म । २५९ स्वप्न निव्योर्वा । २६० श-षो स । २६१ स्नुषाया ण्हो न वा । २६२ दश-पाषाणे हः । २६३ दिवसे स । २६४ हो घोनुस्वारात् । २६५ षट्-शमी-शाव-सुधा-सप्तपर्णेष्वादेश्छ । २६६ शिराया वा । २६७ लुग् भाजन-दनुज-राजकुले ज सस्वरस्य न वा । २६८ व्याकरण-प्राकारागते कगो । २६९ किसलय-कालायस-हृदये य । २७० दुर्गादेव्युदुम्बर-पादपतन-पादपीठेन्तर्द । २७१ यावत्तावज्जीवितावर्तमानावट-प्रावारक-देवकुलैवमेवे व ।

प्राकृत व्याकरणस्य द्वितीय. पादः

१ संयुक्तस्य । २ शक्त-मुक्त-दष्ट-रुग्ण-मृदुत्वे को वा । ३ क्षः ख क्वचित्तु छ-झौ । ४ ष्कस्कयोर्नाम्नि । ५ शुष्क स्कन्दे वा । ६ क्ष्वेटकादौ । ७ स्थाणावहरे । ८ स्तम्भे स्तो वा । ९ थ-ठावस्पन्दे । १० रक्ते गो वा । ११ शुल्के ङ्गो वा । १२ कृत्ति-चत्वरे च । १३ त्योऽचैत्ये । १४ प्रत्यूषेपूश्च हो वा । १५ त्व-थ्व-द्व-ध्वा च-छ-ज-झा क्वचित् । १६ वृश्चिके श्चेर्ञ्चुर्वा । १७ छोऽक्ष्यादौ । १८ क्षमायां कौ । १९ ऋक्षे वा । २० क्षणे उत्सवे । २१ ह्रस्वात् थ्य-श्च-त्स-प्सामनिश्चले । २२ सामर्थ्योत्सुकोत्सवे वा । २३ स्पृहायाम् । २४ द्य-य्य-र्या ज. । २५ अभिमन्यौ ज-ञ्जौ वा । २६ साध्वस-ध्य-ह्या झ । २७ ध्वजे वा । २८ इन्धौ झा । २९ वृत्त-प्रवृत्त-मृत्तिका-पत्तन-कदर्थिते ट । ३० र्तस्याधूर्तादौ । ३१ वृन्ते ण्टः । ३२ ठोस्थि-विसंस्थुले । ३३ स्त्यान-चतुर्थार्थे वा । ३४ ष्टस्यानुष्ट्रेष्टा-सदष्टे । ३५ गर्ते ड । ३६

ंमर्द-वितर्दि-विच्छर्द-च्छर्दि-कपर्द-मर्दितेर्दस्य। ३७ गर्दभे वा। ३८ कन्द-रिका-भिन्दिपाले ण्ड । ३९ स्तब्धे ठ-ढौ। ४० दग्ध-विदग्ध-वृद्धि-वृद्धे ढ। ४१ श्रद्धर्द्धि-मूर्धार्धेन्ते वा। ४२ म्नज्ञोर्ण । ४३ पञ्चाशत्पञ्चदश-दत्ते। ४४ मन्यौ न्तो वा। ४५ स्तस्य थोऽसमस्तस्तम्बे । ४६ स्तवे वा। ४७ पर्यस्ते थ-टौ। ४८ वोत्साहे थो हश्च रः। ४९ आश्लिष्टे ल-धौ। ५० चिह्ने-न्धो वा। ५१ भस्मात्मनो पो वा। ५२ ड्म-क्मो । ५३ ष्प-स्पयो फः। ५४ भीष्मे ष्मः। ५५ श्लेष्मणि वा। ५६ ताम्राम्रे म्ब । ५७ ह्वो भो वा। ५८ वा विह्वले वौ वश्च। ५९ वोर्ध्वे। ६० कश्मीरे म्भो वा। ६१ न्मो म । ६२ ग्मो वा। ६३ ब्रह्मचर्य-तूर्य-सौन्दर्य शौण्डीर्ये र्यो र । ६४ धैर्ये वा। ६५ एतः पर्यन्ते। ६६ आश्चर्ये। ६७ अतो रिआर-रिज्जरीअ। ६८ पर्यस्त-पर्याण-सौकुमार्ये -ल्लः। ६९ बृहस्पति-वनस्पत्योः सो वा। ७० वाष्पे होऽश्रुणि। ७१ कार्षापणे। ७२ दुःख-दक्षिण-तीर्थे वा। ७३ कूष्माण्ड्यां ष्मो लस्तु ण्डो वा। ७४ पक्ष्म-श्म-ष्म-स्म-ह्मां म्हः। ७५ सूक्ष्म-श्न-ष्ण-स्न-ह्न-ह्ण-क्ष्णां ण्हः। ७६ ह्लो ल्हः। ७७ क-ग-ट-ड-त-द-प-श-ष-स-ᳵक-ᳵपामूर्ध्वं लुक्। ७८ अधो म-न-याम्। ७९ सर्वत्र लवरामवन्द्रे। ८० द्रो रो न वा। ८१ धात्र्याम्। ८२ तीक्ष्णे णः। ८३ ज्ञो ञः। ८४ मध्याह्ने हः। ८५ दशार्हे। ८६ आदेः श्मश्रु-श्मशाने। ८७ श्चो हरिश्चन्द्रे। ८८ रात्रौ वा। ८९ अनादौ शेषादेशयोर्द्वित्वम्। ९० द्वितीयतुर्ययोरुपरि पूर्वः। ९१ दीर्घे वा। ९२ न दीर्घानुस्वारात्। ९३ र-होः। ९४ धृष्टद्युम्ने णः। ९५ कर्णि-कारे वा। ९६ दृप्ते। ९७ समासे वा। ९८ तैलादौ। ९९ सेवादौ वा। १०० शार्ङ्गे ङात्पूर्वोत्। १०१ क्ष्मा श्लाघा-रत्नेन्त्यव्यञ्जनात्। १०२ स्नेहा-ग्न्योर्वा। १०३ प्लक्षे लात्। १०४ र्ह-श्री-ह्री-कृत्स्न-क्रिया-दिष्ट्यास्वित्। १०५ र्श-र्ष-तप्त वज्रे वा। १०६ लात्। १०७ स्याद् भव्य-चैत्य-चौर्यसमेषु यात्। १०८ स्वप्ने नात्। १०९ स्निग्धे वादितौ। ११० कृष्णे वर्णे वा। १११ उच्चार्हति। ११२ पद्म-छद्म-मूर्ख-द्वारे वा। ११३ तन्वीतुल्येषु। ११४ एकस्वरे श्व -स्वे। ११५ ज्यायामीत्। ११६ करेणू-वाराणस्यो र-णोर्व्यत्ययः। ११७ आलाने लनोः। ११८ अचलपुरे च-लोः। ११९ महाराष्ट्रे ह-रोः

१२० हृरदे हृदो । १२१ हरिताले र-लोर्न वा । १२२ लघुके ल-होः । १२३ ललाटे ल-डो. । १२४ ह्ये ह्यो । १२५ स्तोकस्य थोक्क-थोव-थेवा. । १२६ दुहितृ-भगिन्योर्धूआ-बहिण्यौ । १२७ वृक्ष-क्षिप्तयो रुक्ख-छूढौ । १२८ वनिताया विलया । १२९ गौणस्येपत् कूरः । १३० स्त्रिया इत्थी । १३१ धृतेर्दिहि । १३२ मार्जारस्य मञ्जर-वञ्जरौ । १३३ वैडूर्यस्य वेरुलिअं १३४ एण्हि एत्ताहे इदानीम । १३५ पूर्वस्य पुरिम । १३६ त्रस्तस्य हित्थ-तट्ठौ । १३७ बृहस्पतौ वहो भय । १३८ मलिनोभय-शक्ति-छुप्तारब्ध-पदातेर्म-इलावह-सिप्पि-छिक्काढत्त-पाइक्कं । १३९ दष्ट्राया दाढा । १४० बहिसो बाहिबाहिरौ । १४१ अधसो हेट्ठ । १४२ मातृ-पितुः स्वसुः सिआ-छौ । १४३ तिर्यचस्तिरिच्छि । १४४ गृहस्य घरोऽपतौ । १४५ शीलाद्यर्थस्येर. । १४६ क्त्वस्तुमत्तूणतुआणाः। १४७ इदमर्थस्य केरः। १४८ पर-राजभ्या क्क-डिक्कौ च । १४९ युष्मदस्मदोञ एच्चय. । १५० वर्तेर्व्वः । १५१ सर्वागादीनस्येक. । १५२ पथो णास्येकट् । १५३ ईयस्यात्मनो णय । १५४ त्वस्य डिमा-त्तणौ वा । १५५ अनङ्कोठात्तैलस्य डेल्लः । १५६ यत्तदेतदोतोरित्तिअ एतल्लुक् च । १५७ इदकिमश्च डेत्तिअडेत्तिल-डेद्दहा. । १५८ कृत्वसो हुत्त । १५९ आलिवल्लोल्लालवन्त मन्तेत्तेर-मणा मतो. । १६० त्तो दो तसो वा । १६१ त्रपो हि-ह-त्थाः । १६२ वैकाद् सि सिअ इआ । १६३ डिल्ल-डुल्लौ भवे । १६४ स्वार्थे कश्च वा । १६५ ल्लो नवैकाद्वा । १६६ उपरे सव्याने । १६७ भ्रु वो मया डमया । १६८ शनैसो डिअम् । १६९ मनाको न वा डय च । १७० मिश्राड्डालिअ । १७१ रो दीर्घात् । १७२ त्वादे. सः । १७३ विद्युत्पत्र-पीतान्धाल्ल । १७४ गोणादय । १७५ अव्ययम् । १७६ त वाक्योपन्यासे । १७७ आम अभ्युपगमे । १७८ णवि वैपरीत्ये । १७९ पुणरुत्तं कृतकरणे । १८० हन्दि विषाद-विकल्प-पश्चात्ताप-निश्चय-सत्ये । १८१ हन्द च गृहाणार्थे । १८२ मिव पिव विव व्व व विअ इवार्थे वा । १८३ जेण तेण लक्षणे । १८४ णइ चेअ चिअ च्च अवधारणे । १८५ बले निर्धारण-

अजाते पुस । ३३ किं यत्तदोऽस्यमामि । ३४ छाया-हरिद्रयो । ३५ स्वस्रादेर्डा । ३६ ह्रस्वोमि । ३७ नामन्त्र्यात्सौ मः । ३८ डो दीर्घो वा । ३९ ऋतोद्वा । ४० नाम्न्यर वा । ४१ वाप ए । ४२ ईदूतोह्रस्वः । ४३ क्विपः । ४४ ऋतामुदस्यमौसु वा । ४५ आर. स्यादौ । ४६ आ अरा मातु । ४७ नाम्न्यरः । ४८ आसौ न वा । ४९ राज्ञः । ५० जस-शस्-ङसि-ङसा णो । ५१ टो णा । ५२ इर्जस्य णो-णा-ङौ । ५३ इणममामा । ५४ ईद्भिस्भ्यसाम्सुपि । ५५ आजस्यटा-ङसि-ङस्सु सणाणोष्वण् । ५६ पुस्यन आणो राजवच्च । ५७ आत्मनष्टो णिआ णइओ । ५८ अत सर्वादेर्डेर्जसः । ५९ ङे स्सि म्मि-त्था । ६० न वानि-दमेतदो हिं । ६१ आमो डेसिं । ६२ कितद्भ्या-डाम । ६३ कियत्तद्भ्यो ङस । ६४ ईद्भ्य. स्सासे । ६५ ङेर्डाहे डाला इआ काले । ६६ ङसेर्म्हा । ६७ तदो डो । ६८ किमो डिणो डीसौ । ६९ इदमेतत्कि-यत्तद्भ्यष्टो डिणा । ७० तदो ण स्यादौ क्वचित् । ७१ किम. कस्त्रतसोश्च । ७२ इदम इम । ७३ पु-स्त्रियोर्न वायमि-मिआ सौ । ७४ स्सिस्सयोरत् । ७५ ङेर्मेनह । ७६न त्थ । ७७ णोम्-शस्टा-भिसि । ७८ अमेणम् । ७९ क्लीवेस्यमेदमिणमो च । ८० किम किं । ८१ वेद तदेतदो ङसाम्भ्या से-सिमो । ८२ वैतदो ङसेस्त्तो त्ताहे । ८३ त्थे च तस्य लुक् । ८४ एरदीतौ म्मो वा । ८५ वैमेणमिणमो-सिना । ८६ तदश्च त सोक्लीवे । ८७ वादसो दस्य होनोदाम । ८८ मुः स्यादौ । ८९ म्मावयेऔ वा । ९० युष्मदस्त तु तुव तुह तुम सिना । ९१ भे तुब्भे तुज्झ तुम्ह तुय्हे उय्हे-जसा । ९२ त तु तुम तुव तुह तुमे तुए अमा । ९३ वो तुज्झ तुब्भे तुय्हे उय्हे भे शसा । ९४ भे दि दे ते तइ तए तुम तुमइ तुमए तुमे तुमाइ टा । ९५ भे तुब्भेहिं उज्झेहिं उम्हेहिं तुय्हेहिं उय्हेहिं भिसा । ९६ तइ-तुव-तुम-तुह-तुब्भा ङसौ । ९७ तुय्य तुब्भ तहिन्तो ङसिना । ९८ तुब्भ-तुय्होय्होम्हा भ्यसि । ९९ तइ-तु-ते-तुम्ह-तुह-तुह-तुव तुम-तुमे-तुमो-तुमाइ-दि-दे-इ-ए-तुब्भोब्भोय्हा ङसा । १०० तु वो भे तुब्भ तुब्भं तुब्भाण तुवाण तुमाण तुहाण उम्हाण आमा । १०१ तुमे तुमए तुमाइ

तइ तए डिना । १०२ तु-तुव-तुम-तुह-तुब्भा ङौ । १०३ सुपि । १०४ब्भो म्ह-ज्झौ वा । १०५ अस्मदो म्मि अम्मि अम्हि ह अह अहय सिना । १०६ अम्ह अम्हे अम्हो मो वय भे जसा । १०७ णे ण मि अम्मि अम्ह मम्ह मं मम मिमं अहं अमा । १०८ अम्हे अम्हो अम्ह णे शसा । १०९ मि मे ममं ममए ममाइ मइ मए मयाइ णे टा । ११० अम्हेहि अम्हाहि अम्ह अम्हे णे भिसा । १११ मइ-मम-मह-मज्झा ङसौ । ११२ ममाम्हौ भ्यसि । ११३ मे मइ मम मह मह मज्झ मज्झ अम्ह अम्ह ङसा । ११४ णे णो मज्झ अम्ह अम्हं अम्हे-अम्हो अम्हाण ममाण महाण मज्झाण आमा । ११५ मि मइ ममाइ मए मे ङिना । ११६ अम्ह-मम-मह-मज्झा ङौ । ११७ सुपि । ११८ त्रेस्ती तृतीयादौ । ११९ द्वेर्दो वे । १२० दुवे दोण्णि वेण्णि च जस्-शसा । १२१ त्रेस्तिण्णि । १२२ चतुरश्चत्तारो चउरो चत्तारि । १२३ सङ्ख्याया आमो ण्ह ण्हं । १२४ शेषे दन्तवत् । १२५ न दीर्घो णो । १२६ ङसेर्लुक् । १२७ भ्यसश्च हि । १२८ ङेर्ड्डे. । १२९ एत् । १३० द्विवचनस्य वहुवचनम् । १३१ चतुर्थ्यो. पष्ठी । १३२ तादर्थ्यङेर्वा । १३३ वधाड्ढाइश्च वा । १३४ क्वचिद् द्वितीयादे । १३५ द्वितीया-तृतीययोः सप्तमी । १३६ पञ्चम्योस्तृतीया च । १३७ सप्तम्या द्वितीया । १३८ क्यङोर्यलुक् । १३९ त्यादीनामाद्यत्रयस्याद्यस्येचेचौ । १४० द्वितीयस्य सि से । १४१ तृतीयस्य मि । १४२ वहुष्वाद्यस्य न्ति न्ते हरे । १४३ मध्यमस्येत्था-हचौ । १४४ तृतीयस्य मो-मु-मा । १४५ अत एवै च् से । १४६ सिनास्ते सि । १४७ मि-मो-मैर्म्हि-म्हो-म्हा वा । १४८ अत्थिस्त्यादिना । १४९ णेरदेदावावे । १५० गुर्वादेरविर्वा । १५१ भ्रमेराडो वा । १५२ लुगावी क्त-भाव-कर्मसु । १५३ अदेल्लुक्यादेरत आ । १५४ मौ वा । १५५ इच्च मो-मु-मे वा । १५६ क्ते । १५७ एच्च क्त्वा-तुम्-तव्य-भविष्यत्सु । १५८ वर्तमाना-पञ्चमी-शतृषु वा । १५९ ज्जा-ज्जे । १६० ईअ-इज्जौक्यस्य । १६१ दृशि-वचेर्डीस-डुच्च । १६२ सी ही हीअ भूतार्थस्य । १६३ व्यञ्जनादीअ. । १६४ तेनास्ते-रास्यहेसी । १६५ ज्जात्सप्तम्या इर्वा ।

तइ तए डिना । १०२ तु-तुव-तुम-तुह-तुब्भा ङौ । १०३ सुपि । १०४ब्भो म्ह-ज्झौ वा । १०५ अस्मदो म्मि अम्मि अम्हि ह अहं अहय सिना । १०६ अम्ह अम्हे अम्हो मो वय भे जसा । १०७ णे ण मि अम्मि अम्ह मम्ह म मम मिमं अहं अमा । १०८ अम्हे अम्हो अम्ह णे शसा । १०९ मि मे ममं ममए ममाइ मइ मए मयाइ णे टा । ११० अम्हेहि अम्हाहि अम्ह अम्हे णे भिसा । १११ मइ-मम-मह-मज्झा ङसौ । ११२ ममाम्हौ भ्यसि । ११३ मे मइ मम मह महं मज्झ मज्झं अम्ह अम्हं ङसा । ११४ णे णो मज्झ अम्ह अम्हं अम्हे-अम्हो अम्हाण ममाण महाण मज्झाण आमा । ११५ मि मइ ममाइ मए मे ङिना । ११६ अम्ह-मम-मह-मज्झा ङौ । ११७ सुपि । ११८ त्रेस्ती तृतीयादौ । ११९ द्वेर्दो वे । १२० दुवे दोण्णि वेण्णि च जस्-शसा । १२१ त्रेस्तिण्णि । १२२ चतुरश्चत्तारो चउरो चत्तारि । १२३ सख्यायां आमो ण्ह ण्हं । १२४ शेषे दन्तवत् । १२५ न दीर्घो णो । १२६ ङसेर्लुक् । १२७ भ्यसश्च हि । १२८ ङेर्डे. । १२९ एत् । १३० द्विवचनस्य बहुवचनम् । १३१ चतुर्थ्याः षष्ठी । १३२ तादर्थ्यङेर्वा । १३३ वधाड्डाइश्च वा । १३४ क्वचिद् द्वितीयादे । १३५ द्वितीया-तृतीययोः सप्तमी । १३६ पञ्चम्यास्तृतीया च । १३७ सप्तम्या द्वितीया । १३८ क्यङोर्यलुक् । १३९ त्यादीनामाद्यत्रयस्याद्यस्येचेचौ । १४० द्वितीयस्य सि से । १४१ तृतीयस्य मि । १४२ बहुष्वाद्यस्य न्ति न्ते इरे । १४३ मध्यमस्येत्था-हचौ । १४४ तृतीयस्य मो-मु-मा । १४५ अत एवै च् से । १४६ सिनास्ते सि । १४७ मि-मो-मैर्म्हि-म्हो-म्हा वा । १४८ अत्थिस्त्यादिना । १४९ णेरदेदावावे । १५० गुर्वादेरविर्वा । १५१ भ्रमेराडो वा । १५२ लुगावी क्त-भाव-कर्मसु । १५३ अदेल्लुक्यादेरत आ । १५४ मौ वा । १५५ इच्च मो-मु-मे वा । १५६ क्ते । १५७ एच्च क्त्वा-तुम्-तव्य-भविष्यत्सु । १५८ वर्तमाना-पञ्चमी-शतृषु वा । १५९ ज्जा-ज्जे । १६० ईअ-इज्जौक्यस्य । १६१ दृशि-वचेर्डीस-ड्डुच्च । १६२ सी ही हीअ भूतार्थस्य । १६३ व्यञ्जनादीअ. । १६४ तेनास्ते-रास्यहेसी । १६५ ज्जात्सप्तम्या इर्वा ।

१६६ भविष्यति हिरादि । १६७ मि-मो-मु-मे स्सा हा न वा । १६८ मो-मु-माना हिस्सा हित्था । १६९ मे· स्स । १७० कृ-दो हं । १७१ श्रु-गमि-रुदि-विदि-दृशि-मुचि-वचि-छिदि-भिदि-भुजा सोच्छं गच्छं रोच्छ वेच्छ दच्छ मोच्छ वोच्छ छेच्छ भेच्छं भोच्छ । १७२ सोच्छादय इजादिषु हिलुक् च वा । १७३ दु सु मु विध्यादिष्वेकस्मिंस्त्रयाणाम् । १७४ सोर्हिर्वा । १७५ अत इज्जस्विज्जहिज्जे-लुको वा । १७६ बहुणु न्तु ह मो । १७७ वर्तमाना-भविष्यन्त्योश्च ज्ज ज्जा वा । १७८ मध्ये च स्वरान्ताद्वा । १७९ क्रिया-तिपत्ते. । १८० न्त माणौ । १८१ शत्रानश. । १८२ ई च स्त्रियाम् ।

प्राकृत व्याकरणस्य चतुर्थः पादः

१ इदितो वा । २ कथेर्वज्जर-पज्जरोप्पाल-पिसुण-सघ-बोल्ल चव जम्प-सीस-साहाः । ३ दु खे-णिव्वर । ४ जुगुप्सेझुण दुगुच्छ दुगुञ्छा. । ५ वुभुक्षि-वीज्योर्णीरव-वोज्जौ । ६ ध्या गोर्झा-गौ । ७ ज्ञो जाण-मुणौ । ८ उदो ध्मो धुमा । ९ श्रदो धो दह । १० पिबे पिज्ज-डल्ल-पट्ट-घोट्टाः । ११ उद्वातेरोरुम्मा वसुआ । १२ निद्रातेरोहीरोङ्घौ । १३ आघ्रेराइग्घ. । १४ स्नातेरब्भुत्त· । १५ सम. स्त्य खा. । १६ स्थष्ठा थक्क चिट्ठ निरप्पाः । १७ उदष्ठ कुक्कुरौ । १८ म्लेर्वा पव्वायौ । १९ निर्मो-निमाण-निम्मवौ । २० क्षेर्णिज्झरो वा । २१ छदेर्णुम-नूम सन्नुम-ढक्कौम्वाल पव्वाला । २२ निव्रि-पत्योणिहोड. । २३ दूडो दूम. । २४ धवलेर्दुम· । २५ तुलेरोहामः । २६ विरिचेरोलुण्डोल्लुण्डपल्हत्था. । २७ तडेराहोड-विहोडौ । २८ मिश्रेर्वीसाल मेलवौ । २९ उद्धलेर्गुण्ठः । ३० भ्रमेस्तालिअण्ट-तमाडौ । ३१ नशे-विउड-नासव-हाख-विप्पगाल-पलावा. । ३२ दृशेर्दाव-दंस-दक्खवा । ३३ उद्घटेरुग्ग. । ३४ स्पृह सिह । ३५ संभावेरासघः । ३६ उन्नमेरुत्थघो-ल्लाल-गुलुगुञ्छोप्पेल्ला. । ३७ प्रस्थापेः पट्ठव-पेण्डवौ । ३८ विज्ञपेर्वोक्का-वुक्कौ । ३९ अर्पेरल्लिववचच्चुप्प-पणामा. । ४० यापेर्जव. । ४१ प्लावेरो-म्वाल-पव्वालौ । ४२ विकोशे. पक्खोडः । ४३ रोमन्थेरोग्गाल-वग्गोलौ ।

४४ कमेणिहुवः । ४५ प्रकाशेर्णुव्व । ४६ कम्पेर्विच्छोल । ४७ आरोप-वंलः । ४८ दो ले-रङ्खोलः । ४९ रञ्जे राव । ५० घटे परिवाड. । ५१ वेष्टे परिआल । ५२ क्रिय किणो वेस्तु क्के च । ५३ भियो भा-वीहो । ५४ आली झोल्ली । ५५ निलीङेर्णिली अणिलुक्क-णिरिग्घ-लुक्क-लिक्क-ल्हिक्का । ५६ विलोडेर्विरा । ५७ रुते रुञ्ज-रुण्टौ । ५८ श्रुटेर्हणः । ५९ धूगेर्धुवः । ६० भुवेर्हो-हुव-हवाः । ६१ अविति हु । ६२ पृथक् स्पष्टे णिव्वडः । ६३ प्रभौ हुप्पो वा । ६४ क्ते हू । ६५ कृगेः कुण । ६६ काणेक्षिते णिआर. । ६७ निष्टम्भावष्टम्भे निट्ठुह-सदाण । ६८ श्रमे वावम्फः । ६९ मन्युनौष्ठमालिन्ये णिव्वोल । ७० शैथिल्य-लम्बने-पयल्ल. । ७१ निष्पाताच्छोटे णीलुञ्छ । ७२ क्षुरे कम्म । ७३ चाटौ गुलल. । ७४ स्मरेर्झरझूर-भर भल-लढ-विम्हर-सुमर-पयर-पम्हुहा । ७५ विस्मु पम्हुस-विम्हर-वीसरा । ७६ व्याहृगे कोक्क पोक्को । ७७ प्रसरेः पयल्लोवेल्लौ । ७८ महमहो गन्धे । ७९ निस्सरेर्णीहर-नील-धाडवरहाडाः । ८० जाग्रेर्जग्ग । ८१ व्याप्रेराअड्ड । ८२ संवृगे साहर-साहट्टौ । ८३ आदृङे सन्नामः । ८४ प्रहृगे सार. । ८५ अवतरेरोह-ओरसौ । ८६ शकेश्चय-तर-तीर-पारा. । ८७ फक्कस्थक्क । ८८ श्लाघ. सलह । ८९ खचेर्वेअडः । ९० पचेः सोल्ल पउलौ । ९१ मुचेग्छड्डावहेड-मेल्लोस्सिक्क-रेअव-णिल्लुञ्छ-धसाडा. । ९२ दुःखे णिव्वल. । ९३ वञ्चेर्वेहव-वेलव-जूरवोमच्छा । ९४ रचेरुग्ग-हावह-विडविड्डा. । ९५ समारचेरुवहत्थ-सारव-समार-केला या. । ९६ सिचेः सिञ्च-सिम्पौ । ९७ प्रच्छ पुच्छ । ९८ गर्जेर्बुक्क । ९९ वृषे ढिक्क । १०० राजेरग्घ-छज्ज-सह-रीर रेहा. । १०१ मस्जेराउड्ढ-णिउड्ढ-वुड्ड-खुप्पाः । १०२ पुञ्जेरारोल-वमालौ । १०३ लस्जेर्जीह । १०४ तिजेरोसुक्क. । १०५ मृजेरुग्घुस-लुञ्छ-पुञ्छ-पुस-फुस-पुस-लुह-हुल- रोसाणा. । १०६ भञ्जेर्वेमय-मुसुमूर-मूर-सूर-सूड-विर-पविरञ्ज-करञ्ज-नीरञ्जा. । १०७ अनुव्रजे पडिअग्ग. । १०८ अर्जेर्विढव. । १०९ युजो-जुञ्ज-जुज्ज-जुप्पाः । ११० भुजो-भुञ्ज-जिम-जेम--कम्माण्ह-चमढ-समण-चड्डा. । १११ वोपेन कम्मवः

११२ घटेर्गढ । ११३ समो गल. । ११४ हासेन स्फुटेर्मुर । ११५ गण्डो-
श्चञ्च-चिञ्चअ-चिञ्चिलल-रीड टिविडिक्का. । ११६ तुडेस्तोड-तुट्ट-खुट्ट-
खुडोक्खुडो-ल्लूक्क-णिल्लुक्क-लुक्कोल्लूरा । ११७ घूर्णो-घुल-घोल-घुम्म-
पहल्ला । ११८ विवृते-र्ढस । ११९ क्वथेरट्ट । १२० ग्रन्थेर्गण्ठ । १२१
मन्थेर्घुसल-विरोली । १२२ ह्लादेरवअच्छ । १२३ नं. सदो मज्ज । १२४
छिदेर्दुहाव-णिच्छल्ल-णिज्झोड-णिव्वर-णिल्लूर-लूरा । १२५ आङा ओअ-
न्दोद्दालो । १२६ मृदो-मल-मढ-परिहट्ट-खड्ड-चड्ड-मड्ड-पन्नाडा । १२७ स्प-
देश्चुलुचुल. । १२८ निर पदेर्वल । १२९ विसवदेर्विअट्ट-विलोट्ट-फसा. ।
१३० शदो-झड-पक्खोडी । १३१ आक्रन्देर्णीहर । १३२ खिदेर्जूर विसूरी।
१३३ रुधेरुत्थङ्घः । १३४ निषेधेर्हक्क । १३५ क्रुधेर्जुरः । १३६ जनो-
जा-जम्मौ । १३७ तनेस्तड-तड्ड-तड्डव-विरल्ला । १३७ तृपस्थिप्प । १३९
उपसर्पेरल्लिअ । १४० सन्तपेर्झङ्ख । १४१ व्यापेरोअग्ग । १४२ समापेः
समाण । १४३ क्षिपेर्गलत्थाड्डुक्ख-सोल्ल-पेल्ल-णोल्ल-छुह-हुल-परी-घत्ता ।
१४४ उत्क्षिपेर्गुलगुञ्छोत्थघाल्लत्थोब्भुत्तो-स्सिक्क-हक्खुवा । १४५ माक्षिपे-
र्णीरव । १४६ स्वपे कमवस-लिस-लोट्टा । १४७ वेपेरायम्बायज्झौ ।
१४८ विलपेर्झङ्ख-वडवडौ । १४९ लिपो-लिम्प । १५० गुप्येर्विर-णडौ ।
१५१ क्रपोवहोणि । १५२ प्रदीपेस्तेअव-सन्दुम-सन्धुक्काब्भुत्ता । १५३
लुभे. सभाव । १५४ क्षुभे खउर-पड्डुहौ । १५५ आङो-रभे-रम्भ-ढवौ ।
१५६ उपालम्भेर्झङ्ख-पच्चार-वेलवा । १५७ अवेर्जृम्भो जम्भा । १५८
भाराक्रान्ते नमेर्णिसुढ । १५९ विश्रमेर्णिव्वा । १६० आक्रमेरोहा-वोत्था-
रच्छुन्दाः । १६१ भ्रमेष्टिरिटिल्ल-ढुण्ढुल्ल-ढण्ढल्ल-चक्कम्म-भम्मड-भमड-
भमाड-तल-अण्ट-झण्ट-झम्प-भुम-गुम-फुम-फुस-ढुम-ढुस-परी-परा । १६२
गमेरई-अइच्छाणुवज्जावज्जसोक्कुसोक्कुस-पच्चड्ड-पच्छन्द-णिम्मह-णी-णीण-
णीलुक्क-पदअ-रम्भ-परिअल्ल-वोल-परिअल-णिरिणास-णिवहावसेहावहरा
१६३ आङा अहिपच्चुअ । १६४ समा अब्भिड । १६५ अभ्याङोम्मत्थ. ।
१६६ प्रत्याङा पलोट्ट । १६७ शमे. पडिसा-परिसामौ । १६८ रमे. सखुड्ड

खेड्ढोवमाव-किलिकिञ्च-कोट्टम-मोट्टाय-णीसर-वेल्लाः । १६९ पूरेरग्घा-डाग्घवोद्धुमाङ्गुमाहिरेमाः । १७० त्वरस्तुवर-जअडो । १७१ त्यादिशत्रो-स्तूर. । १७२ तुरोत्यादौ । १७३ क्षरः खिर-झर-पज्झर-पच्चड-णिच्चल-णिट्टूआः । १७४ उच्छल-उथल्ल । १७५ विगलेस्थिप्प-णिट्टुहौ । १७६ दलि-वल्योर्विसट्टवम्फौ । १७७ भ्रंशे फिड-फिट्ट-फुड-फुट्ट-चुक्क-भुल्लाः । १७८ नशेर्णिरणास-णिवहावसेह-पडिसा-सेहावहराः । १७९ अवात्काशो वास । १८० सदिशेरप्पाहः । १८१ दृशो निमच्छापेच्छा-वयच्छावयज्झ। वज्ज-सव्वव--देक्खो-अक्खावक्खावअक्ख-पुलोअ-पुलअ-निआवआस-पासाः • १८२ स्पृश फास-फंस-फरिस-छिव-छिहालुङ्खालिहा. । १८३ प्रविशेरिअ. । १८४ प्रान्मृश-मुषोर्म्हुस । १८५ पिषेर्णिवह-णिरिणास-णिरिणज्ज-रोञ्चचड्डाः । १८६ भषेर्भुक्कः । १८७ कृषेः कड्ढ-साअड्ढाञ्चाणच्छायञ्छाइञ्छाः । १८८ असावक्खोड. । १८९ गवेषेर्ढुण्ढुल्ल-ढण्ढोल-गमेस-घत्ता । १९० श्लिषे. सामग्गावयास-परिअन्ता । १९१ म्रक्षेश्चोप्पड । १९२ काङ्क्षे-राहाहिलङ्घाहिलङ्ख-वच्च-वम्फ-मह-सिह-विलुम्पा. । १९३ प्रतीक्षेः सामय-विहीर-विरमाला । १९४ तक्षेस्तच्छ-चच्छ-रम्प-रम्फा । १९५ विकसेः कोआस-वोसट्टौ । १९६ हसेर्गुञ्ज । १९७ स्रंसेर्ल्हस-डिम्भौ । १९८ त्रसे-र्डर-वोज्ज-वज्जा. । १९९ न्यसो णिम-णुमौ । २०० पर्यस पलोट्ट-पल्लट्ट-पल्हत्था । २०१ निःश्वसेर्झङ्ख । २०२ उल्लसेरूसलोसुम्भ-णिल्लस-पुल-आअ-गुञ्जोल्लारोआ । २०३ भासेर्भिसः । २०४ ग्रसेर्घिस. । २०५ अवा-द्गाहेर्वाहः । २०६ आरुहेश्चड-वलग्गौ । २०७ मुहेर्गुम्म-गुम्मडौ । २०८ दहेरहिऊलालुङ्खौ । २०९ ग्रहो-वल-गेण्ह-हर-पङ्ग-निरुवाराहिपच्चुआ. । २१० क्त्वा-तुम्-तव्येषु घेत् । २११ वचो वोत् । २१२ रुद-भुज-मुचातो-न्त्यस्य । २१३ दृशस्तेन ट्ठ । २१४ आ कृगो भूत-भविष्यतोश्च । २१५ गमिष्यमासा छ । २१६ छिदि-भिदो न्द । २१७ युध-बुध-गृध-क्रुध-सिध-मुहा ज्झ । २१८ रुधोन्ध-म्भौ-च । २१९ सद-पतोर्ड । २२० क्वथ-वर्धाढ । २२१ वेष्ठ । २२२ समो ल्ल. । २२३ वोद । २२४ स्विदा ज्ज. । २२५ व्रज-नृत-मदा च्च. । २२६ रुद-नमोर्व । २२७ उद्विज. । २२८ खाद-धावोर्लुक् । २२९ सृजो र. । २३० शकादीना द्वित्वम् । २३१

स्फुटि-चलेः । २३२ प्रादेर्मीलेः । २३३ उवर्णस्यावः । २३४ ऋवर्णस्यारः । २३५ वृषादीनामरिः । २३६ रुषादीना दीर्घं । २३७ युवर्णस्य गुणः । २३८ स्वराणा स्वराः । २३९ व्यञ्जनाददन्ते । २४० स्वरादनतो वाः । २४१ चि-जि-श्रु-हु-स्तु-लू-पू-धूगा णो ह्रस्वश्च । २४२ नवा कर्म-भावे व्वः क्यस्य च लुक् । २४३ म्मश्चे । २४४ हन्खनोन्त्यस्य । २४५ ब्भो दुह-लिह-वह-रुधामुच्चात । २४६ दहो ज्झ । २४७ बन्धो न्धः । २४८ समनूपाद्रुधेः । २४९ गमादीना द्वित्वम् । २५० हृ कृ तृ ज्रामीर । २५१ अर्जेविढप्प. । २५२ ज्ञो णव्व-णज्जौ । २५३ व्याहृगेर्वाहिप्पः । २५४ आरभेराढप्पः । २५५ स्निह-सिचो सिप्पः । २५६ ग्रहेर्घेप्प. । २५७ स्पृशेच्छिप्पः । २५८ क्तेनाप्फुण्णादय । २५९ धातवोर्थान्तरेपि । २६० तो दोनादौ शौरसेन्यामयुक्तस्य । २६१ अध. क्वचित् । २६२ वादेस्तावति । २६३ आ आमन्त्र्ये सौवेनो नः । २६४ मो वा । २६५ भवद्भगवतोः । २६६ न वा र्यो य्य । २६७ थो धः । २६८ इह-हचोर्हस्य । २६९ भुवो भः । २७० पूर्वस्य पुरवः । २७१ क्त्व इय दूणौ । २७२ कृ गमो डडुमः । २७३ दिरिचेचोः । २७४ अतो देश्च । २७५ भविष्यति स्सि । २७६ अतो डसेर्डादो-डादू । २७७ इदानीमो दाणि । २७८ तस्मात्ता. । २७९ मोन्त्याण्णो वेदेतो । २८० एवार्थे य्येव । २८१ हञ्जे चेटयाह्वाने । २८२ हीमाणहे विस्मय निर्वेदे । २८३ णं नन्वर्थे । २८४ अम्महे हर्षे । २८५ हीही विदूषकस्य । २८६ शेषं प्राकृतवत् । २८७ अत एत्सौ पुंसि मागध्याम् । २८८ र-सोर्ल-शौ । २८९ स षो सयोगे सोग्रीष्मे । २९० ट्ट-ष्ठयोस्ट । २९१ स्थ र्थयोस्त । २९२ ज-द्य या य । २९३ न्य-ण्य-ज्ञ-ञ्जा-ञ्ज. । २९४ व्रजो ज । २९५ छस्य श्चोनादौ । २९६ क्षस्य ‿ क । २९७ स्क. प्रेक्षा-चक्षो । २९८ तिष्ठश्चिष्ठ. । २९९ अवर्णाद्वा ङसो डाह । ३०० आमो डाहँ वा । ३०१ अह वयमोर्हगे । ३०२ शेष शौरसेनीवत् । ३०३ ज्ञो ञ्ञ. पैशाच्चाम् । ३०४ राज्ञो वा चिञ् । ३०५ न्य-ण्योञ्ञ । ३०६ णो नः । ३०७ तदोस्त । ३०८ लो ळ. । ३०९ श-षो सः । ३१० हृदये यस्य पः । ३११ टोस्तुर्वा । ३१२ क्त्वस्तूनः । ३१३ द्धून-त्थूनौ ष्ट्वः ।

३१४ र्यं-स्न-ष्ठां-रिय-सिन-सटा क्वचित्। ३१५ क्यस्येय्य.। ३१६ कृगो डीर·। ३१७ यादृशादेर्दुस्ति। ३१८ इचेच.। ३१९ आत्तेश्च। ३२० भविष्यत्येय्य एव। ३२१ अतोडसेर्डातो-डातू। ३२२ तदिदमोष्ठा नेन स्त्रियां तुनाए। ३२३ शेष शौरसेनीवत्। ३२४ न क-ग-च-जादि-षट्शम्यन्त-सूत्रोक्तम्। ३२५ चूलिका--पैशाचिके तृतोय-तुर्ययोराद्य-द्वितीयो। ३२६ रस्य लो वा। ३२७ नादि-युज्योरन्येषाम्। ३२८ शेष प्राग्वत्। ३२९ स्वराणां स्वरा. प्रायोपभ्रशे। ३३० स्वादौ दीर्घ-ह्रस्वौ। ३३१ स्यमोरस्योत्। ३३२ सौ पुंस्योद्वा। ३३३ एट्टि। ३३४ ङिनेच्च। ३३५ भिस्येद्वा। ३३६ ङसेर्हे-हू। ३३७ भ्यसो हु। ३३८ ङस सु-हो-स्सव.। ३३९ आमो हं। ३४० हु चेदुद्भ्याम्। ३४१ ङसि-भ्यस्ङीनां हे-हु-हयः। ३४२ आट्टो णानुस्वारौ। ३४३ ए चेदुत.। ३४४ स्यम्-जस्-शसा लुक्। ३४५ षष्ठ्या। ३४६ आमन्त्र्ये जसो हो.। ३४७ भिस्सुपेर्हि। ३४८ स्त्रिया जस्-शसोरुदोत्। ३४९ ट ए। ३५० ङस्-ङस्योर्हे:। ३५१ भ्यसामोर्हु। ३५२ ङेर्हि। ३५३ क्लीवे जस्-शसोरिं। ३५४ कान्तस्याउस्यमो.। ३५५ सर्वादेर्ङसेर्हां। ३५६ किमो डिहे वा। ३५७ ङेर्हिं। ३५८ यत्तत्किभ्यो ङसो डासुर्न वा। ३५९ स्त्रिया डहे। ३६० यत्तद स्यमोर्ध्रु त्र। ३६१ इदम इमु. क्लीवे। ३६२ एतदा स्त्री-पुक्लिबे एह एहो एहु। ३६३ एइर्जस्-शसो·। ३६४ अदस ओइ। ३६५ इदम आय.। ३६६ सर्वस्य साहो वा। ३६७ किम काइ-कवणौ वा। ३६८ युष्मद सौ तुहु। ३६९ जस्-शसोस्तुम्हे तुम्हइं। ३७० टा-ङयमा पइ तइ। ३७१ भिसा तुम्हेहिं। ३७२ ङसि-ङस्भ्या तउ तुज्झ तुध्र। ३७३ भ्यसाम्भ्यां तुम्हह। ३७४ तुम्हासु सुपा। ३७५ सावस्मदो हउ। ३७६ जस् शसोरम्हे अम्हइ। ३७७ टा-ङयमा मइ। ३७८ अम्हेहिं भिसा। ३७९ महु मज्झु ङसि-ङस्भ्याम्। ३८० अम्हहं भ्यसाम्भ्याम्। ३८१ सुपा अम्हासु। ३८२ त्यादेराद्य-त्रयस्य सवन्धिनो हिं न वा। ३८३ मध्य-त्रयस्याद्यस्य हि। ३८४ वहुत्वे हु। ३८५ अन्त्य-त्रयस्याद्यस्य उ। ३८६ वहुत्वे हु। ३८७ हि-स्वयोरिदुदेत्। ३८८ वर्त्स्यति-स्यस्य स.। ३८९ क्रिये. कीसु। ३९० भुव. पर्याप्तौ हुच्चः।

३९१ ब्रूगो ब्रूवो वा। ३९२ व्रजेर्वुञ्ज । ३९३ दृशेः प्रस्सः। ३९४ ग्रहे-र्गृण्ह । ३९५ तक्ष्यादीना छोल्लादय । ३९६ अनादौ स्वरादसंयुक्ताना क-ख-त-थ-प-फा-म-घ-द-ध-ब-भा । ३९७ मोनुनासिको वो वा। ३९८ वाधा रो लुक् । ३९९ अभूतोपि क्वचित् । ४०० आपद्विपत्सपदा द इ । ४०१ कथ-यथा-तथा--थादेरेमेहेधाडितः । ४०२ यादृक्तादृक्कीदृगीदृशा दादेर्डेह । ४०३ अता डइमः। ४०४ यत्र-तत्र-योस्त्रस्य डिदेत्थवत्तु। ४०५ एत्थुकुत्रात्रे । ४०६ यावत्तावतोर्वादे मंउ महिं । ४०७ वा यत्तदोतोर्डेवडः। ४०८ वेद-किमोर्यादि । ४०९ परस्परस्यादिर । ४१० कादि-स्थैदोतो-रुच्चार-लाघवम् ४११ पदान्ते उ-हुं-हिं-हंकाराणाम् । ४१२ म्हो म्भो वा । ४१३ अन्यादृशोन्नाइसावराइसौ। ४१४ प्रायस प्राउ-प्राइव-प्राइम्व-'पग्गिम्वा.। ४१५ वान्यथोनुः । ४१६ कुतसः कउ कहन्तिहु । ४१७ ततस्त-दोस्तो । ४१८ एव--पर--सम--ध्रुव--मा--मनाक-एम्व पर समाणु ध्रु वु म मणाउ। ४१९ किलाथवा-दिवा-सह नेह किराहवइ दिवे सहु नाहिं। ४२० पश्चादेवमेवैवेदानी-प्रत्युतेतस पच्छइ एम्वइ जि एम्वहिं पच्चलिउ एत्तहे । ४२१ विषण्णोक्त-वर्त्मनो वुन्न-वुत्त-विच्च । ४२२ शीघ्रादीना वहि-ल्लादय । ४२३ हुहुरु-घुग्गादय शब्द-चेष्ठानुकरणयो । ४२४ घइमादयो-नर्थका । ४२५ तादर्थ्ये केहिं--तेहिं--रेसि--रेसिं--तणेणा । ४२६ पुनर्विन स्वार्थेडु । ४२७ अवश्यमोर्डें-डौ । ४२८ एकशसो डि । ४२९ अ-डड-डुल्ला स्वार्थि-क-लुक् च । ४३० योगजाश्चैषाम् । ४३१ स्त्रिया तदन्ताड्डी । ४३२ आन्तान्ताड्डा । ४३३ अस्येदे । ४३४ युष्मदादेरीयस्य डार । ४३५ अतो-र्डेत्तुल । ४३६ त्रस्य डेत्तहे । ४३७ त्व तलो प्पण । ४३८ तव्यस्य इए-व्वउ एव्वउ एवा । ४३९ क्त्व इ-इउ-इवि-अवय । ४४० एप्प्येप्पिण्वेव्ये-विणवः। ४४१ तुम एव मणाणहमणहिं च । ४४२ गमेरेप्पिण्वे-प्प्योरेर्लुग् वा । ४४३ तृनोणअ । ४४४ इवार्थे न-नउ-नाइ-नावइ-जणि-जणव । ४४५ लिङ्गमतन्त्रम् । ४४६ शौरसेनीवत् । ४४७ व्यत्ययश्च । ४४८ शेष सस्कृ-तवत्सिद्धम् ।

अर्हम्

श्रीहेमचन्द्राचार्यविरचितम्

प्राकृत व्याकरणम्

अथ प्राकृतम् ॥१॥ ॥१॥ अथशब्द आनन्तर्यार्थोऽधिकारार्थश्च। प्रकृतिः संस्कृतं तत्र भवं तत आगतं वा प्राकृतं। संस्कृतानन्तरं प्राकृतम् अधिक्रियते। संस्कृताऽनन्तरं प्राकृतस्यानुशासनं सिद्धसाध्यमानभेदसंस्कृतयोनेरेव तस्य लक्षणं न देश्यस्य इति ज्ञापनार्थं। संस्कृतसमं तु संस्कृतलक्षणेनैव गतार्थं॥ प्राकृते च प्रकृतिप्रत्ययलिङ्गकारकसमास-संज्ञादयः संस्कृतवद् वेदितव्याः। लोकाद् इति च वर्त्तते, तेन ऋ ॠ लृ लॄ ऐ औ ङ ञ श ष विसर्जनीयप्लुतवर्ज्यो वर्णसमाम्नायो लोकाद् अवगन्तव्य. ॥ ङ-ञौ स्ववर्ग्यसंयुक्तौ भवत एव। ऐदौतौ च केषांचित्। कैतवम्। कैअव। सौन्दर्यम्। सौअरियं। कौरवाः। कौरवा। तथा 'अस्वर' 'व्यञ्जनं' 'द्विवचनं' 'चतुर्थीबहुवचनं' च न भवति॥

बहुलम् ॥ १ ॥ २ ॥ बहुलम् इति 'अधिकृतं वेदितव्यम्' आशास्त्रपरिसमाप्तेः। ततश्च "क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव 'भवति' तच्च यथास्थानं दर्शयिष्यामः"

आर्षम् ॥ १ ॥ ३ ॥ ऋषीणाम् इदम् 'आर्षम्' आर्षं प्राकृतं बहुलं भवति। तदपि यथास्थानम् दर्शयिष्यामः। आर्षे हि सर्वे विधयो विकल्प्यन्ते॥

अथ स्वरसन्धिः ।

लुक् ॥ १ ॥ १० ॥ पूर्वस्वरस्य 'बहुलं लुक् स्यात् स्वरे परे' त्रिदशेशः । तिअसीसो । निःश्वासोच्छ्वासौ । नीसासूसासो ।

आदेः ॥ १ ॥ ३९ ॥ आदेरित्यधिकारः कगचजेत्यादिसूत्रात प्राग् अविशेषेण वेदितव्यः ।

त्यदाद्यव्ययात् तत्स्वरस्य लुक् ॥ १ ॥ ४० ॥ त्यदादेरव्ययाच्च परस्य तयोरेव त्यदाद्यव्यययोः आदिस्वरस्य बहुलं लुक् भवति । वयम् अत्र । अम्हे एत्थ । अम्हेत्थ । यदि इयम् । जइ इमा । जइमा । यदि अहम् । जइ अहं । जइहं ।

पदादपेर्वा ॥ १ ॥ ४१ ॥ पदात् परस्य अपेरादिस्वरस्य लुक् वा भवति ॥ तद् अपि । 'तंपि । तमपि' किम् अपि । 'किं पि' । 'किमवि' केन अपि । 'केणवि' केणावि । कथम् अपि । कहपि । कहमवि ॥

इतेः स्वरात् तश्च द्विः ॥ १ ॥ ४२ ॥ पदात्परस्य इतेरादिस्वरस्य लुक् भवति स्वरात्परश्च तकारो द्विर्भवति ॥ किमिति । किंति । यद् इति । जंति । दृष्टम् इति । दिट्ठं ति । न युक्तम् इति । न जुत्तं त्ति ॥ स्वरात् । तथा इति । तहत्ति । झग् इति । झत्ति । प्रिय इति । पिओ त्ति । पुरुष इति । पुरिसो त्ति ॥ पदादित्येव । इति विन्ध्यगुहा निलयाया । इअविंझ-गुहानिलयाए ।

लुप्त यरव-शषसां 'शषसां' दीर्घः ॥ १ ॥ ४३ ॥ प्राकृतलक्षणवशात् लुप्ताः आद्या उपर्यधो वा । यरवशषसा येषां शषसां । तेषाम् आदिस्वरस्य दीर्घो भवति ॥ पश्यति । इति स्थिते ।

अधो मनयाम् ॥ २ ॥ ७८ ॥ संयोगान्ते वर्त्तमानानां मनयां लुक् भवति (म) युग्मं । जुग्गं । रश्मिः । रस्सी । स्मरः । सरो । स्मेरं । सेरं । (न)नग्नः । नग्गो । लग्नः । लग्गो(य)कुड्यं । कुड्डं । बाह्यः ।

वाहो ॥ इति यकारस्य लुकि पूर्वेण दीर्घः। पासइ॥ कश्यपः। कासवो॥ आवश्यकं। आवासयं॥ रलोपे। विश्राम इति स्थिते।

सर्वत्र लवराम् अवन्द्रे ॥ २ ॥ ७९ ॥ बन्द्रशब्दादन्यत्र संयुक्तस्योर्ध्वम् अधश्च सर्वत्र स्थितानां लवरां लुक् भवति॥ ऊर्ध्वं। ल। उल्का। उक्का॥ वल्कलं॥ वक्कलं॥ (ब) शब्दः। सद्दो॥ अब्दः। अद्दो। लुब्धकः। लोद्धओ। (र) अर्कः। अक्को। वर्गः। वग्गो। (अधः)। श्लक्ष्णं। सण्हं। विक्लवः। विक्कवो। पक्वम्। पक्कं। पिक्कं। ध्वस्तः। धस्थो। चक्रं। चक्कं। ग्रहः। गहो। रात्रिः। रत्ती॥ इत्यनेन रलोपः। विश्राम। वीसामो। मिश्रं। मीसं। संस्पर्शः। संफासो। 'वलोपे'। अश्वः। आसो। विश्वसिति। वीससइ। विश्वासः। वीसासो। 'शलोपे' दुश्शासनः। दूसासणो। मनश्शिला। मणासिला 'षस्य यलोपे' शिष्य। सीसो। पुष्यः। पूसो। मनुष्यः। मणूसो 'रलोपे' कर्षक। कासओ। वर्षा। वासा। वर्ष। वासो 'वलोपे' विष्वाणः। वीसाणो। विष्वक्। वीसु 'षलोपे' निष्षिक्तः। नीसित्तो 'सस्य यलोपे' सस्यं। सासं। कस्यचित्। कासइ। 'रलोपे' उस्रः। ऊसो। विस्रंभः। वीसंभो। 'वलोपे' विकस्वरः। विकासरो। निःस्वः। नीसो। 'सलोपे' निस्सहः। नीसहो॥ न दीर्घानुस्वारात्। २।९२। इति प्रतिषेधात्। सर्वत्र अनादौ शेषादेशयोर्द्वित्वमिति आप्तस्य द्वित्वस्याभाव॥

अतः समृद्ध्यादौ वा ॥ १ ॥ ४४ ॥ समृद्ध्यादिशब्देषु आदेरकारस्य दीर्घो वा भवति। समृद्धिः। सामिद्धी-समिद्धी। प्रसिद्धिः। पासिद्धी पसिद्धी। प्रकटं। पायडं-पयडं। प्रतिपत्। पाडिवआ-पडिवआ। प्रसुप्तः। पासुत्तो पसुत्तो। प्रतिसिद्धिः। पाडिसिद्धी-पडिसिद्धी। सदृक्। सारिच्छो-सरिच्छो। मनस्विन्। माणंसी-मणंसी। मनस्विनी। माणंसिणी-मणंसिणी। अभियाति। आहिआइ-अहिआइ। प्ररोहः। पारोहो-परोहो। प्रवासिन्। पावासू-पवासू। 'प्रवासीक्षौ' इति

इकारस्य उत्त्वम्)। प्रतिस्पर्द्धिन्। पाडिप्फद्धी–पडिप्फद्धी। आकृति-गणोऽयम्। तेन अस्पर्शः। आफसो। परकीयं। पारकेरं–पारक्कं। प्रवचनम। पावयणं। चतुरन्तम् चाउरंत इत्यादयोऽपि भवन्ति।

दुःखदक्षिणतीर्थे वा ॥ २ ॥ ७२ ॥ एषु संयुक्तस्य हो वा भवति। इति क्षस्य हः ॥

दक्षिणे हे ॥ १ ॥ ४५ ॥ दक्षिणशब्दे आदेरस्य हे परे दीर्घो भवति। दक्षिण.। दाहिणो। हे इति किं। दक्खिणो ॥

स्वप्ने नात् ॥ २ ॥ १०८ ॥ स्वप्नशब्दे नकारात् पूर्वम् इद् आगमो भवति। स्वपिन इति जाते ॥

इः स्वप्नादौ ॥ १ ॥ ४६ ॥ स्वप्नादिशब्देषु आदेरस्य इत्त्वं* भवति ॥ स्वप्न.। सिविणो। सिमिणो। स्वप्ननीव्योर्वा। इति पस्य म)। आर्षे उकारोऽपि सुमिणो। ईषद्। ईसि। वेतसो। वेडिसो। व्यलीकं। विलिअं। मृदङ्गो। मुइंगो। व्यजनं–वियणं। कृपण.। किविणो। उत्तमः। उत्तिमो। मरिचः। मिरिअं। दत्तं–दिण्णं। बहुलाधिकारात् णत्वाभावे न भवति। दत्तं। देवदत्तं। इत्यादि ॥

पक्वाङ्गारललाटे वा ॥ १ ॥ ४७ ॥ एषु आदेरत इत्त्वं वा भवति। पक्वम्। पिक्कं–पक्कं। अङ्गारः। इंगालो–अङ्गारो।

ललाटे च ॥ १ ॥ २५७ ॥ ललाटे च आदेर्लस्य णो भवति, चकार आदेरनुवृत्त्यर्थः। इति आदिलकारस्य णः। णलाट इति जाते।

---

*अत्र च बहुषु पुस्तकेषु एक एव तकारो दृश्यते, तदशुद्धमिति, न परिभावनीयं, तत्र भाव्यमानः सवर्णान् न गृह्णातीति अभिप्रायेण केवलं इशब्दात् त्वप्रत्ययः ॥ अत्र तु भाव्यमानोऽपि सवर्णान् गृह्णातीति तपरत्वविशिष्टात् इत् शब्दात् त्वप्रत्ययः, तथा च तकारद्वयश्रुतिः, यत्र तु अत्रापि एक एव तकारस्तत्र केवलेभ्य-इकारादिभ्य स्त्वप्रत्ययो ज्ञातव्यः।

ललाटे लडोः ॥२॥ १२३ ॥ ललाटशब्दे लकारडकारयोर्व्य-त्ययो भवति वा। णिडालं-णलाडं। णलाडं णडालं ॥

मध्यमकतमे द्वितीयस्य ॥ १ ॥ ४८ ॥ मध्यमशब्दे कतम-शब्दे च द्वितीयस्य अत इत्त्वं भवति ॥ मध्यमः। मज्झिमो। साध्वसध्यह्यां 'झ' इति ध्यस्य झः ॥ कतमः। कइमो ॥

सप्तपर्णे वा ॥ १ ॥ ४९ ॥ सप्तपर्णे द्वितीयस्य अत इत्त्वं वा भवति ॥

षट्शमीशावसुधासप्तपर्णेष्वादेश्छः ॥१॥ २६५ ॥ एषु आदे-र्वर्णस्य छो भवति। षष्ठः। छट्ठो। षष्ठी। छट्ठी। षट्पदः। छप्पओ। षण्मुख। छंमुहो। शमी। छमी। शावः। छावो। सुधा। छुहा। सप्तपर्णः। छत्तिवण्णो। छत्तवण्णो।

मयस्यइ-र्वा ॥ १ ॥ ५० ॥ मयट्प्रत्यये आदेरतः स्थाने अइ र्वा भवति। विषमय.। विसमइओ। विसमओ।

ईर्हरे वा ॥ १ ॥ ५१ ॥ हरशब्दे आदेरत ईर्वा भवति। हरः। हीरो। हरो ॥

ध्वनिविष्वचोरुः ॥ १ ॥ ५२ ॥ अनयोरादेरस्य उत्त्वं भवति ॥ ध्वनि.। झुणी। विष्वक्। वीसुं। कथं सुणओ इति चेद्। शुनक इति प्रकृत्यन्तरस्य, श्वन्शब्दस्य तु सा साणो इति प्रयोगौ भवतः ॥

चण्डखण्डिते णा वा ॥१॥५३॥ अनयोरादेरस्य णकारेण सहितस्य उत्त्वं वा भवति ॥ चण्डं। चुडं। चंडं। खंडितः। खुडिओ। खंडिओ ॥

गवये वः ॥ १ ॥ ५४ ॥ गवयशब्दे वकाराकारस्य उत्त्व भवति। गवयः। गउओ। गउआ ॥

प्रथमे पथोर्वा ॥ १ ॥ ५५ ॥ प्रथमशब्दे पकारथकारयोरकारस्य युगपद् क्रमेण च उकारो वा भवति ॥ प्रथमम् । पुढुमं । पढुमं । पुढमं । पढमं । मेथिशिरेत्यादिना थस्य ढ. ॥

ज्ञो णत्वेऽभिज्ञादौ ॥ १ ॥ ५६ ॥ अभिज्ञादिषु ज्ञस्य णत्वे कृते ज्ञस्यैव अत उत्त्वं भवति ॥ अभिज्ञः ॥ अहिण्णू । ज्ञाम्नोर्न इति ज्ञस्य नत्वं ॥ सर्वज्ञ. । सव्वण्णू । कृतज्ञः । कयण्णू । आगमज्ञः । आगमण्णू । णत्वे इति किं । अहिज्जो । सव्वज्जो । अभिज्ञादौ इति किं । प्राज्ञः । पण्णो । येषां ज्ञस्य णत्वे उत्त्वं दृश्यते तेऽभिज्ञादयः ।

एच् छय्यादौ ॥ १ ॥ ५७ ॥ शय्यादिशब्देषु आदेरस्य एत्त्वं भवति । शय्या । सेज्जा । द्यर्य्यां ज इति य्यस्य जत्वम् ॥ सुन्दरम् । सुंदेरं । कन्दुकं । गेंदुअं । अत्र । एत्थ । अत्र आर्षे पुरेकंमं ॥

वल्ल्युत्करपर्यन्ताश्चर्ये वा ॥ १ ॥ ५८ ॥ एषु आदेरस्य एत्त्वं वा भवति ॥ वल्ली । वेल्ली । उत्करः । उक्केरो । उक्करो ॥

एतः पर्य्यन्ते ॥ २ ॥ ६५ ॥ पर्यन्ते एकारात्परस्य र्यस्य रो भवति ॥ पर्य्यन्त. । पेरंतो 'पज्जंतो' ।

आश्चर्ये ॥ २ ॥ ६६ ॥ आश्चर्ये एतः परस्य र्यस्य रो भवति । आश्चर्यम् । 'अच्छेरं' ॥

अतो रिआर-रिज्ज-रीअं ॥ २ ॥ ६७ ॥ आश्चर्येऽकारात्परस्य र्यस्य रिअ अर रिज्ज रीअं एते आदेशा भवन्ति । अच्छरिअं अच्छअरं अच्छरिज्जं अच्छरीअं ॥ अत. किम् । अच्छेरं ॥

ब्रह्मचर्ये च ॥ १ ॥ ५९ ॥ ब्रह्मचर्ये शब्दे चस्य अत एत्त्वं भवति । ब्रह्मचर्यं । ब्रह्मचर्येत्यादिना र्यस्य रः । बम्हचेरं ।

तोऽन्तरि ॥ १ ॥ ६० ॥ अन्तःशब्दे तस्य अत एत्त्वं भवति। 'अन्तःपुरम् । अंतेउरं ' ' अन्तश्चारी । अंतेआरी ' क्वचिन्न भवति । अन्तर्गतम् । अंतग्गयं । अन्तर्विश्रम्भनिवेसितानाम् । अंतोवीसंभनिवेसिआणं ॥

ओत् पद्मे ॥ १ ॥ ६१ ॥ पद्मशब्दे आदेरत ओत्त्वं भवति ॥ 'पद्मं । पोम्मं' पद्म छद्म इति विश्लेषे न भवति 'पउमं' ॥

नमस्कारपरस्परे द्वितीयस्य ॥ १ ॥ ६२ ॥ अनयोर्द्वितीयस्य अत ओत्त्वं भवति । नमस्कारः । नमोक्कारो । परस्परं । परोप्परं ॥

वार्पौ ॥ १ ॥ ६३ ॥ अर्पयतौ धातौ आदेरस्य ओत्त्वं वा भवति । अर्पयति । ओप्पेइ अप्पेइ । अर्पितम् । ओप्पिअं अप्पिअं ॥

स्वपावुच्च ॥ १ ॥ ६४ ॥ स्वपितौ धातौ आदेरस्य ओत् उत च भवति । स्वपिति । सोवइ सुवइ ।

नात् पुनरादाई वा ॥ १ ॥ ६५ ॥ नञः परे पुनःशब्दे आदेरस्य आद् आइ इत्यादेशौ वा भवतः ॥ न पुन. । नउणा नउणाइ । पक्षे नउण नउणो । केवलस्याऽपि दृश्यते पुणाइ ॥

वाऽलाब्वरण्ये लुक् ॥ १ ॥ ६६ ॥ अलाब्वरण्यशब्दयोः आदेरतो लुक् वा भवति । अलाबु । अलाउं लाउं लाऊ अलाऊ । अरण्यं । रण्णं अरण्णं । अत इत्येव । आरण्यकुञ्जर इव बल्गयन् । आरण्ण कुंजरो व्व वेल्लंतो ॥

वाऽव्ययोत्खातादावदातः ॥ १ ॥ ६७ ॥ अव्ययेषु उत्खातादिषु च शब्देषु आदेराकारस्य अद् वा भवति ॥ अव्यये । यथा । जह जहा । तथा । तह तहा । अथवा । अहव अहवा । व वा । ह हा इत्यादि । उत्खातादिषु । उत्खातम् । उक्खयं उक्खायं । चामरः । चमरो चामरो ।

कालकः। कलओ, कालओ। स्थापितः। ठविओ, ठाविओ। प्रतिस्थापितः। परिट्ठविओ, परिट्ठाविओ। संस्थापितः। संठविओ, संठाविओ। प्राकृतम्। पययं, पायय। तालवृन्तम्। तलविण्टं, तालविण्टं, तलवोण्टं, तालवोण्ट। हालिक.। हलिओ, हालिओ। नाराच.। नराओ, नाराओ। बलाका। बलया, बलाया। कुमारः। कुमरो, कुमारो। खादिरम्। खइरं, खाइरं इत्यादि। केचिद् ब्राह्मणपूर्वाह्णयोरपि इच्छन्ति। बम्हणो बाम्हणो। पुव्वण्हो पुव्वाण्हो। अत एव ज्ञापकात् ह्रस्वः संयोगे इति ह्रस्वोऽपि न भवति॥ दावाग्निः। दवग्गी दावग्गी। चाटुः। चडु चाडु। इति तु शब्दभेदात् सिद्धम्॥

घञ् वृद्धेर्वा॥ १॥ ६८॥ घञ् निमित्तो यो वृद्धिरूप आकारस्तस्यादिभूतस्य अद् वा भवति॥ प्रवाहः। पवहो पवाहो। प्रहारः। पहरो पहारो। प्रचारः प्रकारो वा। पयरो पयारो। प्रस्ताव.। पत्थवो पत्थावो। क्वचिन्न भवति। रागः। राओ॥

महाराष्ट्रे॥ १॥ ६९॥ महाराष्ट्रशब्दे आदेराकारस्य अद् भवति॥

महाराष्ट्रे हरोः॥ २॥ ११९॥ महाराष्ट्रशब्दे हरोर्व्यत्ययो भवति॥ मरहट्ठं मरहट्ठो॥

मांसादिष्वनुस्वारे॥ १॥ ७०॥ मांसादिषु अनुस्वारे सति आदे-रात अद् भवति॥ मांसम्। मंसं। पांसु। पंसू। पांसनः। पंसणो। कांस्यम्। कंसं। कांसिकः। कंसिओ। वांशिकः। वंसिओ। पांडवः पंडवो। सांसिद्धिकः। संसिद्धिओ। सांयात्रिकः। संयत्तिओ। इत्यादि। अनुस्वार इति किम्। मास। पासू।

श्यामाके मः॥ १॥ ७१॥ श्यामाके मस्य आत अद् भवति॥ श्यामाक.। शामाक इति स्थिते॥

शषोः सः ॥ १ ॥ २६० ॥ शकारषकारयोः सो भवति ॥ सामञ्ञे ॥ शब्द. । सद्दो । कुशः । कुसो । नृशंसः । निसंसो । वंशः । वंसो । श्यामा । सामा । शुद्धं । सुद्धं । दश । दस । शोभते । सोहइ । विशति । विसइ । (ष) षण्डः । सण्डो । निषधः । निसढो । कषायः । कसाओ । घोषयति । घोसइ । उभयोरपि । शेषः । सेसो । विशेषः । विसेसो ।

इः सदादौ वा ॥ १ ॥ ७२ ॥ सदादिशब्देषु आत इत्वं वा भवति । सदा । सइ सया । निशाकरः । निसिअरो । निसाअरो । कूर्पासः । कुप्पिसो कुप्पासो ॥

आचार्ये चोऽच्च ॥ १ ॥ ७३ ॥ आचार्यशब्दे चस्य आत इत्वं अत्वं च भवति ॥ आचार्यः । आइरिओ आयरिओ । स्याद् भव्यचैत्यचौर्यसमेत्यादिना इदागमः ॥

ईः स्त्यानखल्वाटे ॥ १ ॥ ७४ ॥ स्त्यानखल्वाटयोरादे - रात ईर्भवति ॥ खल्वाट. । खल्लीडो ॥

स्त्यानचतुर्थार्थे वा ॥ २ ॥ ३३ ॥ एषु संयुक्तस्य ठो वा भवति ॥ स्त्यानम् । ठीणं थीणं । चतुर्थः । चउट्ठो चउत्थो । अर्थं । अट्ठो प्रयोजनम् । अत्थो धनम् ॥

उः सास्नास्तावके ॥ १ ॥ ७५ ॥ अनयोरादेरात उत्वं भवति ॥ सास्ना ! सुण्हा । सूक्ष्मस्नश्नेत्यादिना स्नस्य ण्ह आदेशः ॥

स्तस्य थोऽसमस्तस्तम्बे ॥ २ ॥ ४५ ॥ समस्तस्तम्बवर्जिते स्तस्य थो भवति ॥ स्तावकः । थुवओ । हस्तः । हत्थो । स्तुति. । थुई । स्तोत्रम् । थोत्तं । स्तोकम् । थोअं । प्रस्तरः । पत्थरो । प्रशस्तः । पसत्थो । अस्ति । अत्थि । स्वस्ति । सत्थि । असमस्तस्तम्बे इति किं । समत्तो । तम्बो ॥

उद् वासरे ॥ १ ॥ ७६ ॥ आसारशब्दे आदेरात ऊद् वा भवति। आसारः। ऊसारो आसारो।

आर्यायां र्यः श्वश्र्वाम् ॥ १ ॥ ७७ ॥ आर्याशब्दे श्वश्र्वा वाच्यायां र्यस्य अत ऊर्भवति ॥ आर्या। अज्जू। द्यर्यय्येत्यादिना र्यस्य जः। श्वश्र्वामिति किम्। अज्जा ॥

एद् ग्राह्ये ॥ १ ॥ ७८ ॥ ग्राह्ये शब्दे आदेरात एद् भवति। ग्राह्यम्। गेज्झं ॥

द्वारे वा ॥ १ ॥ ७९ ॥ द्वारशब्दे आत एद् वा भवति। द्वारम्। देरं। पक्षे।

पद्मछद्मभूर्खद्वारे वा ॥ २ ॥ ११२ ॥ एषु संयुक्तस्यान्त्यव्यञ्जनात् पूर्वम् उदागमो वा भवति। दुआरं दारं वारं। पद्म। पउमं पोम्मं। छद्म। छउमं छम्मं। मूर्खः। मुरुक्खो। अत्र पूर्वं ह्रस्वः, तत उदागम। मुक्खो। कथं तर्हि 'नेरइओ नारइओ।' नैरयिक नारकिकशब्दयोर्भविष्यति। आर्षे अन्यत्रापि पश्चात्कर्म। पच्छेकम्मं। असहाय्यः। असहेज्ज देवासुरी।

पारापते रो वा ॥ १ ॥ ८० ॥ पारापतशब्दे रस्थस्य आत एत् वा भवति ॥ पारापतः। पारेवओ, पारावओ ॥

मात्रटि वा ॥ १ ॥ ८१ ॥ मात्रट् प्रत्यये आत एद् वा भवति ॥ एतावन्मात्रम्। एत्तिअमेत्तं एत्तिअमत्तं। वहुलाधिकारात् क्वचिन् मात्रशब्देऽपि भोजनमात्रम्। भोयणमेत्तं ॥

उदोद् वार्द्रे ॥ १ ॥ ८२ ॥ आर्द्रशब्दे आदेरात उद् ओच्च वा भवत। आर्द्रम्। उल्ल पक्षे अल्लं। इरिद्रादौ लः इति रस्य ल ॥ अद्दं। वाष्पसलिलप्रवाहेण आर्द्रयति। वाह सलिल पवहेण उल्लेइ ॥

ओद् आल्यां पंक्तौ ॥ १ ॥ ८३ ॥ आलीशब्दे पंक्तिवाचिनि आत ओत्वं भवति। आली। ओली। पंक्ताविति किम्। आली सखी ॥

ह्रस्वः संयोगे ॥ १ ॥ ८४ ॥ दीर्घस्य संयोगे परे यथा दर्शनं ह्रस्वो भवति ॥

ताम्राम्रे म्बः ॥ २ ॥ ५६ ॥ अनयोः संयुक्तस्य मयुक्तो बो भवति। आम्रं। 'अम्बं'। 'ताम्रं। तम्बं'। 'विरहाग्निः। विरहग्गी। आस्यं। अस्सं। "ईत्। 'मुनीन्द्रः। मुणिंदो। 'तीर्थं' तित्थं। ऊत्। 'गुरूल्लापः'। गुरुल्लावो। 'चूर्ण.'। चुण्णो। एत्। 'नरेन्द्रः'। नरिन्दो। 'म्लेच्छः'। मिलिच्छो। लाद् इत्यनेन लात् पूर्वम् इदागमः 'दृष्टैकस्तनपृष्ठ''। दिट्ठिक्कत्थणवट्ठं। ओत्। 'अधरोष्ठ.। अहरुट्ठं। नीलोत्पलं ॥नीलुप्पलं। संयोगे इति किम्। 'आयासं'। ईसरो'। ऊसवो।

इत एद्वा ॥ १ ॥ ८५ ॥ स्योग इति वर्त्तते। संयोगे पर आदेरिकारस्य एकारो वा भवति। पिण्डम्। पेण्डं पिण्ड। धम्मिल्लम्। धम्मेल्लं धम्मिल्लं। सिंदूरम्। सेन्दूरं सिन्दूरं। विष्णु। वेण्हू। विण्हू। पिष्टम्। पेट्ठं पिट्ठं। बिल्वम्। वेल्लं बिल्लं। क्वचिन्न भवति। चिन्ता।

किंशुके वा ॥ १ ॥ ८६ ॥ किंशुकशब्दे आदेरित एकारो वा भवति। किंशुकम्। केसुअं किंसुयं। मांसादेरिति वा अनुस्वार लोपः ॥

मिरायाम् ॥ १ ॥ ८७ ॥ मिराशब्दे इत एकारो भवति। मेरा ॥

पथि पृथिवी प्रतिश्रुन्मूषिक-हरिद्राबिभीतकेष्वत् ॥ १ ॥ ८८ ॥ एषु आदेरितो अकारो भवति। पथि। पहो ॥

निशीथपृथिव्योर्वा ॥ १ ॥ २१६ ॥ अनयो थस्य ढो वा भवति। निशीथ.। निसीढो निसीहो। पृथिवी। पुढवी पुहई। प्रतिश्रुत्। पडंसुआ। वक्रादावंतः इति अनुस्वारस्य आगमः। मूषिकः। मूसओ

हरिद्रा । हलद्दी हलद्दा । विभीतकः । वहेडओ । एत् पीयूष-केति ईकारस्य एकारः । पथं किर देसित्ते ति तु पथिशब्दसमानार्थस्य पन्थशब्दस्य भविष्यति । हरिद्रायां विकल्प इत्यन्ये । हलिद्दी हलिद्दा ।

शिथिलेंगुदे वा ॥ १ ॥ ८९ ॥ अनयोरादेरितो अत् वा भवति । शिथिलं, प्रशिथिलम् । सढिलं पसढिलं । सिढिलं पसिढिलं । इंगुदम् । अंगुअं इंगुअं । निर्मितशब्दे तु वा आत्वं न विधेयं निर्मातनिर्मितशब्दाभ्यामेव सिद्धेः ॥

तित्तिरौ रः ॥ १ ॥ ९० ॥ तित्तिरिशब्दे रस्येतो अद् भवति । तित्तिरिः । तित्तिरो ।

इतौ तौ वाक्यादौ ॥ १ ॥ ९१ ॥ वाक्यादिभूते इतिशब्दे यस्तस्तत्सम्बन्धिन इकारस्य अकारो भवति । इति कथितावसाने । इअ जंपियावसाणे । इति विकसित-कुसुमसर । इअ विअसिअ-कुसुमसरो । वाक्यादावितिकिम् । प्रियः इति । पियो त्ति । पुरुष. इति । पुरिसो त्ति ।

ईर्जिह्वा सिंह त्रिंशद् विंशतौ त्या ॥ १ ॥ ९२ ॥ जिह्वादिषु इकारस्य तिशब्देन सह ईर्भवति । जिह्वा । जीहा । सिंहः । सीहो । त्रिंशद् । तीसा । विंशतिः । वीसा । 'बहुलाधिकारात् क्वचिन्न भवति' सिंहदत्तो सिंहराओ ॥

लुंकि निरः ॥ १ ॥ ९३ ॥ निरुपसर्गस्य रेफलोपे सति इत ईकारो भवति । निः सरति । नीसरइ । निःश्वासः । नीसासो । लुंकीति किं । निर्णय. । निण्णओ । निस्सहानि अंगानि । निस्सहाइं अंगाइं ।

द्विन्योरुत् ॥ १ ॥ ९४ ॥ द्वि शब्दे नावुपसर्गे च इत उद् भवति (द्वि) द्विमात्रं । दुमत्तो । द्विजातिः । दुआई । द्विविधं । दुविहो । द्विरेफो । दुरेहो । द्विवचनं । दुवयणं । बहुलाधिकारात् क्वचित् विकल्पः । द्विगुणो । दुउणो विउणो । द्वितीयः दुइओ । विइओ । क्वचिन्न भवति ।

द्विज. । दिश्रो । द्विरद. । दिरश्रो । क्वचिद् श्रोत्वमपि । दोवयण (नि) निमज्जति णुमज्जइ । निमग्नो णुमग्गो । क्वचिन्न भवति । निपतति निवडइ ॥

प्रवासीक्षौ ॥ १ ॥ ९५ ॥ अनयोरादेरित उत्व भवति । प्रवासिकः पावासुश्रो । इक्षुः । उच्छू ॥

युधिष्ठिरे वा ॥ १ ॥ ९६ ॥ युधिष्ठिरशब्दे आदेरित उत्वं वा भवति । युधिष्ठिरः । जहुट्ठिलो । जहिट्ठिलो 'हरिद्रादौ ल' इति रस्य लत्वम् ॥

ओच्च द्विधा कृगः ॥ १ ॥ ९७ ॥ द्विधाशब्दे कृग्धातोः प्रयोगे इत ओत्वं चकाराद् उत्वं च भवति । द्विधा क्रियते । 'दोहा किज्जइ' दुहा किज्जइ । द्विधा कृतम् । दोहा इश्रं 'दुहा इश्र' । कृग इति किं । द्विधा गतम् । दिहा गयं । क्वचित् केवलस्यापि । द्विधापि स सुरवधूसार्थः । दुहावि सो सुरवहूसत्थो' ।

वा निर्झरे ना ॥ १ ॥ ९८ ॥ निर्झरशब्दे नकारेण सह इत ओकारो वा भवति । निर्झरः । श्रोज्झरो निज्झरो ॥

हरीतक्यामीतोऽत् ॥ १ ॥ ९९ ॥ हरीतकीशब्दे आदेरीकारस्य अद् भवति । हरीतकी । हरडई ॥

आत् कश्मीरे ॥ १ ॥ १०० ॥ कश्मीरशब्दे ईत आद् भवति । कश्मीराः । कम्हारा ॥

पानीयादिष्वित् ॥ १ ॥ १०१ ॥ पानीयादिषु शब्देषु ईत इद् भवति । पानीयम् । पाणिश्रं । अलीकम् । अलिश्रं । जीवति । जिश्रइ । जीवतु । जिश्रउ । व्रीडितम् । विलिश्रं । करीष । करिसो । शिरीषः । सिरिसो । द्वितीयम् । दुइश्रं । तृतीयम् । तइश्रं । गभीरम् । गहिरम् । उपनीतम् । उवणिश्रं । आनीतम् । आणिश्रं । प्रदीपितम् ।

पलिविअं । अवसीदतम् । ओसिअन्तं । प्रसीद । पसिअ । गृहीतम् । गहिअं । वाल्मीकः । वम्मिओ । तदानीम् । तयाणि । इति पानीयादय; । बहुलाधिकाराद् एषु क्वचिन्नित्यं क्वचिद् विकल्प । तेन पाणीअं अलीअं, जीअइ, करीसो, उवणीओ इत्यादि सिद्धम् ॥

उर्जीर्णे ॥ १ ॥ १०२ ॥ जीर्णशब्दे ईत उद् भवति । जीर्णे सुरा । जुण्णसुरा । क्वचिन्न भवति । जीर्णभोजनमात्रे । जिण्णे भोअणमत्ते ॥

ऊर्हीनविहीने वा ॥ १ ॥ १०३ ॥ अनयोरीत ऊत्वं वा भवति । हीनः । हूणो हीणो । विहीनः । विहूणो विहीणो । विहीन इति किं । पहीणजरमरणा ॥

तीर्थे हे ॥ १ ॥ १०४ ॥ तीर्थशब्दे हकारादेशे सति ईत ऊत्वं भवति । तीर्थम् । तूहं । ह इति किं, तित्थं ॥

एत् पीयूषापीड-विभीतककीदृशेदृशे ॥ १ ॥ १०५ ॥ एषु ईत एत्त्वं भवति । पीयूषम् । पेऊसं ॥

नीपापीडे मो वा ॥ १ ॥ २३४ ॥ अनयोः पस्य मो वा भवति । नीपः । नीमो नीवो । आपीडः । आमेळो आवेडो । बिभीतकः । बहेडओ । पथिपृथिवीत्यादिना इकारस्य अत्वम् । कीदृशः । केरिसो । ईदृशः । एरिसो ॥

नीडपीठे वा ॥ १ ॥ १०६ ॥ अनयोरीत एत्वं वा भवति । नीडम् । नेडं नीडं । पीठम् । पेढं पीढं ॥

उतो मुकुलादिष्वत् ॥ १ ॥ १०७ ॥ मुकुलादिषु शब्देषु आदेरुतोऽत्त्वं भवति । मुकुलं । मउलं । मउलो । मुकुरं । मउरं । मुकुटं । मउडं । अगुरुं । अगरुं । गुर्वी । गरुई । युधिष्ठिरः । जहुट्ठिलो । सौकु-

मार्यम् । सोअमल्ल । गुडूची । गलोई । इति मुकुलादयः । क्वचिदा-कारोऽपि । विद्रुत. । विद्दाओ ।।

वोपरौ ॥ १ ॥ १०८ ॥ उपरौ उतोऽद् वा भवति । उपरि । अवरिं उवरिं ॥

गुरौ के वा ॥ १ ॥ १०९ ॥ गुरौ स्वार्थे के 'सति' आदेरुतोऽद् वा भवति । गुरुकः । गरुओ गुरुओ । क इति किं, गुरू ॥

इर्भ्रुकुटौ ॥ १ ॥ ११० ॥ भ्रुकुटौ आदे-रुत इर्भवति । भ्रुकुटि. । भिउडी ॥

बाहोरात् ॥ १ ॥ ३६ ॥ बाहुशब्दस्य स्त्रियाम् आकारोऽन्त्यादेशो भवति । बाहुना येन धृतः एकेन । बाहाए जेण धरिओ एक्काए । स्त्रिया-मिति किं । वामेतरो बाहु. । वामेअरो बाहू ।

पुरुषे रोः ॥ १ ॥ १११ ॥ पुरुषशब्दे रोरुत इर्भवति । पुरुष. । पुरिसो । पौरुष । पउरिसं ।

ईः क्षुते ॥ १ ॥ ११२ ॥ क्षुतशब्दे आदेरुत ईत्वं भवति । क्षुतम् । छीअं ।

ऊत् सुभगमुसले वा ।। १ ॥ ११३ ॥ अनयोरादेरुत ऊद् वा भवति ।

ऊत्वे दुर्भग-सुभगे वः ॥ १ ॥ १९२ ॥ अनयोरूत्वे सति गस्य वो भवति । दुर्भग । दूहवो । सुभगः । सूहवो । ऊत्व इति किं । सुहओ । मुसलम् । मूसलं मुसलं ॥

अनुत्साहोत्सन्ने त्सच्छे ॥ १ ॥ ११४ ॥ उत्साहोत्सन्नवर्जिते शब्दे यौ त्सच्छौ तयोः परयोरादेरुत ऊद् भवति । (त्स) । उत्सुकः । ऊसुओ । उत्सवः । ऊसओ उत्सिक्त. । ऊसित्तो' । उत्सरति । ऊसरइ

(च्छ) । उद्गताः शुका यस्मात् सः उच्छुकः । ऊसुओ । उच्छ्वसति । ऊससइ । अनुत्साहोत्सन्ने इति किम्, । उच्छाहो । उच्छन्नो ॥

लुकि दुरो वा ॥ १ ॥ ११५ ॥ दुरुपसर्गस्य रेफस्य लोपे सति उत ऊत्वं वा भवति । दुःसहः । दूसहो दुसहो । 'ऊत्वे दुर्भगसुभगे व' इति गस्य वो । दूहवो दुहओ । लुकि इति किम्, दुस्सहो विरहो ॥

ओत् संयोगे ॥ १ ॥ ११६ ॥ संयोगे परे आदेरुत ओद् भवति । तुण्डं । तोण्डं । मुण्डं । मोण्डं । पुष्करं । पोक्खरं । कुट्टिमं । कोट्टिमं । पुस्तकः । पोत्थओ । लुब्धकः । लोद्धओ । मुस्ता । मोत्था । मुद्गरः । मोग्गरो । पुद्गलं । पोग्गलं । कुष्ठ. । कोण्ढो । कुन्तः । कोन्तो । व्युत्क्रांत । वोक्कंतं ॥

कुतूहले वा ह्रस्वश्च ॥ १ ॥ ११७ ॥ कुतूहलशब्दे उत ओद् वा भवति तत्संनियोगे ह्रस्वश्च वा । कुतूहलम् । कोऊहल्लं कोउहल्लं कुऊहलं ॥

अदूतः सूक्ष्मे वा ॥ १ ॥ ११८ ॥ सूक्ष्मशब्दे ऊतोऽद् वा भवति । सूक्ष्मम् । सण्हं सुण्हं । आर्षे सुहुमं ॥

दुकूले वा लश्च द्विः ॥ १ ॥ ११६ ॥ दुकूलशब्दे ऊकारस्य अत् वा भवति, तत्सन्नियोगे च लकारो द्विर्भवति । दुकूलम् । दुअल्लं दुऊलं । आर्षे दुगुल्लं ।

ईर्वोद्व्यूढे ॥ १ ॥ १२० ॥ उद्व्यूढशब्दे ऊत ईत्वं वा भवति । उद्व्यूढम् । उव्वीढं उव्वूढं ॥

उभ्रू-हनूमत्कण्डूयवातूले ॥ १ ॥ १२१ ॥ एषु ऊत उत्वं भवति । भ्रूमया । भुमया । हनूमन् । हणुमंतो । कण्डूयति । कण्डुअइ । वातूलः । वाउलो ॥

मधूके वा ॥ १ ॥ १२२ ॥ मधूकशब्दे ऊत उद् वा भवति । मधूकम् । महुअं । महूअं ॥

इदेतौ नूपुरे वा ॥ १ ॥ १२३ ॥ नूपुरशब्दे ऊत इत एत् च वा भवतः । नूपुरम् । निउरं । नेउरं । पक्षे । नूउरं ।

ओत् कूष्माण्डी-तूणीर-कूर्पर-स्थूल-ताम्बूल-गुडूची-मूल्ये ॥ १ ॥ १२४ ॥ एषु ऊत ओद् भवति ॥

कूष्माण्ड्यां ष्मो लस्तु ण्डो वा ॥ २ ॥ ७३ ॥ कूष्माण्ड्यां ष्मा इत्येतस्य हो भवति, ण्ड इत्यस्य तु वा लो भवति । कूष्माण्डी । कोहली । कोहण्डी । तूणीरम् । तोणीरं । कूर्परं । कोप्परं ॥

स्थूले लो रः ॥ १ ॥ २५५ ॥ स्थूले लस्य रो भवति । स्थूलम् । थोरं, कथं थूलभद्दो । स्थूरस्य हरिद्रादिलत्वे भविष्यति । ताम्बूलम् । तम्बोलं । गुडूची । गलोई । मूल्यम् । मोल्लं ।

स्थूणा-तूणे वा ॥ १ ॥ १२५ ॥ अनयोरूत ओत्त्वं वा भवति । स्थूणा । थोणा । थूणा । तूणम् । तोणं । तूणं ॥

ऋतोऽत् ॥ १ ॥ १२६ ॥ आदेर्ऋकारस्य अत् भवति । घृतं । घयं । तृणं । तणं । कृतं । कयं । वृषभ. । वसहो । मृगः । मओ । घृष्टः । घट्ठो । द्विधा कृतिमिति कृपादिषु पाठात् । दुहाइअं ॥

आत् कृशामृदुकमृदुत्वे वा ॥ १ ॥ १२७ ॥ एषु आदेर्ऋत आद् वा भवति । कृशा । कासा । किसा । मृदुकम् । माउक्कं । सेवादौ वा, इति कस्य द्वित्वम् । मउअं । मृदुत्वम् । माउक्कं । मउत्तणं ॥

इत् कृपादौ ॥ १ ॥ १२८ ॥ कृपादिषु शब्देषु आदेर्ऋत इत्त्वं भवति । कृपा । किवा । हृदयं । हियय । मृष्टम् । मिट्ठं रसे एव' । अन्यत्र मट्ठ । दृष्टम् । दिट्ठं । दृष्टिः । दिट्ठी । सृष्टम् । सिट्ठं । सृष्टिः ।

सिट्ठी। गृष्टिः। गिठी। वक्रादावन्त इति अनुस्वारागम.। पृथ्वी। पिच्छी। भृगुः। भिऊ। भृङ्गः। भिंगो। भृङ्गारः। भिंगारो। शृङ्गारः। सिंगारो। शृगालः। सिआलो। घृणा। घिणा। घुसृणम्। घुसिण। वृद्ध कविः। विद्ध कई। समृद्धि.। समिद्धी। ऋद्धि। इद्धी। गृद्धिः। गिद्धी। कृशः। किसो। कृशानुः। किसाणू। कृसरा। किसरा। कृच्छ्रम्। किच्छं। तृप्तम्। तिप्पं। कृपित। किसिओ। नृप.। निवो। कृत्या। किच्चा। कृतिः। किई। धृतिः। धिई। कृपः। किवो। कृपणः। किविणो। कृपाणम्। किवाणं। वृश्चिकः। विञ्चुओ। वृत्तम्। वित्तं। वृत्ति.। वित्ती। हृतम्। हिअं। व्याहृतम्। वाहित्तं। बृंहितः। विंहिओ। बृसी। बिसी। ऋषिः। इसी। वितृष्णः। विइण्हो। स्पृहा। छिहा। सकृत्। सइ। उत्कृष्टम्। उक्किट्ठं। नृशंसः। निसंसो। इति कृपादय। क्वचिन्न भवति रिद्धी।

पृष्ठे वानुत्तरपदे ॥ १ ॥ १२९। पृष्ठशब्देऽनुत्तरपदे ऋत इद् वा भवति। पृष्ठि.। पिट्ठी। पट्ठी। पृष्ठपरिस्थापितम्। पिट्ठि-परिट्ठविअं। अनुत्तरपदे इति किं। महीपृष्टम्। महिवट्ठं॥

मसृण-मृगाङ्क-मृत्यु-शृङ्ग-धृष्टे वा ॥ १ ॥ १३० ॥ एषु ऋत इद् वा भवति। मसृणम्। मसिणं। मसणं। मृगाङ्कः। मिअङ्को। मयङ्को। मृत्युः। मिच्चू। मच्चू। शृङ्गम्। सिङ्गं। सङ्गं। धृष्ट.। धिट्ठो। धट्ठो।

उद् ऋत्वादौ ॥ १ ॥ १३१ ॥ ऋतु इत्यादिषु शब्देषु आदे ऋत उद् भवति। ऋतुः। उऊ। परामृष्टः। परामुट्ठो। स्पृष्टः। पुट्ठो। प्रवृष्ट.। पवुट्ठो। पृथिवी। पुहवी। प्रवृत्ति.। पउत्ती। प्रावृष्। पाउसो। प्रावृतः। पाउओ। भृतिः। भुई। प्रभृति। पहुडी। प्राभृतम्। पाहुडं। परभृतः। परहुओ। निभृतम्। निहुअं। निवृतम्। निउअं। विवृतम्। विउअं। संवृतम्। संवुअं। वृत्तान्तः। वुत्तन्तो। निर्वृतम्। निव्वुअं। निर्वृतिः। निव्वुई। वृन्दं। वुन्दं। वृन्दावनः। वुन्दावणो। वृद्धः।

वुड्ढो। दग्ध विदग्ध वृद्धि वृद्धे ढः। इति द्धस्य ढः। वृद्धिः। वुड्ढी। ऋषभः। उसहो। मृणालम्। मुणालं। ऋजुः। उज्जू। जामातृकः। जामाउओ। मातृकः। माउओ। मातृका। माउआ। भ्रातृकः। भाउओ। पितृकः। पिउओ। पृथ्वी। पुहुवी। इति ऋत्वादयः।

निवृत्तवृन्दारके वा ॥ १ ॥ १३२ ॥ अनयोऋत उद् वा भवति। निवृत्तम्। निवुत्तं निअत्त। वृन्दारकाः। वुन्दारया। वन्दारया।

वृषभे वा* वा ॥ १ ॥ १३३ ॥ वृषभे ऋतो वेन सह उद् वा भवति। वृषभ। उसहो। वसहो॥ *तृतीयान्तपदम्

गौणान्त्यस्य ॥ १ ॥ १३४ ॥ गौणशब्दस्य योऽन्त्य ऋत् तस्य उद् भवति। मातृमण्डलम्। माउमंडलं। मातृगृहम्। माउहरं। पितृगृहम्। पिउहरं। गृहस्य घरपतौ। इति गृहस्य घरादेशः। मातृस्वासा। माउसिआ। पितृस्वसा। पिउसिआ। पितृवनम्। पिउवणं। पितृपतिः। पिउवई॥

मातुरिद् वा ॥ १ ॥ १३५ ॥ मातृशब्दस्य गौणस्य ऋत इद् वा भवति। मातृ गृहम्। माइहर। माउहरं। क्वचिद्गौणस्यापि माईणं॥

उदूदोत् मृषि ॥ १ ॥ १३६ ॥ मृषाशब्दे ऋत उत् ऊत् ओच्च भवन्ति। मृषा। मुसा। मूसा। मोसा। मृषावादः। मुसावाओ। मूसावाओ। मोसावाओ॥

इदुतौ वृष्ट-वृष्टि-पृथङ्-मृदङ्ग-नप्तृके ॥ १ ॥ १३७ ॥ एषु ऋत इकारोकारौ भवतः। वृष्टः। विट्ठो। वुट्ठो। वृष्टिः। विट्ठी। वुट्ठी। पृथक्। पिहं। पुहं। मृदङ्गः। मिइंगो। इः स्वप्नादौ। इति दस्य इः। मुइंगो। नप्तृक। नत्तिओ। नत्तुओ॥

वा बृहस्पतौ ॥ १ ॥ १३८ ॥ बृहस्पतिशब्दे ऋत इदुतौ वा भवतः॥

ष्पस्पयोः फः ॥ २ ॥ ५३ ॥ ष्पस्पयोः फो भवति। बृह-

स्पतिः। बिहप्फई। बुहप्फई। वहप्फई। पुष्पं। पुप्फं। शष्पं। सप्फं। निष्पेषः। निप्फेसो। निष्पापः। निप्फावो। स्पन्दनं। फन्दणं। प्रति-स्पर्द्धिन्। पाडिप्फद्धी। बहुलाधिकारात् क्वचिद् विकल्पः। बुहप्फई। बुहप्पई। क्वचिन्न भवति निष्प्रभः। निप्पहो। निष्पुंसनम्। णिप्पुंसणं। परस्परम्। परोप्परं।

इदेदोद् वृन्ते ॥ १ ॥ १३९ ॥ वृन्तशब्दे ऋत इत् एत् ओत च भवन्ति।

वृन्ते ण्टः ॥ २ ॥ ३१ ॥ वृन्ते मयुक्तस्य ण्टो भवति। वृन्तम्। विण्टं। वेण्टं। वोण्टं। तालवृन्तम्। तालवेण्ट ॥

रिः केवलस्य ॥ १ ॥ १४० ॥ केवलस्य व्यञ्जनेन असंयुक्तस्य ऋत रिरादेशो भवति। ऋद्धिः। रिद्धी। ऋक्षः। रिच्छो ॥

ऋणर्ज्वृषभर्त्वृषौ वा ॥ १ ॥ १४१ ॥ ऋण ऋजु ऋषभ ऋतु ऋषिषु ऋतो रिर्वा भवति। ऋणम्। रिणं। अणं। ऋजुः। रिज्जू। उज्जू। ऋषभः। रिसहो। उसहो। ऋतु। रिऊ। उऊ। ऋषिः। रिसी। इसी ॥

दृशेः क्विप्टक्सकः ॥ १ ॥ १४२ ॥ क्विप् टक् सक् इत्येतदन्तस्य दृशेर्धातोर्ऋतो रिरादेशो भवति। सदृग् वर्णः। सरिवण्णो। सदृग्रूपः। सरिरूवो। सदृग्बन्दीनाम्। सरिबन्दीणं। सदृशः। सरिसो सदृक्षः। सरिच्छो। एवं एतादृशः। एवं एआरिसो। भवादृशः। भवारिसो। यादृशः। जारिसो। तादृशः। तारिसो। कीदृश। केरिसो। ईदृशः। एरिसो। अन्यादृशः। अन्नारिसो। अस्मादृश। अम्हारिसो। युष्मादृशः। तुम्हारिसो। टक् सक् साहचर्यात् त्यदाद्यन्यादिसूत्रविहितः। क्विबिह गृह्यते ॥

आदृते ढिः ॥ १ ॥ १४३ ॥ आदृतशब्दे ऋतो ढिरादेशो भवति। आदृतः। आढिओ ॥

अरिर्दृप्ते ॥ १ ॥ १४४ ॥ दृप्तशब्दे ऋतोऽरिरादेशो भवति। दृप्तः। दरिओ। दृप्तसिंहेन। दरिअसीहेण ॥

लृत इलिः क्लृप्त-क्लृन्ने ॥ १ ॥ १४५ ॥ अनयोर्लृत इलिरादेशो भवति। क्लृप्तकुसुमोपचारेषु। किलित्त-कुसुमोवयारेसु। धाराक्लृन्नपात्रम्। धाराकिलिन्नवत्तं ॥

एत इद् वा वेदना-चपेटा-देवर-केसरे ॥ १ ॥ १४६ ॥ वेदनादिषु एत इत्त्वं वा भवति। वेदना। विअणा। वेअणा। चपेटा। चविडा। चवेडा। विकटचपेटाविनोदा। विअडचवेडाविणोआ। देवर। दिअरो। देवरो। महा-महितदशनकेसरम्। मह-महिय दसणकिसरं। केसरं। महिला। महेला। इति तु महिला-महेलाशब्दाभ्यां सिद्धम् ॥

ऊः स्तेने वा ॥ १ ॥ १४७ ॥ स्तेने एत ऊद् वा भवति। स्तेनः। थूणो। थेणो ॥

ऐत एत् ॥ १ ॥ १४८ ॥ आदौ वर्तमानस्य ऐकारस्य एत्त्वं भवति। शैला। सेला। सैन्यं। सेन्नं। त्रैलोक्यं। तेलोक्कं। ऐरावणः। एरावणो। कैलाश। केलासो। वैद्य। वेज्जो। कैटभ। केढवो। वैधव्य। वेहव्वं ॥

इत् सैन्धवशनैश्चरे ॥ १ ॥ १४९ ॥ एतयोरैत इत्त्वं भवति। सैन्धवं। सिंधवं। शनैश्चर। सणिच्छरो ॥

सैन्ये वा ॥ १ ॥ १५० ॥ सैन्यशब्दे ऐत इद् वा भवति। सैन्यम्। सिन्नं। सेन्नं।

अइर्दैत्यादौ च ॥ १ ॥ १५१ ॥ सैन्यशब्दे दैत्यादिषु च ऐतो अइ इत्यादेशो भवति। एत्त्वापवादः। सैन्यम्। सइन्नं। दैत्यः। दइच्चो। दैन्यम्। दइन्नं। ऐश्वर्यम्। अइसरिअं। भैरव। भइरवो।

वैजवनः । वइजवणो । दैवतं । दइवयं । वैतालीयं । वइआलीअं । वैदेशः । वइएसो । वैदेहः । वइएहो । वैदर्भः । वइदब्भो । वैश्वानरः । वइस्साणरो । कैतवं । कइअवं । वैशाखः । वइसाहो । वैशालः । वइसालो । स्वैरम् । सइरं । चैत्यं । चइत्तं इत्यादि । विश्लेषे न भवति । चैत्यं । चेइअं । आर्षे । (चैत्यवन्दनम्) । चीवन्दणं ॥

वैरादौ वा ॥ १ ॥ १५२ ॥ वैरादिषु ऐत अइरादेशो वा भवति । वैरं । वइरं । वेरं । कैलाशः । कइलासो । केलासो । कैरवम् । कइरवं । केरवं । वैश्रमणः । वइसवणो । वेसवणो । वैशम्पायनः । वइसंपायणो । वेसंपायणो । वैतालिकः । वइ आलिओ । वेआलिओ । वैशिक । वइसिअं । वेसिअं । चैत्रः । चइत्तो । चेत्तो । इत्यादि ।

एच्च दैवे ॥ १ ॥ १५३ ॥ दैवशब्दे ऐत एत् अइश्च आदेशो भवति । दैवम् । देव्वं । दइव्वं । दइवं ॥

उच्चैर्नीचै-स्यअः ॥ १ ॥ १५४ ॥ अनयोरैत अअ इत्यादेशो भवति । उच्चैः । उच्चअं । नीचैः । नीचअं । उच्चनीचाभ्यां के सिद्धं । उच्चैर्नीचैसोस्तु रूपान्तरनिवृत्त्यर्थं वचनम् ॥

ईद् धैर्ये ॥ १ ॥ १५५ ॥ धैर्यशब्दे ऐत ईद् भवति । धैर्यं हरति विषादः । धीरं हरइ विसाओ ।

ओतोऽद् वाऽन्योन्यप्रकोष्ठातोद्य-शिरोवेदना-मनोहर-सरोरुहे क्तोश्च वः ॥ १ ॥ १५६ ॥ एषु ओतो ऽत्वं वा भवति, तत्संनियोगे । च यथासम्भवं ककारतकारयो-र्वादेशो भवति । अन्योन्यम् । अन्नन्नं । अन्नुन्नं । प्रकोष्ठः । पवट्ठो । पउट्ठो । आतोद्यं । आवज्जं । आउज्जं । शिरोवेदना । सिर विअणा । सिरो विअणा । मनोहरम् । मणहरं । मणोहरं । सरोरुहम् । सररुहं । सरोरुहं ॥

ऊत् सोच्छ्वासे ॥ १ ॥ १५७ ॥ सोच्छ्वासशब्दे ओत ऊद् भवति । सोच्छ्वासः । सूसासो ॥

गव्यउ-आअः ॥ १ ॥ १५८ ॥ गोशब्दे ओत अउ आअ इत्यादेशौ भवतः। गवयः। गउओ। गउआ। गाओ। हरस्य एषा गौः। हरस्स एसा गाई ॥

औत ओत् ॥ १ ॥ १५९ ॥ औकारस्यादेरोद् भवति। कौमुदी। कोमुई। यौवनं। जोव्वणं। कौस्तुभः। कोत्थुहो। कौशाम्बी। कोसंबी। क्रौञ्चः। कोंचो। कौशिकः। कोसिओ ॥

उत् सौन्दर्यादौ ॥ १ ॥ १६० ॥ सौन्दर्यादौ औत उद् भवति। सौन्दर्यम्। सुन्देरं। सुन्दरिअं। मौञ्जायनः। मुंजायणो। शौण्डः। सुण्डो। शौद्धोदनिः। सुद्धोअणी। दौवारिकः। दुवारिओ। सौगन्ध्यम्। सुगंधत्तणं। त्वस्योपलक्षणत्वात्। 'त्वस्य डिमोत्तणौ वा' इति यस्यापि त्तणः। पौलोमी। पुलोमी। सौवर्णिकः। सुवण्णिओ ॥

कौक्षेयके वा ॥ १ ॥ १६१ ॥ कौक्षेयकशब्दे औत उद् वा भवति। कौक्षेयकम्। कुच्छेअयं ॥

अउः पौरादौ च ॥ १ ॥ १६२ ॥ कौक्षेयके पौरादिषु च औत अउरादेशो भवति। कौक्षेयकम्। कउच्छेअयं। पौरः। पउरो। पौरजनः। पउरजणो। कौरवः। कउरवो। कौशलं। कउसलं। पौरुषं। पउरिसं। सौधं। सउहं। गौडः। गउडो। मौलिः। मउली। मौनं। मउणं। सौराः। सउरा। कौलाः। कउला ॥

आच्च गौरवे ॥ १ ॥ १६३ ॥ गौरवशब्दे औत आत्त्वम् अउश्च भवति। गौरवं। गारवं। गउरवं ॥

नाव्यावः ॥ १ ॥ १६४ ॥ नौशब्दे औत आवादेशो भवति। नौः। नावा।

एत् त्रयोदशादौ स्वरस्य सस्वरव्यञ्जनेन ॥ १ ॥ १६५ ॥ त्रयोदश इत्येवं प्रकारेषु संख्याशब्देषु आदेः स्वरस्य परेण स स्वरव्यञ्जनेन-

सह एत् भवति । त्रयोदश । तेरह । संख्या-गद्गदे रः इति दस्य रः। दशपाषाणयोर्ह इति शस्य हः । त्रयोविंशतिः । तेवीसा । त्रयस्त्रिंशत्। तेतीसा ॥

स्थविरविचकिलायस्कारे ॥ १ ॥ १६६ ॥ एषु आदेः स्वरस्य परेण सस्वर-व्यञ्जनेन सह एत् भवति । स्थविरः । थेरो । विचकिलम् । वेइल्लं । मुग्धविचकिलप्रसून-पुञ्जा । मुद्ध-विअइल्ल-पसूण पुंजा । इत्यपि दृश्यते । अयस्कारः । एक्कारो ॥

वा कदले ॥ १ ॥ १६७ ॥ कदलशब्दे आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह एद् वा भवति । कदलम् । केलं । कयलं । कदली । केली । कयली ॥

वेतः कर्णिकारे ॥ १ ॥ १६८ ॥ कर्णिकारे इतः परेण सस्वर-व्यञ्जनेन सह एद् वा भवति । कर्णिकारः । कण्णेरो । कण्णिआरो ॥

अयौ वैत् ॥ १ ॥ १६९ ॥ अयिशब्दे आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह ऐत् वा भवति । अयि बिभेमि । ऐ बीहेमि । अयि उन्मत्तिके । अइ उम्मत्तिए । वचनाद् ऐकारस्यापि प्राकृते प्रयोगः ॥

ओत् पूतर-बदर-नवमालिका-नवफलिका-पूग-फले ॥ १ ॥ १७० ॥ पूतरादिषु आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह ओत् भवति । पूतरः । पोरो । बदरम् । बोरं । बदरी । बोरी । नवमालिका । नोमालिआ । नवफलिका । नोहलिआ । पूगफलम् । पोप्फलं । पूगफली । पोप्फली ॥

वा मयूख-लवण-चतुर्गुण-चतुर्थ-चतुर्दश-चतुर्वार-सुकुमार-कुतूहलोदूखलोलूखले ॥ १ ॥ १७१ ॥ मयूखादिषु आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह ओद् वा भवति। मयूखः। मोहो। मऊहो। लवणम्। लोणं। लवणं । इनिलवणोद्गमाः । इअ लवणुग्गमा । चतुर्गुणः । चउग्गुणो ।

चतुर्थः। चोत्थो। चउत्थो। चतुर्थी। चोत्थी। चउत्थी। चतुर्दशः। चोद्दहो। चउद्दहो। चतुर्दशी। चोद्दसी। चउद्दसी। चतुर्वारः। चोव्वारो। चउव्वारो। सुकुमारः। सोमालो। सुकुमालो। कुतूहलम्। कोहल्लं। कोउहल्लं। तथा मन्ये कुतूहलेन। तह मन्ने कोहलीए। उदूखलः। ओहलो। उऊहलो। उलूखलम्। ओक्खलं। उलूहलं। मोरो। मऊरो। इति तु मोर मयूर शब्दाभ्यां सिद्धम्॥

अवापोते च॥ १॥ १७२॥ अवापयो-रुपसर्गयोरुत इति विकल्पार्थ निपाते च आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह ओद् वा भवति। (अव)। अवतरति। ओअरइ। अवयरइ। अवकाशः। ओआसो। अवयासो। (अप)। अपसरति। ओसरइ। अवसरइ। अपसारितं। ओसारिअं। अवसारिअं (उत) उतवनम्। ओवणं। उअवणं। उतघन। ओघणो। उअघणो। क्वचिन्न भवति। अवगतम्। अवगयं। अपशब्द.। अवसद्दो। उतरविः। उअरवी॥

ऊच् चोपे॥ १॥ १७३॥ उपशब्दे आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह ऊत् ओत् चादेशौ वा भवतः। उपहसितम्। ऊहसिअं। ओहसिअं। उवहसिअं। उपाध्यायः। ऊज्झाओ। ओज्झाओ। उवज्झाओ। उपवासः। ऊआसो। ओआसो। उववासो।

उमो निषण्णे॥ १॥ १७४॥ निषण्णशब्दे आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह उम आदेशो वा भवति। निषण्णः। णुमण्णो। णिसण्णो॥

प्रावरणे अङ्ग्वाऊ॥ १॥ १७५॥ प्रावरणशब्दे आदेः स्वरस्य परेण सस्वरव्यञ्जनेन सह अङ्गु आउ इत्यादेशौ वा भवतः। प्रावरणम्। पंगुरणं। पाउरणं। पावरणं॥

निष्प्रती ओत्परी माल्यस्थोर्वा॥ १॥ ३८॥ निरप्रति

इत्येतौ माल्यशब्दे स्थाधातौ च परे यथासंख्यम् ओत्परि इत्येवं रूपौ वा भवत. । अभेदनिर्देशः सर्वादेशार्थः । निर्माल्यम् । ओमालं । निम्मल्लं । निर्माल्यकं वहति । ओमालयं वहइ । प्रतिष्ठा । परिट्ठा । पइट्ठा । प्रतिष्ठितम् । परिट्ठियं । पइट्ठिअं ॥

दीर्घह्रस्वौ मिथो वृत्तौ ॥ १ ॥ ४ ॥ वृत्तौ समासे स्वराणां दीर्घह्रस्वौ बहुलं भवतः । मिथः परस्पर तत्र ह्रस्वस्य दीर्घ. । अन्तर्वेदि । अंतावेई । सप्तविंशतिः । सत्तावीसा । क्वचिन्न भवति । युवति जनः । जुवइजणो । क्वचिद् विकल्पः । वारि-मतिः । वारीमई । वारिमई । भुज यन्त्रम् । भुजयन्तं । भुआयतं । भुअयन्तं । प्रतिगृहम् । पई-हरं । पइहरं । वेणु-वनम् । वेलूवणं । वेलुवणं । वेणौ णो वा, इति णस्य लः । दीर्घस्य । ह्रस्वः । नितम्ब शिलास्खलित वीचि मालस्य ! निअंबसिल खलिअ वीइ मालस्स । क्वचिद् विकल्पः । यमुनातटं । जउंणअडं । जउंणा अडं । नदी-स्रोतम् । नइ सोत्तं । नई सोत्तं । गौरी-गृहम् । गोरि हरं । गोरी हरं । वधू-मुखम् । बहुमुहं । वहूमुहं । इति स्वरसन्धिप्रकरणम् ।

अथ प्रकृतिभावः ।

पदयोः सन्धिर्वा ॥ १ ॥ ५ ॥ संस्कृतोक्तः सन्धिः सर्वः प्राकृते पदयोर्व्यवस्थितविभाषया भवति । व्यासऋषि. । वासइसी । वासेसी । विषमातपः । विसमायवो । विसमआयवो । दधीश्वरः । दहिईसरो । दहीसरो । स्वादूदकं । साउउअयं । साऊअयं । पदयोरिति किं । पादः । पाओ । पतिः । पई । वृक्षात् । वच्छाओ । मुग्धया । मुद्धाइ । मुद्धाए । कांक्षति । महइ । महए । बहुलाधिकारात् क्वचिद् एक पदेऽपि, करिष्यति । काहिइ । काही । द्वितीयः । विइओ । वीओ ॥

न युवर्णस्याऽस्वे ॥ १ ॥ ६ ॥ इवर्णस्य उवर्णस्य चास्वे व

परे सन्धिर्न भवति। न वैरिवर्गेऽपि अवकाशः। न वेरिवग्गे वि[1] अवआसो। वन्दामि आर्यवैर। वंदामि अज्जवइरं॥

दणु[2] इंदरुहिरलित्तो सहइ उइंदो नहप्पहावलि अरुणो
संज्झावहु अवऊढो नववारिहरोव्व विज्जुलापडिभिन्नो॥

युवर्णस्येति किं। गूढो[3]-अरतामरसानुसारिणी भमरपंतिव्व। अस्व इति किं। पृथिवीशः। पुहवीसो॥

एदोतोः स्वरे॥ १॥ ७॥ एकारौकारयोः स्वरे परे सन्धिर्न भवति।

वहुआए नहुल्लिहणे[4] आबंधंतीइ कंचुअं अंगे।
मयरद्धअसरधोरणि धाराच्छेअव्व दीसन्ति॥ १॥
उवमासु[5] अपज्जत्तेभकलभदंता-वहासमूरु जुअं।
तं चेअ मलिअविसदंड विरसं आलक्खिमो एण्हिं॥ २॥
अहो आश्चर्यम्। अहो अच्छरिअं। एदोतोरिति किं॥
अत्थालोअणतरला[6] इयरकईण भमंति बुद्धीओ।
अत्थ च्चिअ निरारंभमिंति हिअय कइंदाणं।

---

१ अत्र वि इत्यस्य अवकाशे परत. सन्धिर्न जातः। २ दनुजेन्द्ररुधिर-लिप्तः शोभते उपेन्द्र. नखप्रभावल्यरुणः। संध्यावध्ववगूढो नववारिधर इव विद्युत्प्रभाभिन्न॥ अत्र दणु इत्यादीनां सन्धिर्न जातः। ३ गूढोदरतामरसानु-सारिणी भ्रमरपङ्क्तिरिव॥ अत्र गूढ उदर इत्यादिषु सन्धिर्भवत्येव। प्रा० व्या० ३

४ वधूकाया नखोल्लेखने आबध्नन्त्याः कन्चुकमङ्गे॥
मकरध्वजशरघोरणि धाराच्छेदा इव दृश्यन्ते॥

अत्र नखोल्लेखने इति एकारस्य आबध्नन्त्या इति परे सन्धिर्न भवति।

५ उपमासु अपर्याप्तेभकलभदन्तापहासं उरुयुग्मं, तदेव मर्दितविसदण्ड-विरसम् आलक्ष्याम इदानीम्॥ अत्र मो इति ओकारस्य सन्धिर्न भवति॥ ६ अर्थालोचनतरला इतरकवीना भ्रमन्ति बुद्धयः। अत्र किल निरारम्भा यन्ति हृदये कवीन्द्राणाम्॥ अत्र कवि इन्द्र इत्यत्र सन्धिर्भवत्येव।

स्वरस्योद्वृत्ते ॥ १ ॥ ८ ॥ व्यञ्जनसंपृक्तः स्वरो व्यञ्जने लुप्ते योऽवशिष्यते स उद्वृत इहोच्यते। उद्वृत्ते स्वरे परे स्वरस्य सन्धिर्न भवति। गयणे[1] च्चिय गंधउडि कुणंति तुह कउलनारीओ। निशाचरः। निसाअरो। निसिअरो। रजनीचरः। रयणीअरो। मनुजत्त्वम्। मणुअत्तं। बहुलाधिकारात् क्वचित् विकल्पः। कुम्भकारः। कुंभारो। कुंभआरो। सु-पुरुषः। सूरिसो। सुउरिसो। क्वचित्सन्धिरेव। शालवाहनः। सालाहणो। चक्रवाकः। चक्काओ। अत एव प्रतिषेधात् समासेऽपि स्वरस्य सन्धौ भिन्नपदत्वम्॥

त्यादेः ॥ १ ॥ ११ ॥ त्यादीनां स्वरस्य स्वरे परे सन्धिर्न भवति॥ भवति इह। होइ इह॥

अथ व्यंजनसन्धिः

अन्त्यव्यञ्जनस्य ॥ १ ॥ ११ ॥ लुगित्यनुवर्त्तते। शब्दानां यद् अन्त्यव्यञ्जनं तस्य लुक् भवति॥ यावत्-जाव। तावत्-ताव। यशस्-जसो। जन्मन्-जम्मो। तमस्, तमो। समासे तु वाक्य विभक्त्यपेक्षायाम् अन्त्यत्वम् अनन्त्यत्वं च। तेनोभयमपि भवति। वाक्यापेक्षया अनन्त्यत्वं, विभक्त्यपेक्षया च अन्त्यत्वम् इति। सद्-भिक्षुः। सभिक्खू। सद्जनः। सज्जणो। एतद् गुणाः। एअगुणा। तद्-गुणाः। तग्गुणा।

न श्रदुदोः ॥ १ ॥ १२ ॥ श्रद् उद् इत्येतयोरन्त्यव्यञ्जनस्य लुग् न भवति॥ श्रद्धितम्। सद्दहिअं। श्रद्धा। सद्धा। उद्गतम्। उग्गयं। उद्नतम्। उन्नय॥

---

[1] गगने एव गन्धपुटीं कुर्वन्ति तव कौलनार्यः॥ अत्र गन्ध उडिमिति इत्यत्र टकार उद्वृतस्वरः तस्मिन् परे सन्धिर्न।

निर्दुरोर्वा ॥ १ ॥ १३ ॥ निर् दुर् इत्येतयोरन्त्यव्यञ्जनस्य लुग् वा भवति। निःसहं। निस्सहं । नीसहं। दुःसहः। दुस्सहो। दूसहो। दुःखितः। दुक्खिओ। दुहिओ ॥

स्वरेऽन्तरश्च ॥ १ ॥ १४ ॥ अन्तरो निर्दुरोश्चान्त्यव्यञ्जनस्य स्वरे परे लुग् न भवति ॥ अन्तरात्मा। अंतरप्पा 'भस्मात्मनोः पो वा।२।५२ इति त्मस्य पः।। निरंतरं। निरवशेषम् । निरवसेसं। दुरुत्तरं। दुरवगाहं। क्वचिद् भवत्यपि। अन्तरोपरि। अन्तोवरि ॥ रस्य विसर्गे कृते 'अतो डो विसर्गस्य' इति विसर्गस्थाने डिदोकारः ॥

स्त्रियाम् आद् अविद्युतः ॥ १ ॥ १५ ॥ स्त्रियां वर्त्तमानस्य शब्दस्य अन्त्यव्यञ्जनस्य आत्वं भवति, विद्युच्छब्दं वर्जयित्वा। लुगपवादः ॥ सरित् । सरिआ । प्रतिपत् । पाडिवआ । सम्पत्। संपआ। बहुलाधिकारात् ईषत्स्पृष्टतरयश्रुतिरपि। सरिया, पाडिवया, संपया। अविद्युत इति किं। विज्जू ॥

रो रा ॥ १ ॥ १६ ॥ स्त्रियां वर्त्तमानस्य अन्त्यरेफस्य रा इत्यादेशो भवति ॥ आत्वापवादः । गिर् । गिरा। पुर् । पुरा। धुर्। धुरा ॥

क्षुधो हा ॥ १ ॥ १७ ॥ क्षुध् शब्दस्य अन्त्यव्यञ्जनस्य हादेशो भवति। क्षुध्। छुहा ॥

शरदादे-रत् ॥ १ ॥ १८ ॥ शरदादे-रन्त्यव्यञ्जनस्य अद् भवति ॥ शरद्। सरओ। भिषक्। भिसओ।

दिक्प्रावृषोः सः ॥ १ ॥ १९ ॥ एतयोरन्त्यव्यञ्जनस्य सो भवति ।। दिक्। दिसा प्रावृट्। पाउसो ॥

आयुरप्सरसोर्वा ॥ १ ॥ २० ॥ अनयोरन्त्यव्यञ्जनस्य सो

श्च भवति । दीर्घायुष् । दीहाउसो, दीहाऊ । अप्सरस् । अच्छरसा । ह्रस्वात् थ्य-श्च-त्स-प्साम् अनिश्चले । इति प्सस्य छः । अच्छरा ॥

ककुभो हः ॥ १ ॥ २१ ॥ ककुभ् शब्दस्य अन्त्यव्यञ्जनस्य हो भवति । ककुभ् । कउहा ॥

धनुषो वा ॥ १ ॥ २२ ॥ धनुःशब्दस्य अन्त्यव्यंजनस्य हो वा भवति, धनुष् । धणुहं, धणू ॥

मोऽनुस्वारः ॥ १ ॥ २३ ॥ अन्त्यमकारस्य अनुस्वारो भवति ॥ जलं । फलं । वृक्षं । वच्छं । गिरिं पेच्छ । क्वचिदनन्त्यस्यापि वणमि वणम्मि ॥

वा स्वरे मश्च ॥ १ ॥ २४ ॥ अन्त्यमकारस्य स्वरे परेऽनुस्वारो वा भवति ॥ पक्षे लुगपवादो मस्य मकारश्च भवति । वंदे उसभं अजिअं, उसभमजिअं च वंदे । बहुलाधिकाराद् अन्त्यस्यापि व्यजनस्य मकारः । साक्षात् । सक्खं । 'शाऽव्ययोत्खातादावदातः' इति आ इत्यस्य अः ॥ यत् । जं । तत् । तं । विष्वक् । वीसुं । 'ध्वनिविष्व-च्वोरु. । १।५२ इति अकारस्य उत्वम् । पृथक् । पिहं । सम्यक् । सम्मं । ऋधक् । इह । इहक आश्लेष्टुकम् इहय आलेट्ठुयं इत्यादि ॥

ङञणनो व्यञ्जने ॥ १ ॥ २५ ॥ ङञणन इत्येषां स्थाने व्यंजने परेऽनुस्वारो भवति । (ङ) । पङ्क्तिः । पंती । पराङ् मुखः । परंमुहो (ञ) कञ्चुकः । कंचुओ । लाञ्छनं । लंछणं (ण) । षण्मुखः । छंमुहो । उत्कण्ठा । उक्कंठा (न) । सन्ध्या । संझा । विन्ध्यः । विंझो ॥

वक्रादावन्तः ॥ १ ॥ २६ ॥ वक्रादिषु यथादर्शनं प्रथमादेः स्वरस्यान्त आगमरूपोऽनुस्वारो भवति । वक्र । वंकं । त्र्यस्रम् । तंसं । अश्रु । अंसू । श्मश्रु । मंसू । पुच्छं । पुंछं । गुच्छ । गुंछं । मूर्द्धा मुंढा । पर्शुः । पंसू । बुध्नम् । बुंधं । कर्कोटः । कंकोडो । कुड्मल

कुंपल । 'ड्मक्मो. ।२।५२' इति ड्मस्य पः । दर्शनम् । दंसण । वृश्चिकः । विंछिओ । गृष्टिः । गिंठी । मार्जारः । मंजारो । एष्वाद्यस्य । वयस्यः । वयंसो । मनस्विन् । मणंसी । मनस्विनी । मणंसिणी । मनःशिला । मणंसिला । प्रतिश्रुत्-पडंसुआ । पथिपृथिवीत्यादिना, इकारस्य अकारः । एषु द्वितीयस्य उपरि । अवरि । अतिमुक्तकम् । अणिउंतयं अइमुंतयं । इत्यादि अनयोस्तृतीयस्य क्वचिच्छन्दपूरणेऽपि । देवं नागसुवण्णं । क्वचिन्न भवति । गिट्ठी । मज्जारो । मणसिला । आर्षे । मणोसिला, अइमुत्तयं ॥

क्त्वा स्यादेर्णस्वो-र्वा ॥ १ ॥ २७ ॥ क्त्वायाः स्यादीनां च यौ णसू तयोरनुस्वारोऽन्त्यो वा भवति ॥ क्त्वा । कृत्वा । काऊणं क्त्वस्तुमत्तूण तुआणा, इति क्त्वस्तूणादेश. । काऊण काउआणं काउआण । स्यादि । वृक्षेन । वच्छेण वच्छेण। वृक्षेषु । वच्छेसुं वच्छेसु । णस्योरिति किं । करिअ अग्गिणो ॥

विंशत्यादे-र्लुक् ॥ १ ॥ २८ ॥ विंशत्यादेरनुस्वारस्य लुक् भवति ॥ विंशति. । वीसा । त्रिंशत् । तीसा । संस्कृतं सक्कयं । संस्कारः । सक्कारो इत्यादि ॥

मांसादे-र्वा १ ॥ २९ ॥ मांसादेरनुस्वारस्य लुक् वा भवति । मांसम् । मासं । मंसं । मांसलम् । मासलं । मंसलं । कांस्यम् । कासं । कंसं । पांसुः । पासू । पंसू । कथम् । कह । कहं । एवम् । एव । एवं । नूनम् । नूण, । नूणं । इदानीम् । इआणि । इआणिं । दानीम् । दाणि । दाणिं । किम् करोमि । कि करेमि किं करेमि । संमुखं । समुहं । संमुहं । किंशुकं । किसुअं । किंसुअं । सिंहः । सीहो । सिंघो इत्यादि ॥

वर्गेऽन्त्यो वा ॥ १ ॥ ३० ॥ अनुस्वारस्य वर्गे परे प्रत्यासत्ते-स्तस्यैव वर्गस्य अन्त्यो वा भवति । पङ्क. । पङ्को । पंको । शङ्खः । सङ्खो ।

संखो। अङ्गणम्। अङ्गणं। अंगणं। लङ्घनम्। लङ्घणं। लघणं। कञ्चुकः। कञ्चुओ। कंचुआ। लाञ्छनम्। लञ्छणं। लंछणं। अञ्जितम्। अञ्जिअं। अंजिअं। सन्ध्या। सञ्झा। संझा। कण्टकः। कटंओ, कण्टओ। उत्कण्ठा। उक्कण्ठा, उक्कठा। काण्डम्। काण्डं। कंडं। षण्ढः। सण्ढो, संढो। अन्तरम्। अन्तरं, अंतरं। पंथः। पन्थो, पंथो। चन्द्रः। चन्दो, चंदो। बान्धवः। बन्धओ, बंधओ। कम्पते। कम्पइ, कंपइ। काँर्प्ताते। वम्फइ, वंफइ। कदंबः। कलम्बो, कदंवे वा इति दस्य ल.। कलंवो। आरंभः। आरम्भो। आरंभो। वर्गे इति किं। संशयः। संसओ। संहरति। संहरइ। नित्यमिच्छन्ति अन्ये॥

स्वरादसंयुक्तस्यानादेः॥ १॥ १७६॥ अधिकारोऽयं। यद् इत ऊर्ध्वम् अनुक्रमिष्यामस्तत् स्वरात् परस्य असंयुक्तस्य अनादेर्भवतीति वेदितव्यम्॥

कग-चज-तद-पयवां प्रायो लुक्॥ १॥ १७७॥ स्वरात्परेषाम् अनादिभूतानाम् असंयुक्तानां कगचजतदपयवां प्रायो लुक् भवति। (क) तीर्थंकर·। तित्थयरो। लोकः। लोओ। शकटं। सयढं। सटा शकट कैटभे ढः। इति टस्य ढ.। (ग) नगः। नओ। नगरम्। नयरं। मृगाङ्कः। मयङ्को। (च) शची। सई। कचग्रहः। कयग्गहो। काचमणिः। कायमणो। (ज) प्रजापतिः। पयावई। (त) रसातलम्। रसायलं। पातालम्। पायालं। यतिः। जई। (द) गदा। गया। मदनः। मयणो। (प) रिपुः। रिऊ। सुपुरुषः। सुउरिसो। (य) नयनम्। नयणं। दयालु.। दयालू। वियोगः। विओओ। (व) लावण्यम्। लायण्णं। प्रायो ग्रहणात् क्वचिन्न भवति। सुकुसुमं। सुकुसुमं। प्रयागजल। पयागजलं। सुगतः। सुगओ। अगुरुः। अगुरू। सचापम्। सचावं। व्यजनम्। विजणं। सुतारम्। सुतारं। विदुरः। विदुरो। सपापम्। सपावं। समवायः। समवाओ। देवः। देवो। दानवः। दाणवो। स्वरादित्येव शंकर। संकरो। संगमः। संगमो। नक्तंचरः। नक्कंचरो। धनंजयः।

धणंजओ। द्विषंतपः धिसंतओ पुरंदर.। पुरंदरो। संवृत. संवुडो। संवर.। संवरो। असंयुक्तस्य इत्येव। अर्कः अक्को। वर्गः वग्गो। अर्वः। अव्वो। अर्च। अच्चो। वज्रम्। वज्जं। धूर्तः। धुत्तो। उद्दाम.। उद्दामो। विप्र.। विप्पो। कार्यम्। कज्जं। सर्वम्। सव्वं। क्वचित् संयुक्तस्यापि नक्कंचरो। नक्कंचरो। अनादेरित्येव। कालः। कालो। गन्धः। गन्धो। चोर।चोरो। जारः। जारो। तरु। तरू। दव.। दवो। पापम्। पावं। वर्ण। वण्णो। यकारस्य आदि भूतस्य जत्वं तु वक्ष्यते। समासे तु वाक्यविभक्त्य-पेक्षया भिन्नपदत्वमपि विवताते। तेन तत्र यथा दर्शनम् उभयमपि भवति। सुखकर.। सुहकरो। सुहयरो। आगमिक। आगमिओ। आय-मिओ। जलचर। जलचरो। जलयरो। बहुतरः। बहुतरो। बहुअरो। सुखदः। सुहदो। सुहओ। इत्यादि। क्वचिदादेरपि। स पुन.। स उण। स च। सो अ। चिह्नम्। इन्ध। चिह्नेन्धोवा इति ह्नस्य धः। क्वचिच्चस्य जः। पिशाची। पिसाजी। एकत्वम्। एगत्तं। एकः। एगो। अमुकः। अमुगो। असुक। असुगो। श्रावकः। सावगो। आकारः। आगारो। तीर्थकरः। तित्थगरो। आकर्ष। आगरिसो। लोकस्य उद्योतकरा। लोगस्सउज्जो-अगरा। इत्यादिषु तु व्यत्ययश्च। इत्येवकस्य गत्वम्। आर्षे अन्यदपि दृश्यते आकुञ्चनम्। आउंटणं। अत्र चस्य टत्वम्।

यमुना-चामुण्डा-कामुकातिमुक्तके मोऽनुनासिकश्च ॥ १ ॥ १७८ ॥ एषु मस्य लुक् भवति, लुकि च सति मस्य स्थानेऽनुनासिको भवति। यमुना। जउँणा। चामुण्डा। चाउँण्डा। कामुक। काउँओ। अतिमुक्तकम्। अणिउँत्तयं। क्वचिन्न भवति। अइमुंतयं। अइमुत्तअं॥

नावर्णात् पः ॥ १ ॥ १७९ ॥ अवर्णात् परस्य अनादेः पस्य लुक् न भवति। शपथः। सवहो। पोत्रः। इति पस्य वकारादेशः। शाप.। सावो। अनादेरित्येव। परपुष्ट.। परउट्ठो॥

अवर्णो य श्रुतिः ॥ १ ॥ १८० ॥ कगचजेत्यादिना लुकि सति शेषोऽवर्णोऽवर्णात्परो लघुप्रयत्नतर यकारश्रुतिर्भवति । (क) तीर्थङ्करः । तित्थयरो । शकटम् । सयढं । नगरम् । नयरं । मृगाङ्क । मयंको । कच ग्रहः । कयग्गहो । काचमणिः । कायमणी । रजतम् । रयय । प्रजापतिः । पयावई । रसातलम् । रसायलं । पातालम् । पायालं । मदनः । मयणो । गदा । गया । नयनम् । नयणं । दयालुः । दयालू । लावण्यम् । लायण्णं । अवर्ण इति किं ? शकुनः । सउणो । प्रगुणः । पउणो । प्रचुरं । पउरं । राजीवं । राईवं । निहतः । निहओ । निनदः । निनओ । वायुः । वाऊ । कपिः । कई । अवर्णा दित्येव । लोकस्य । लोअस्स । देवरः । देअरो । क्वचिद् भवति । पिबति । पियइ ।

कुब्ज-कर्पर-कीलके कः खोऽपुष्पे ॥ १ ॥ १८१ ॥ एषु कस्य खो भवति पुष्पं चेत् कुब्जाभिधेयं न भवति । कुब्जः । खुज्जो । कर्परम् । खप्परं । । कीलकः । खीलओ, अपुष्प इति किं । बन्धितुं कुब्जकप्रसूनम् । बंधेउं कुज्जयपसूणं । आर्षेऽन्यत्रापि । कासितम् । खासियं । कसित । खसिअं ॥

मरकत-मदकले गः कन्दुके त्वादेः ॥ १ ॥ १८२ ॥ अनयो कस्य गो भवति कन्दुके त्वाद्यस्य कस्य । मरकतम् । मरगयं । मदकलः मयगलो । कन्दुकम् । गेंदुअं । एच्छय्यादौ । १ । ५७ । इति अकारस्य एत्वम् ॥

किराते चः ॥ १ ॥ १८३ ॥ किराते कस्य चो भवति किरातः । चिलाओ । हरिद्रादौ लः ।१।२५४। इति रस्य लः । पुलिन्दे एव अयं विधिः, कामरूपिणि तु नेष्यते । नमामो हरकिरातं । नमिमो हरकिरायं ॥

शीकरे भहौ वा ॥ १ ॥ १८४ ॥ शीकरे कस्य भहौ वा भवतः । सीकरः । सीभरो, सीहरो । पक्षे सीअरो ॥

चन्द्रिकायां मः ॥ १ ॥ १८५ ॥ चन्द्रिकाशब्दे कस्यमो भवति। चंद्रिका। चन्दिमा ॥

निकष-स्फटिक चिकुरे हः ॥ १ ॥ १८६ ॥ एषु कस्य हो भवति। निकषः। निहसो ॥

स्फटिके लः ॥ १ ॥ १८७ ॥ स्फटिके टस्य लो भवति। स्फटिक.। फलिहो । चिकुरः। चिहुरो। चिहुरशब्दः संस्कृतेऽपीति दुर्गः ॥

खघथधभाम् ॥ १ ॥ १८७ ॥ स्वरात्परेषाम् असंयुक्तानाम् अनादिभूतानां ख-घ-थ-ध-भाम् प्रायो हो भवति। (ख) शाखा। साहा। मुखम्। मुंह। मेखला। मेहला। लिखति। लिहइ। (घ) मेघ। मेहो। जघनम्। जहणं। माघ। माहो। श्लाघते। लाहइ। (थ) नाथ.। नाहो। आवसथः। आवसहो। मिथुनम्। मिहुणं। कथयति। कहइ। (ध) साधुः। साहू। व्याध.। वाहो। बधिरः। बहिरो। बाधते। बाहइ। इन्द्रधनुः। इन्दहणू। (भ) सभा। सहा। स्वभाव.। सहावो। नभम्। नहं। स्तन-भरः। थणहरो। शोभते। सोहइ। स्वरादित्येव। शंख.। संखो। संघः। संघो। कन्था। कंथा। वन्धः। बंधो। खम्भ.। खंभो। असंयुक्तस्य इत्येव। आख्याति। अक्खाइ। अर्घ्यते। अग्घइ। कथ्यते। कत्थइ। सिध्यकः। सिद्धओ। बन्ध्यते। बंधइ। लभ्यते। लब्भइ। अनादेरित्येव। गर्जन्ति खे मेघा.। गज्जंते खे मेहा। गच्छति घनः। गच्छइ घणो। प्राय इत्येव, सर्षपखल.। सरिसवखलो। प्रलयघनः। पलयघणो। अस्थिरो। जिनधर्मः। अथिरोजिणधम्मो। प्रणष्टभयोनभः। पणट्ठभओ नभं ॥

पृथकि धो वा ॥ १ ॥ १८८ ॥ पृथक्शब्दे थस्य धो वा भवति। पृथक्। पिधं। पुधं। पिहं। पुहं ॥

शृङ्खले खः कः ॥ १ ॥ १८९ ॥ शृङ्खलशब्दे खस्य को भवति। शृङ्खलम्। संकलं ॥

पुन्नाग-भागिन्योर्गो मः ॥ १ ॥ १९० ॥ अनयो-र्गस्य मो भवति। पुन्नागानि वसन्ते। पुन्नामाइं वसंते। भागिनी। भामिणी ॥

छागे लः ॥ १ ॥ १९१ ॥ छागे गस्य लो भवति। छाग.। छालो। छागी। छाली ॥

खचितपिशाचयोश्चः सल्लौ वा ॥ १ ॥ १९३ ॥ अनयो-श्चस्य यथासंख्यं स ल्ल इत्यादेशौ वा भवतः। खाचित.। खसिओ। खइओ। पिशाचः। पिसल्लो। पिसाओ।

जटिले जो झो वा ॥ १ ॥ १९४ ॥ जटिले जस्य झो वा भवति ॥

टो डः ॥ १ ॥१९५॥ स्वरात्परस्य असंयुक्तस्य अनादे. टस्य डो भवति। जटिल.। झडिलो। जडिलो। नटः। नडो। भट.। भडो। घटः। घडो। घटति। घडइ। स्वरादित्येव। घंटा। असंयुक्तस्येत्येव। खट्वा. खट्टा। अनादेरित्येव। टक्क.। टक्को। क्वचिन्न भवति। अटति। अटइ ॥

सटा-शकट-कैटभे ढः ॥ १ ॥ १९६ ॥ एषु टस्य ढो भवति। सटा। सढा। शकटः। सयढो ॥

कैटभे भो वः ॥ १ ॥ २४० ॥ कैटभे भस्य वो भवति। कैटभ.। केढवो ॥

चपेटा पाटौ वा ॥ १ ॥ १९८ ॥ चपेटाशब्दे एयन्तपटिधातौ च टस्य लो वा भवति। चपेटा। चविला। चविडा। पाटयति। फालेइ। फाडेइ ॥

ठो ढः ॥ १ ॥ १९९ ॥ स्वरात्परस्यासंयुक्तस्यानादेः ठस्य ढो भवति । मठः । मढो । शठ । सढो । कमठः । कमढो । कुठार. । कुढारो । पठति । पढइ । स्वरादित्येव, वैकुण्ठः । वेकुंठो । असयुक्तस्येत्येव, तिष्ठति । चिट्ठइ । अनादेरित्येव । हृदये तिष्ठति । हिअए ठाइ ।

अङ्कोठे ल्लः ॥ १ ॥ २०० ॥ अङ्कोठे ठस्य द्विरुक्तो ल्लो भवति । अङ्कोठतैलघृतम् । अंकोल्ल तेल्लतुप्पं । अङ्कोठतैलतुप्पं देश्योऽयं शब्दः ।

पिठरे हो वा रश्च डः ॥ १ ॥ २०१ ॥ पिठरे ठस्य हो वा भवति । तत्सन्नियोगे च रस्य डो भवति । पिठरः । पिहडो । पिढरो ॥

डो लः ॥ १ ॥ २०२ ॥ स्वरात्परस्यासयुक्तस्य अनादे-र्डस्य प्रायो लो भवति । वडवा मुख । वलयामुहं । गरुड. । गरुलो । तडागं । तलायं । क्रीडति । कीलइ । स्वरादित्येव । मुण्ड । मोड । कुण्डं । कोडं । असंयुक्तस्य इत्येव । खड्गः । खग्गो । अनादेरित्येव । रमते डिम्भ. । रमइ डिंभो । प्रायोग्रहणात् । क्वचित विकल्पः । वडिशम् । वडिसं । वलिसं । दाडिमम् । दालिम । दाडिमं । गुड. । गुलो । गुडो । नाडी । णाली । नाडी । नडम् । णलं । णड । आपीड. । आवेडो । आमेलो । नीपापीडे मो वा इति पस्य म. । एत्पीयू पेत्यादिना ईकारस्य एत्त्वम् च । क्वचिन्न भवति । निबिडं । गौड. । गउडो । पीडितम् । पीडिअं । नीडम् । नीडं । उडुः । उडू । तडित् । तडी । इत्यादि ।

वेणौ णो वा ॥ १ ॥ २०३ ॥ वेणौ णस्य लो वा भवति । वेणु. । वेलू । वेणू ।

तुच्छे तश्चछौ वा ॥ १ ॥ २०४ ॥ तुच्छशब्दे तस्य चछ इत्यादेशौ वा भवतः । तुच्छ । चुच्छं । छुच्छं । तुच्छं ॥

तगर-त्रसर-तूवरे टः ॥ १ ॥ २०५ ॥ एषु तस्य टो भवति। तगरः। टगरो। त्रसरः। टसरो। तूवरः। टूवरो॥

प्रत्यादौ डः ॥ १ ॥ २०६ ॥ प्रत्यादिषु तस्य डो भवति। प्रतिपन्नं। पडिवन्नं। प्रतिभासः। पडिहासो। प्रतिहारः। पडिहारो। प्रतिस्पर्द्धि। पाडिप्फद्धी। प्रतिसारः। पडिसारो। प्रतिनिवृत्तं। पडिनियत्तं। प्रतिमा। पडिमा। प्रतिपदा। पडिवया। प्रतिश्रुत्। पडंसुआ। प्रतिकरोति। पडिकरइ। प्रभृति। पहुडि। प्राभृतम्। पाहुडं। व्यापृतः। वावडो। पताका। पडाया। विभीतकः। वहेडओ। हरीतकी। हरडई। हरीतक्यामीतोऽत् इति ईकारस्य अः। मृतकम्। मडयं। आर्षे। दुष्कृतं। दुक्कडं। सुकृतं। सुकडं। आहृतम्। आहडं। अवहृतम्। अवहडं। इत्यादि। प्राय इत्येव। प्रतिसमयं। पइसमयं। प्रतीपं। पईवं। संप्रति। संपइ। प्रतिष्टानं। पइट्ठाणं। प्रतिष्ठा। पइट्ठा। प्रतिज्ञा। पइण्णा। इत्यादि॥

इत्वे वेतसे ॥ १ ॥ २०७ ॥ वेतसे तस्य डो भवति इत्वे सति। वेतसः। वेडिसो। इः स्वप्नादौ इत्यस्य इः। इत्व इति किं। वेअसो, अत्र इत्व इति व्यावृत्तिबलात् इःस्वप्नादौ, इति इकारो न भवति॥

गर्भितातिमुक्तके णः ॥ १ ॥ २०८ ॥ अनयोस्तस्य णो भवति। गर्भितः। गब्भिणो। अतिमुक्तकम्। अणिउंतयं। यमुना चामुण्डातिमुक्तेत्यादिना मलोपः। कथचिन्न भवति। अइमुत्तयं। कथम् एरावणो। ऐरावणशब्दस्य भविष्यतीविशेषः। एरावओ इति तु ऐरावतशब्दस्य॥

रुदिते दिना ण्णः ॥ १ २०९ ॥ रुदिते दिना सह तस्य द्विरुक्तो ण्णो भवति। रुदितम्। रुण्णं। अत्र केचिद् ऋत्वादिषु द इत्यारब्धवन्तः। स तु शौरसेनी मागधीविषय एव दृश्यते, इति नोच्यते। प्राकृते हि। ऋतुः। रिऊ। उऊ। रजतं। रययं। एतद्। एअं। गतः। गओ। आगतः। आगओ। सांप्रतं। संपयं। यतः। जओ। ततः।

तओ । कृतं । कयं । हृत । हयं । हताशः । हयासो । श्रुतः । सुओ । आकृतिः । आकिई । निर्वृतः । निव्वुओ । तात । ताओ । कतर । कयरो । द्वितीय । दुइओ इत्यादयः प्रयोगा भवन्ति । न पुनः । उदू रयदं इत्यादि । क्वचिद् भावेऽपि व्यत्ययश्च इत्येव सिद्धम् दिही इत्येतदर्थं तु धृतेर्दिहिः, इति वक्ष्यामः ॥

सप्ततौ रः ॥ १ ॥ २१० ॥ सप्ततौ तस्य रो भवति । सप्ततिः । सत्तरी ॥

अतसी-सातवाहने लः ॥ १ ॥ २११ ॥ अनयोस्तस्य लो भवति । अतसी । अलसी । शातवाहनः । सालाहणो । सालवाहणो । सातवाहनी भाषा । सालाहणी भासा ॥

पलिते वा ॥ १ ॥ २१२ ॥ पलिते तस्य लो वा भवति । पलितम् । पलिल । पलिअ ॥

पीते वो ले वा ॥ १ ॥ २१३ ॥ पीते तस्य वो वा भवति । स्वार्थलकारे परे । पीतलम् । पीवलं । पीअलं । ल इति किं पीतम् । पीअं ।

वितस्ति-वसति-भरत-कातर-मातुलिङ्गे हः ॥ १ ॥ २१४ ॥ एषु तस्य हो भवति । वितस्ति । विहत्थी । वसति । वसही । बहुलाधिकारात् क्वचिन्न भवति । वसई । भरतः । भरहो । कातर । काहलो । मातुलिङ्ग । माहुलिंगं । मातुलुङ्गशब्दस्य तु माउलुंग ॥

मेथि-शिथिर-शिथिल प्रथमे थस्य ढः ॥ १ ॥ २१५ ॥ एषु थस्य ढो भवति । हस्यापवादः । मेथि । मेढी । शिथिर । सिढिलो । शिथिल । सिढिलो । प्रथमः । पढमो ॥

प्रदीपि-दोहदे लः ॥ १ ॥ २२१ ॥ प्रपूर्वे दीप्यतौ धातौ दोहदशब्दे च दस्य लो भवति । प्रदीपयति । पलीवेइ । प्रदीप्तम् । पलित्त ॥

दशनदष्ट-दग्धदोला-दण्डदर-दाहदम्भ-दर्भ-कदनदो-हदे दो वा डः ॥ १ ॥ २१७ एषु दस्य डो वा भवति। दशनम्। डसणं, दसण। दष्ट.। डट्ठो। दट्ठो। दग्धः। डड्ढो। दड्ढो। दोला। डोला। दोला। दण्ड.। डण्डो। दण्डो। दर। डरो। दरो। दाह.। डाहो। दाहो। दम्भः। डम्भो। दम्भो। दर्भ.। डब्भो। दब्भो। कदनम्। कडणं। कयणं। दोहदः। डोहलो। दोहलो। दरशब्दस्य च भयार्थ वृत्तेरेव भवति। अन्यत्र दर दलिअ।

दंशदहोः ॥ १ ॥ २१८ ॥ अनयो र्धात्वो-र्दस्य डो भवति। दशति। डसइ। दहति। डहइ॥

संख्या-गद्गदे रः ॥ १ ॥ २१९ ॥ संख्यावाचिनि गद्गद्शब्दे च दस्य रो भवति। एकादशः। एआरह। द्वादश। बारह। त्रयोदश। तेरह। गद्गदम्। गग्गर। अनादेरित्येव ते दस, असयुक्तस्य इत्येव चतुर्दश। चउदह॥

कदल्याम् अद्रुमे ॥ १ ॥ २२० ॥ अद्रुमवाचिनि कदलीशब्दे दस्य रो भवति। कदली। करली। अद्रुम इति किं। कयली। केली॥

कदम्बे वा ॥ १ ॥ २२२ ॥ कदम्ब शब्दे दस्य लो वा भवति। कदम्ब। कलंबो। कयंबो।

दीप्यौ धो वा ॥ १ ॥ २२३ ॥ दीप्यतौ दस्य धो वा भवति। दीप्यते। धिप्पइ। दिप्पइ॥

कदर्थिते वः ॥ १ ॥ २२४ ॥ कदर्थिते दस्य वो भवति। कदर्थित। 'वृत्तप्रवृत्तमृत्तिकापत्तनकदर्थिते ट.' इति थस्य ट। कवट्टिओ॥

ककुदे हः ॥ १ ॥ २२५ ॥ ककुदे दस्य हो भवति। ककुदं। कउहं॥

निषधे धो ढः ॥ १ ॥ २२६ ॥ निषधे धस्य ढो भवति, निषधः। निसढो ॥

औषधे ॥ १ ॥ २२७ ॥ औषधे धस्य ढो वा भवति । औषधम्। ओसढं ओसहं ॥

नो णः ॥ १ ॥ २२८ ॥ स्वरात्परस्यासंयुक्तस्यानादे र्नस्य णो भवति ॥ कनकम् । कणयं । मदनः । मयणो । वचनं । वयणं । नयनम् । नयणं । मानयति । माणइ । आर्षे आरनालम् । आरनालं । अनिलः । अनिलो । अनलः । अनलो । इत्याद्यपि ।

वादौ ॥ १ ॥ २२९ ॥ असंयुक्तस्य आदौ वर्तमानस्य नस्य णो वा भवति ॥ नर. । णरो । नरो, । नदी । णई । नई । नेति । णेइ । नेइ । असंयुक्तस्येत्येव । न्याय. । नाओ ॥

निम्ब-नापिते ल-ण्हं वा ॥ १ ॥ २३० ॥ अनयो-र्नस्य ल ण्ह इत्यादेशौ वा भवतः ॥ निम्ब.। लिम्बो । निम्बो । नापित. । ण्हा-विओ । नाविओ ॥

पो वः ॥ १ ॥ २३१ ॥ स्वरात्परस्यासंयुक्तस्यानादेः पस्य प्रायो वो भवति । शपथः । सवहो । शाप । सावो । उपसर्गः । उवसग्गो । प्रदीप । पईवो । काश्यपः । कासवो । पापम् । पावं । उपमा । उवमा । कपिलम् । कविलं । कुणपम् । कुणवं । कलाप. । कलावो । कपालम् । कवालं । महिपाल. । महिवालो । गोपायति । गोवइ । तपति । तवइ । स्वरादित्येव । कम्पते । कंपइ । असंयुक्तस्य इत्येव । अप्रमत्तः । अप्पमत्तो । अनादेरित्येव । सुखेनपठति । सुहेण पढइ । प्राय इत्येव । कपि. । कई । ऋतु. । रिऊ । एतेन पकारस्य प्राप्तयो-र्लोपवकारयोर्यस्मिन् कृते श्रुतिसुखमुत्पद्यते स तत्र कार्य. ॥

पाटि परुष परिघ परिखा पनस पारिभद्रे फः ॥ १ ॥ २३२॥ ण्यन्ते पटिधातौ परुषादिषु च पस्य फो भवति। पाटयति। फालेइ। पाटौ लो वा इति टस्य लः फाडेइ। परुषः। फरुसो। परिघः। फलिहो। परिखा। फलिहा। पनसः। फणसो। पारिभद्रः। फालिहद्दो।

प्रभूते वः ॥ १ ॥ २३३ ॥ प्रभूते पस्य वो भवति। प्रभूतम्। वहुत्तं।

पापर्द्धौ रः ॥ १ ॥ २३४ ॥ पापर्द्धौ अपदादौ पकारस्य रो भवति। पापर्द्धिः। पारद्धी।

फो भहौ ॥ १ ॥ २३६ ॥ स्वरात्परस्यासंयुक्तस्यानादेः फस्य भहौ भवत., क्वचिद्भः। रेफः। रेभो। शिफा। सिभा। क्वचित्तु हः मुक्ताफलं। मुत्ताहलं। क्वचिदुभावपि। सफलं। सभलं, सहलं। शेफालिका। सेभालिआ, सेहालिआ। शफरी। सभरी; सहरी। गुफति। गुभइ। गुहइ। स्वरादित्येव। गुम्फति। गुंफइ। असंयुक्तस्येत्येव। पुष्पम्। पुप्फं। अनादेरित्येव। तिष्ठतिफणी। चिट्ठइफणी। प्राय इत्येव। कृष्ण फणी। कसण फणी।

बो वः ॥ १ ॥ २३७ ॥ स्वरात्परस्यासंयुक्तस्यानादेर्बस्य वो भवति ॥ अलाबूः। अलावू। अलाबू। अलाऊ। शबलः। सवलो ॥

बिसिन्यां भः ॥ १ ॥ २३८ ॥ बिसिन्यां बस्य भो भवति, बिसिनी। भिसिणी। स्त्रीलिङ्गनिर्देशादिह न भवति। बिसतन्तुपेलवानाम्। बिसतन्तु-पेलवाणं ॥

कबन्धे म-यौ ॥ १ ॥ २३९ ॥ कबन्धे बस्य मयौ भवतः, कबन्धः। कमन्धो। कयन्धो ॥

विषमे मो ढो वा ॥ १ ॥ २४१ ॥ विषमे मस्य ढो वा भवति ॥ विषमः। विसढो। विसमो ॥

मन्मथे वः ॥ १ ॥ २४२ ॥ मन्मथशब्दे मस्य वो भवति ॥ मन्मथः । वम्महो ॥

वाभिमन्यौ ॥ १ ॥ २४३ ॥ अभिमन्युशब्दे मस्य वो वा भवति ॥ अभिमन्युः । अहिवन्नू । अहिमन्नू ॥

भ्रमरे सो वा ॥ १ ॥ २४४ ॥ भ्रमरशब्दे मस्य सो वा भवति ॥ भ्रमरः । भसलो । भमरो ॥

आदे-र्यो जः ॥ १ ॥ २४५ ॥ पदादेर्यस्य जो भवति ॥ यशः । जसो । यमः । जमो । याति । जाइ । आदेरिति किम् । अवयवः । अवयवो । विनयः । विणओ, बहुलाधिकारात् सोपसर्गस्यानादेरपि । संयमः । संजमो । संयोगः । संजोगो । अपयशः । अवजसो । क्वचिन्न भवति । प्रयोगः । पओओ । आर्षे लोपोऽपि । यथाख्यातं । अह-क्खायं यथाजातम् । अहाजायं ॥

युष्मदर्थपरे तः ॥ १ ॥ २४६ ॥ युष्मच्छब्देऽर्थपरे यस्य तो भवति ॥ युष्मादृशः । तुम्हारिसो । युष्मदीयः । तुम्हकेरो । अर्थपरइति किं । युष्मदस्मत्प्रकरणम् । जुम्हदम्हपयरणं ॥

यष्ट्यां लः ॥ १ ॥ २४७ ॥ यष्ट्यां यस्य लो भवति । यष्टिः । लट्ठी । वेणु-यष्टि । वेणुलट्ठी । इक्षु यष्टिः । उच्छु लट्ठी । मधु यष्टिः । महुलट्ठी ॥

वोत्तरीयानीयतीयकृद्ये ज्जः ॥ १ ॥ २४८ ॥ उत्तरीयशब्दे अनीयतीयकृद्यप्रत्ययेषु च यस्य द्विरुक्तो जो वा भवति ॥ उत्तरीयम् । उत्तरिज्जं । उत्तरीअं । (अनीये) ॥ करणीयम् । करणिज्जं । करणीअं विस्मयनीयम् । विम्हयणिज्जं विम्हयणीअं । यापनीयम् । जवणिज्जं । जवणीअं । (तीय) द्वितीयः । विइज्जो । बीओ (कृद्य) पेया । पेज्जा । पेआ ।

छायायां होऽकान्तौ वा ॥ १ ॥ २४९ ॥ अकान्तौ वर्तमाने छायाशब्दे यस्य हो वा भवति ॥ वृक्षस्यछाया । वच्छस्स छाही । वच्छस्स छाया । आतपाभावः । सच्छायम् । सच्छाहं । सच्छायं । अकान्ताविति किम् ? मुखच्छाया । मुहच्छाया । कान्तिरित्यर्थः ॥

डाहवौ कतिपये ॥ १ ॥ २५० ॥ कतिपयशब्दे यस्य डाह व इत्यादेशौ पर्यायेण भवतः ॥ कतिपयम् । कइवाहं । कइअवं ॥

किरिभेरे रो डः ॥ १ ॥ २५१ ॥ अनयो रस्य डो भवति । किरिः । किडी । भेरः । भेडो ॥

पर्याणे डा वा ॥ १ ॥ २५२ ॥ पर्याणे रस्य डा इत्यादेशो वा भवति ॥ पर्याणम् । पडायाणं । पल्लाणं ॥ पर्यस्तपर्याणसौकुमार्येल्लः इति यस्य लत्वम् ।

करवीरे णः ॥ १ ॥ २५३ ॥ करवीरे प्रथमस्य रस्य णो भवति । करवीरः । कणवीरो ॥

हरिद्रादौ लः ॥ १ ॥ २५४ ॥ हरिद्रादिषु शब्देषु असंयुक्तस्य रस्य लो भवति । हरिद्रा । हलिद्दी । दरिद्राति । दलिद्दाइ । दरिद्रः । दलिद्दो । दारिद्र्यम् । दालिद्दं । हारिद्रः । हलिद्दो । युधिष्ठिरः । जहुट्ठिलो । शिथिरः । सिढिलो । मुखरः । मुहलो । चरणः । चलणो । वरुणः । वलुणो । करुण । कलुणो । अङ्गारः । इङ्गालो । सत्कारः । सक्कालो । सुकुमारः । सोमालो । किरातः । चिलाओ । परिखा । पलिहा । परिघः । पलिहो ॥ पारिभद्रः । फालिहद्दो । कातरः । काहलो । रुग्णः । लुक्को । अपद्वारम् । अवद्दालं । भ्रमरः । भसलो । जठरम् । जढलं । बठरः । बढलो । निष्ठुरः । निट्ठुलो । इत्यादि । बहुलाधिकारात् चरणशब्दस्य पादार्थवृत्तेरेव ।

अन्यत्र चरणकरणं । भ्रमरे ससंनियोगे एव, अन्यत्र भमरो । तथा जढरं । वढरो । निट्ठुरो । इत्यादि ।

लाहल-लाङ्गल-लाङ्गूले वादे र्णः ॥ १ ॥ २५६ ॥ एषु आदे-र्लस्य णो वा भवति ॥ लाहलः । णाहलो । लाहलो । लांगलम् । णंगलं । लङ्गलं । लाङ्गूलम् । णङ्गूलं । लङ्गूलं ॥

शबरे बो मः ॥ १ ॥ २५७ ॥ शबरे बस्य मो भवति, शबरः । समरो ॥

स्वप्ननीव्योर्वा ॥ १ ॥ २५८ ॥ अनयोर्वस्य मो वा भवति, स्वप्नः । सिमिणो । सिविणो । नीवी । नीमी । नीवी ॥

स्नुषायां ण्हो न वा ॥ १ ॥ २६१ ॥ स्नुषाशब्दे षस्य ण्हः णकाराक्रान्तो हो वा भवति । स्नुषा । सुण्हा । सुसा ॥

दश–पाषाणे हः ॥ १ ॥ २६२ ॥ दशन्शब्दे पाषाणशब्दे चशषोर्यथादर्शनं हो वा भवति । दशमुखः । दहमुहो । दसमुहो । दशबलः । दहबलो । दसबलो । दशरथः । दहरहो । दसरहो । दश । दह, दस । एकादश । एक्कारह । द्वादश । बारह । त्रयोदश । तेरह । पाषाणः । पाहाणो, पासाणो ।

दिवसे सः ॥ १॥ २६३ ॥ दिवसे सस्य हो वा भवति ॥ दिवसः । दिवहो । दिवसो ॥

हो घोऽनुस्वारात् ॥ १ ॥ २६४ ॥ अनुस्वारात् परस्य हस्य घो वा भवति । सिंहः । सिंघो । सीहो । संहारः । संघारो । संहारो । क्वचिदननुस्वारादपि । दाहः । दाघो ॥

शिरायां वा ॥ १ ॥ २६६ ॥ शिराशब्दे आदेश्छो वा भवति । शिरा । छिरा । सिरा ।

छायायां होऽकान्तौ वा ॥ १ ॥ २४९ ॥ अकान्तौ वर्तमाने छायाशब्दे यस्य हो वा भवति ॥ वृक्षस्यछाया। वच्छस्स छाही। वच्छस्स छाया। आतपाभावः। सच्छायम्। सच्छाहं। सच्छायं। अकान्ताविति किम् ? मुखच्छाया। मुहच्छाया। कान्तिरित्यर्थः ॥

डाहवौ कतिपये ॥ १ ॥ २५० ॥ कतिपयशब्दे यस्य डाह व इत्यादेशौ पर्यायेण भवतः ॥ कतिपयम्। कइवाहं। कइअवं ॥

किरिभेरे रो डः ॥ १ ॥ २५१ ॥ अनयो रस्य डो भवति। किरिः। किडी। भेरः। भेडो ॥

पर्याणे डा वा ॥ १ ॥ २५२ ॥ पर्याणे रस्य डा इत्यादेशो वा भवति ॥ पर्याणम्। पडायाणं। पल्लाणं ॥ पर्यस्तपर्याणसौकुमार्येल्लः इति यस्य लत्वम्।

करवीरे णः ॥ १ ॥ २५३ ॥ करवीरे प्रथमस्य रस्य णो भवति। करवीरः। कणवीरो ॥

हरिद्रादौ लः ॥ १ ॥ २५४ ॥ हरिद्रादिषु शब्देषु असंयुक्तस्य रस्य लो भवति। हरिद्रा। हलिद्दी। दरिद्राति। दलिद्दाइ। दरिद्रः। दलिद्दो। दारिद्र्यम्। दालिद्दं। हारिद्रः। हलिद्दो। युधिष्ठिरः। जहुट्ठिलो। शिथिरः। सिढिलो। मुखरः। मुहलो। चरणः। चलणो। वरुणः। वलुणो। करुण। कलुणो। अङ्गारः। इङ्गालो। सत्कारः। सक्कालो। सुकुमारः। सोमालो। किरातः। चिलाओ। परिखा। पलिहा। परिघः। पलिहो॥ पारिभद्रः। फालिहद्दो। कातरः। काहलो। रुग्णः। लुक्को। अपद्वारम्। अवद्दालं। भ्रमरः। भसलो। जठरम्। जढलं। बठरः। बढलो। निष्ठुरः। निट्ठुलो। इत्यादि। बहुलाधिकारात् चरणशब्दस्य पादार्थवृत्तेरेव।

अन्यत्र चरणकरणं। भ्रमरे ससंनियोगे एव, अन्यत्र भ्रमरो। तथा जढरं। वढरो। निट्ठुरो। इत्यादि।

लाहल-लाङ्गल-लाङ्गूले वादे र्णः ॥ १ ॥ २५६ ॥ एषु आदे-र्लस्य णो वा भवति॥ लाहलः। णाहलो। लाहलो। लांगलम्। णंगलं। लङ्गलं। लाङ्गूलम्। णङ्गूलं। लङ्गूलं॥

शबरे बो मः ॥ १ ॥ २५७ ॥ शबरे बस्य मो भवति, शबरः। समरो॥

स्वप्ननीव्योर्वा ॥ १ ॥ २५९ ॥ अनयोर्वस्य मो वा भवति, स्वप्नः। सिमिणो। सिविणो। नीवी। नीमी। नीवी॥

स्नुषायां ण्हो न वा ॥ १ ॥ २६१ ॥ स्नुषाशब्दे षस्य ण्हः णकाराक्रान्तो हो वा भवति। स्नुषा। सुण्हा। सुसा॥

दश–पाषाणे हः ॥ १ ॥ २६२ ॥ दशन्शब्दे पाषाणशब्दे चशषोर्यथादर्शनं हो वा भवति। दशमुखः। दहमुहो। दसमुहो। दशबलः। दहबलो। दसबलो। दशरथः। दहरहो। दसरहो। दश। दह, दस। एकादशः। एआरह। द्वादश। बारह। त्रयोदश। तेरह। पाषाणः। पाहाणो, पासाणो।

दिवसे सः ॥ १॥ २६३ ॥ दिवसे सस्य हो वा भवति॥ दिवसः। दिवहो। दिवसो॥

हो घोऽनुस्वारात् ॥ १ ॥ २६४ ॥ अनुस्वारात् परस्य हस्य घो वा भवति। सिंहः। सिंघो। सीहो। संहारः। संघारो। संहारो। क्वचिदननुस्वारादपि। दाहः। दाघो॥

शिरायां वा ॥ १ ॥ २६६ ॥ शिराशब्दे आदेश्छो वा भवति। शिरा। छिरा। सिरा।

लुग् भाजनदनुजराजकुले जः सस्वरस्य न वा ॥१॥२६७॥ एषु सस्वरस्य जकारस्य लुग् वा भवति। भाजनम्। भाणं भायणं। दनुजवधः। दणुवहो। दणुअवहो। राजकुलम्। राउलं। रायउलं॥

व्याकरणप्राकारागते कगोः ॥ १ ॥ २६८ ॥ एषु कस्य गस्य च सस्वरस्य लुग् वा भवति। व्याकरणम्। वारणं, वायरणं। प्राकारः। पारो, पायारो। आगतः। आओ, आयओ॥

किसलयकालायसहृदये यः ॥ १ ॥ २६९ ॥ एषु सस्वरस्य यकारस्य लुग् वा भवति। किसलयम्। किसलं, किसलयं। कालायसम्। कालासं, कालायसं, महार्णवसमाः सहृदयाः॥ महण्णव-समासहिआ॥ यदा ते सहृदयैर्गृह्यन्ते जाला ते सहिअएहिं-घेप्पंति॥ निरासनाऽर्पित हृदयस्य हृदयम्। निसमणुप्पिय-हिअस्स हिअयं॥

दुर्गादेव्युदुम्बर-पादपतनपादपीठेऽन्तर्दः ॥ १ ॥ २७० ॥ एषु सस्वरस्य दकारस्य अन्तर्मध्ये वर्तमानस्य लुग् वा भवति॥ दुर्गादेवी। दुग्गावी, दुग्गाएवी। उदुम्बरः। उम्बरो, उउम्बरो। पादपतनम्। पावडणं। पायवडणं। पादपीठम्। पावीढं। पायवीढं। अन्तरिति किं। दुर्गादेव्यामआदौ मा भूत्॥

यावत्तावज्जीवितावर्त्तमानावट-प्रावारकदेवकुलैवमेवे वः ॥१॥ ॥ २७१ ॥ यावदादिषु सस्वरवकारस्य अन्तर्वर्त्तमानस्य लुग् वा भवति॥ यावत्। जा, जाव। तावत्। ता, ताव। जीवितम्। जीअं, जीविअं। आवर्तमानः। अत्तमाणो। आवत्तमाणो। अवटः। अडो, अवडो। प्रावारकः। पारओ, पावारओ। देवकुलम्। देउलं। देवउलं। एवमेव। एमेव। एवमेव। अन्तरित्येव, एवमेव इत्यन्तस्य न भवति॥

———

अधुना संयुक्तव्यंजनसन्धिर्विधीयते

संयुक्तस्य ॥ २ ॥ १ ॥ अधिकारोऽयं ज्यायामीत् (२ ॥ ११५) इति यावत्, यदित ऊर्ध्वम् अनुक्रमिष्यामः तत्संयुक्तस्येति वेदितव्यम् ॥

कग-टड-तद-प-शषस≍क≍पाम् ऊर्ध्वं लुक् ॥ २ ॥ ७७ ॥ संयोगस्य ऊर्ध्वं वर्तमानानाम् एषां वर्णानां लुग् भवति ॥ (क) भुक्तं । भुत्तं । सिक्थम् । सित्थं । (ग) दुग्धं । दुद्धं । मुग्धम् । मुद्धं (ट) षट्पदः । छप्पओ । कट्फलम् । कप्फलं । (ड) खड्ग । खग्गो । षड्जः । सज्जो । (त) उत्पलम् । उप्पलं । उत्पादः । उप्पाओ । (द) मद्गुः । मग्गू । मुद्गरः । मोग्गरो । (प) सुप्तः । सुत्तो । गुप्तः । गुत्तो । (श) श्लक्ष्णम् । लण्हं । निश्चलः । णिच्चलो । श्च्योतति । चुअइ । (ष) गोष्ठिः । गोट्ठी । षष्ठः । छट्ठो । निष्ठुरः । निट्ठुरो । (स) स्खलितः । खलिओ । स्नेहः । नेहो । ≍क । दु≍खम् । दुक्खं । ≍प । अन्त≍पातः । अंतप्पाओ ।

अनादौ शेषादेशयो-र्द्वित्वम् ॥२॥८६॥ पदस्यानादौ वर्तमानस्य लुग्मात् शेषस्य संयुक्तादेशस्य च द्वित्वं भवति ॥ (शेष) कल्पतरुः । कप्पतरु भुक्तम् । भुत्तं । दुग्धम् । दुद्धं । नग्नः । नग्गो । उल्का । उक्का । अर्कः । अक्को । मूर्खः । मुक्खो । आदेश । दष्टः । डक्को । यक्षः । जक्खो । रक्तः । रग्गो । कृत्तिः । किच्ची । रुक्मी । रुप्पी । क्वचिन्न भवति कृत्स्नः । कसिणो । अनादाविति किं । स्खलितम् । खलिअं । स्थविरः । थेरो । स्तम्भः । खम्भो । द्वयोस्तु द्वित्वमस्ति एवेति न भवति, वृश्चिकः । विंचुओ, भिन्दिपालः । भिण्डिवालो ॥

शक्तमुक्तदष्टरुग्णमृदुत्वे को वा ॥ २ ॥ २ ॥ एषु संयुक्तस्य को वा भवति । शक्तः । सक्को । सत्तो । मुक्तः । मुक्को । मुत्तो । दष्टः । डक्को । 'दशनदष्टदग्धदोलादण्डेत्यादिना' दस्य ड । रुग्णः ।

लुक्खो लुग्गो। 'अनेनाकुणादयः' इति ए लुक्॥ मृदुत्वं। माउक्कं। आत्कृशामृदुकमृदुत्वे वा, इति ऋकारस्य आत्वम्। माउत्तणं॥

क्षः खः क्वचित्तु छझौ ॥ २ ॥ ३ ॥ क्षस्य खो भवति क्वचित्तु छझावपि ॥ क्षयः। खओ। लक्षणम्। लक्खणं। क्वचित्तु छझौ अपि। क्षीणम्। खीणं। छीणं। झीणं। क्षीयते। झिज्जइ ॥

छोऽक्ष्यादौ ॥ २ ॥ १७ ॥ अक्ष्यादिषु संयुक्तस्य क्षस्य छो भवति। खस्यापवादः। अक्षिम्। अच्छि। इक्षुः। उच्छू। प्रवासीक्षौ। । १ । ६५ । इति इकारस्योकारः। लक्ष्मीः। लच्छी। कक्षः। कच्छो। क्षुतम्। छीअं। ईः क्षुते। १। ११२। इति उकारस्य इत्वं। क्षीरम्। छीरं। सदृशः। सरिच्छो। वृक्षः। वच्छो। मक्षिका। मच्छिआ। क्षेत्रम्। छेत्तं। क्षुधा। छुहा। क्षुधो हा इति धो हादेशः। दक्षः। दच्छो। कुक्षिः। कुच्छी। वक्षस्। वच्छं। क्षुण्णः। छुण्णो। कक्षा। कच्छा। क्षारः। छारो। कौक्षेयकम्। कुच्छेअयं। क्षुरः। छुरो। उक्षा। उच्छा। क्षतम्। छयं। सादृश्यम्। सारिच्छं। क्वचित् स्थगित-शब्देऽपि। छइअं॥ आर्षे। इक्खू खीरं। सारिक्ख इत्याद्यपि दृश्यते।

ऋक्षे वा ॥ २ ॥ १६ ॥ ऋक्षशब्दे संयुक्तस्य छो वा भवति। ऋक्षम्। रिच्छं। रिक्खं। ऋक्षः। रिच्छो, रिक्खो। कथं छूढं क्षिप्तमिति। वृक्षक्षिप्तयोरुक्खछूढौ इति भविष्यति॥

क्षमायां कौ ॥ २ ॥ १८ ॥ कौ पृथिव्यां वर्तमाने क्षमाशब्दे संयुक्तस्य छो भवति॥ क्षमा। क्षमा श्लाघारत्नेऽन्त्य व्यञ्जनात् इति अकारागमः छमा। पृथिवी, लाक्षणिकस्यापि क्ष्मादेशस्य भवति॥ क्ष्मा। छमा, काविति किं। खमा क्षान्तिः॥

क्षण उत्सवे ॥ २ ॥ २० ॥ क्षणशब्दे उत्सवाभिधायिनि संयुक्तस्य छो भवति॥ क्षणः। छणो, उत्सव इति किं। खणो॥

ष्कस्कयोर्नाम्नि ॥ २ ॥ ४ ॥ अनयोर्नाम्नि संज्ञायां खो भवति ॥ (ष्क) पुष्करं। पोक्खर। पुष्करिणी। पोक्खरिणी। निष्कम्। निक्खं। (स्क) स्कन्धः। खंधो। स्कन्धावारः। खन्धावारो। अवस्कन्दः। अवक्खन्दो। नाम्नि इति किम्। दुष्करम्। दुक्करं। निष्कम्पम्। निक्कम्पं। निष्क्रयः। निक्कओ। नमस्कार। नमोक्कारो। संस्कृतम्। सक्कयं। सत्कार.। सक्कारो।

शुष्कस्कन्दे वा ॥ २ ॥ ५ ॥ अनयोः ष्कस्कयोः खो वा भवति ॥ शुष्कम्। सुक्खं, सुक्कं। स्कन्दः। खन्दो, कंदो ॥

क्ष्वेटकादौ ॥ २ ॥ ६ ॥ क्ष्वेटकादिषु संयुक्तस्य खो भवति ॥ क्ष्वेटकः। खेडओ। क्ष्वेटकशब्दो विषपर्यायः,। क्ष्वोटकः। खोडओ। स्फोटकः। खोडओ। स्फेटकः। खेडओ। स्फेटिकः। खेडिओ ॥

स्थाणावहरे ॥ २ ॥ ७ ॥ स्थाणौ संयुक्तस्य खो भवति हरश्चेद् वाच्यो न भवति ॥ स्थाणुः। खाणू। अहर इति किम्। स्थाणुः रेखा। थाणुणो रेहा ॥

स्तम्भे स्तो वा ॥ २ ॥ ८ ॥ स्तम्भशब्दे स्तस्य खो वा भवति ॥ स्तम्भः। खंभो, थंभो। काष्ठादिमयः ॥

थठावस्पन्दे ॥ २ ॥ ९ ॥ स्पन्दाऽभाववृत्तौ स्तम्भे स्तस्य थठौ भवतः। स्तम्भः। थंभो, ठंभो ॥ स्तम्भ्यते। थंभिज्जइ। ठंभिज्जइ ॥

रक्ते गो वा ॥ २ ॥ १० ॥ रक्तशब्दे संयुक्तस्य गो वा भवति ॥ रक्तः। रग्गो। रत्तो ॥

शुल्के ङ्गो वा ॥ २ ॥ ११ ॥ शुल्कशब्दे संयुक्तस्य ङ्गो भवति ॥ शुल्कम्। सुङ्गं, सुक्कं ॥

क्तिचत्वरे चः ॥ २ ॥ १२ ॥ अनयोः संयुक्तस्य चो भवति ॥ कृत्तिः । किच्ची । चत्वरम् । चच्चरं ॥

त्योऽचैत्ये ॥ १ ॥ १३ ॥ चैत्यवर्जिते: त्यस्य चो भवति । सत्यम् । सच्चं । प्रत्यय. । पच्चओ ॥ अचैत्य इति किम् ॥ चइत्तं ॥

प्रत्यूषे षश्च हो वा ॥ २ ॥ १४ ॥ प्रत्यूषे त्यस्य चो भवति तत्संनियोगे च षस्य हो वा भवति । प्रत्यूषः॥ पच्चूहो । पच्चूसो ॥

त्वथ्वद्ध्वां चछजझाः क्वचित् ॥ २ ॥ १५ ॥ एषां यथा-संख्यम् एते क्वचिद् भवन्ति ॥ भुक्त्वा । भोच्चा । ज्ञात्वा । णच्चा । श्रुत्वा । सोच्चा ॥ पृथ्वी । पिच्छी ॥ विद्वान् । विज्जं ॥ बुद्ध्वा । बुज्झा ॥

मोच्चा सयलं पिच्छि विज्जं बुज्झा अणण्णयग्गामि ।
चइऊण तवं काउं सन्ती पत्तो सिवं परमं ॥

वृश्चिके श्चेञ्चुर्वा ॥ २ ॥ १६ ॥ वृश्चिके श्चे' स स्वरस्य स्थाने ञ्चुरादेशो वा भवति । छस्यापवादः ॥ वृश्चिकः । विञ्चुओ । विंचुओ ॥ पक्षे विञ्छिओ ॥ 'वक्रादावन्तः, इति अनुस्वारागमः ।

ह्रस्वात् थ्यश्चत्सप्साम् अनिश्चले ॥ २ ॥ २१ ॥ ह्रस्वात् परेषां थ्यश्चत्सप्सां छो भवति ॥ निश्चले तु न भवति ॥ (थ्य) पथ्यम् पच्छं । पथ्या । पच्छा । मिथ्या । मिच्छा । (श्च) पश्चिमम् । पच्छिमं । आश्चर्यम् । अच्छेरं । वल्ल्युत्कर पर्यन्ताश्चर्ये वा इति एकारादेशः पश्चात् । पच्छा (त्स) उत्साहः । उच्छाहो । मत्सरः । मच्छलो । मच्छरो । संवत्सरः । संवच्छलो । संवच्छरो । चिकित्सति । चिइच्छइ । (प्स) लिप्सते । लिच्छइ । जुगुप्सति । जुगुच्छइ । अप्सरा । अच्छरा । ह्रस्वादितिकिम् । उत्सारितः । ऊसारिओ । अनिश्चल इति किम् । निश्चलः । निच्चलो । आर्षे तथ्ये चोऽपि । तथ्यम् । तच्चं ।

सामर्थ्योत्सुकोत्सवे वा ॥ २ ॥ २२ ॥ एषु संयुक्तस्य छो वा भवति ॥ सामर्थ्यम् । सामच्छं । सामत्थं ॥ उत्सुकः । उच्छुओ । ऊसुओ ॥ उत्सवः । उच्छवो । ऊसवो ।

स्पृहायाम् ॥ २ ॥ २३ ॥ स्पृहाशब्दे संयुक्तस्य छो भवति ॥ फस्यापवादः ॥ स्पृहा ॥ छिहा ॥ बहुलाधिकारात् क्वचिदन्यदपि । निस्पृहः । निप्पिहो ॥

द्यय्यर्यां जः ॥ २ ॥ २४ ॥ एषां संयुक्तानां जो भवति ॥ (द्य) मद्यम् । मज्जं । अवद्यम् । अवज्जं । वैद्यः । वेज्जो । द्युतिः । जुई । द्योतः । जोओ । (य्य) जय्यः । जज्जो । शय्या । सेज्जा । (र्य) भार्या- भज्जा । चौर्यसमत्वात् भारिआ । कार्यम् । कज्ज । वर्यम् । वज्जं । पर्यायः । पज्जाओ । पर्याप्तम् । पज्जत्तं । मर्यादा । मज्जाया ।

अभिमन्यौ जञ्जौ वा ॥ २ ॥ २५ ॥ अभिमन्यौ संयुक्तस्य जो ञ्जश्च वा भवति ॥ अभिमन्युः । अहिमज्जू ॥ अहिमञ्जू । पक्षे अहिमन्नू । अभिग्रहणादिह न भवति । मन्नू ॥

साध्वसध्यह्यां झः ॥ २ ॥ २६ ॥ साध्वसे ध्यह्ययोश्च संयुक्तस्य झो भवति ॥ साध्वसम् । सज्झसं । (ध्य) बध्यते । वज्झए । ध्यानम् । झाणं । उपाध्यायः । उवज्झाओ । स्वाध्यायः । सज्झाओ । साध्यम् । सज्झं । विन्ध्यः । विज्झो । (ह्य) सह्यः । सज्झो । मह्यं । मज्झं । गुह्यम् । गुज्झं । नह्यति । णज्झइ । इत्यादि ।

ध्वजे वा ॥ २ ॥ २७ ॥ ध्वजशब्दे संयुक्तस्य झो वा भवति ॥ ध्वजः । झओ । धओ ॥

इन्धौ झा ॥ २ ॥ २८ ॥ इन्धो धातौ संयुक्तस्य झा इत्यादेशो भवति ॥ समिन्धते । समिज्झाइ । विन्धते । विज्झाइ ॥

वृत्तप्रवृत्तमृत्तिकापत्तनकदर्थिते टः ॥ २ ॥ २९ ॥ एषु संयुक्तस्य टो भवति ॥ वृत्तः । वट्टो । प्रवृत्तः । पवट्टो । मृत्तिका । मट्टिया । पत्तनम् । पट्टणं । कदर्थित । कवट्टिओ ॥

र्तस्याऽधूर्तादौ ॥ २ ॥ ३० ॥ र्तस्य टो भवति धूर्तादीन् वर्जयित्वा ॥ कैवर्तः । केवट्टो । वर्ति । वट्टी । जर्तः । जट्टो । प्रवर्तते । पयट्टइ । वर्तुलं । वट्टुलं । राजवर्त्तकम् । रायवट्टयं । नर्तकी । नट्टई । संवर्तितं । संवट्टिअं ॥ अधूर्तादाविति किम् । धूर्त्तः । धुत्तो । कीर्ति । कित्ती । वार्ता । वत्ता । आवर्त्तनम् । आवत्तणं । निवर्तनम् । निवत्तणं । प्रवर्तनम् । पवत्तणं । संवर्तनम् । संवत्तणं । आवर्तकः । आवत्तओ । निवर्तकः । निवत्तओ । प्रवर्तकः । पवत्तओ । संवर्तकः । संवत्तओ । वर्तिका । वत्तिआ । वार्तिक । वत्तिओ । कार्तिकः । कत्तिओ । उत्कर्तितः । उक्कत्तिओ । कर्तरि । कत्तरी । मूर्तिः । मुत्ती । मूर्त्तः । मुत्तो । मुहूर्तः । मुहुत्तो । बहुलाधिकारात् वार्ता । वट्टा । वत्ता ।

ठोऽस्थिविसंस्थुले ॥२॥ ३२ ॥ अनयोः संयुक्तस्य ठो भवति ॥ अस्थि । अट्ठी । विसंस्थुलम् । विसंठुलं ॥

स्त्यानचतुर्थार्थे वा ॥ २ ॥ ३३ ॥ एषु संयुक्तस्य ठो वा भवति ॥ स्त्यानं । ठीणं । थीणं ॥ चतुर्थः । चउट्ठो । चउत्थो । अर्थः । अट्ठो । प्रयोजनम् । अर्थः । अत्थो । धनम् ॥

ष्टस्याऽनुष्ट्रेष्टासंदष्टे ॥ २ ॥ ३४ ॥ उष्ट्रादिवर्जिते ष्टस्य ठो भवति ॥ यष्टिः । लट्ठी । मुष्टिः । मुट्ठी । दृष्टिः । दिट्ठी । सृष्टिः । सिट्ठी । पृष्ठः । पुट्ठो । कष्टम् । कट्ठं । सुराष्ट्राः । सुरट्ठा । इष्टः । इट्ठो । अनिष्टम् । अणिट्ठं । अनुष्ट्रेष्टासंदष्ट इति किम् । उष्ट्रः । उट्टो । इष्टा चूर्णमिव । इट्टा चुण्णं व्व । संदष्टः । संदट्टो ।

गर्ते डः ॥ २ ॥ ३५ ॥ गर्त्तशब्दे संयुक्तस्य डो भवति ॥ टापवादः । गर्तः । गड्डो । गर्ता । गड्डा ॥

संमर्द-वितर्दि-विच्छर्द-च्छर्दि-कपर्द-मर्दिते र्दस्य ॥ २॥ ३६ ॥ एषु र्दस्य डो भवति ॥ संमर्दः । संमड्डो । वितर्दिः । विअड्डी । विच्छर्दः । विच्छड्डो । च्छर्दिः । छड्डी । कपर्दः । कवड्डो । मर्दित. । मड्डिओ । संमर्दित. । संमड्डिओ ॥

गर्दभे वा ॥ २ ॥ ३७ ॥ गर्दभे र्दस्य डो वा भवति ॥ गर्दभः । गड्डहो । गद्दहो ॥

कन्दरिकाभिन्दिपाले ण्डः ॥ २ ॥ ३८ ॥ अनयोः संयुक्तस्य ण्डो भवति ॥ कन्दरिका । कण्डलिआ । भिन्दपाल. । भिण्डिवालो ॥

स्तब्धे ठढौ ॥ २ ॥ ३६ ॥ स्तब्धे संयुक्तयोर्यथाक्रमं ठढौ भवतः । स्तब्धः । ठड्ढो ।

दग्धविदग्धवृद्धिवृद्धे ढः ॥ २ ॥ ४० ॥ एषु संयुक्तस्य ढो भवति । दग्धः । दड्ढो । विदग्ध. । वियड्ढो । वृद्धिः । वुड्ढी । वृद्धः । वुड्ढो । क्वचिन्न भवति । वृद्धकविनिरूपितम् । विद्धकइ-निरूविअं ।

श्रद्धर्द्धि-मूर्धार्धेऽन्ते वा ॥ २ ॥ ४१ ॥ एषु संयुक्तस्य अन्ते वर्त्तमानस्य ढो वा भवति । श्रद्धा सड्ढा । सद्धा । ऋद्धि । इड्ढी । रिद्धी । मूर्धा । मुड्ढा । मुद्धा । अर्धम् । अड्ढं । अद्धं ।

म्नज्ञो र्णः ॥२॥ ४२ ॥ अनयोर्णो भवति । (म्न) निम्नम् । निण्ण । प्रद्युम्न । पज्जुण्णो । ज्ञानम् । णाणं । संज्ञा । सण्णा । प्रज्ञा । पण्णा । विज्ञानम् । विण्णाणं ।

पञ्चाशत्पञ्चदशदत्ते ॥ २ ॥ ४३ ॥ एषु संयुक्तस्य णो वा भवति । पञ्चाशत् । पण्णासा । स्त्रियामादविद्युत. इत्याकारादेश. । पञ्चदश । पण्णरह । दत्तम् । दिण्णं । इः स्वप्नादौ इत्यस्य इत्वम् ।

मन्यौ न्तो वा ॥ २ ॥ ४४ ॥ मन्युशब्दे संयुक्तस्य न्तो वा भवति। मन्युः। मन्तू। मन्नू।

स्तवे वा ॥ २ ॥ ४६ ॥ स्तवशब्दे स्तस्य थो वा भवति। स्तवः। थवो। तवो।

पर्य्यस्ते थटौ ॥ २ ॥ ४७ ॥ पर्यस्ते स्तस्य पर्यायेण थटौ भवतः। पर्यस्तः। पल्लत्थो। पर्य्यस्त – पर्याण – सौकुमार्ये ल्लः इति र्यस्य ल्लः। पल्लट्टो।

वोत्साहे थो हश्च रः ॥ २ ॥ ४८ ॥ उत्साहशब्दे संयुक्तस्य थो वा भवति तत्संनियोगे च हस्य रः। उत्साहः। उत्थारो। उच्छाहो।

आश्लिष्टे लधौ ॥ २ ॥ ४९ ॥ आश्लिष्टे संयुक्तयोर्यथासंख्यं ल ध इत्यादेशौ भवतः। आश्लिष्ट। आलिद्धो।

चिह्ने न्धो वा ॥ २ ॥ ५० ॥ चिह्ने संयुक्तस्य न्धो वा भवति। एह्णापवादः। पक्षेऽसोऽपि। चिह्नम्। चिन्धं। इन्ध। चिण्हं।

भस्मात्मनोः पो वा ॥ २ ॥ ५१ ॥ अनयोः संयुक्तस्य पो वा भवति। भस्मा। भप्पो। भस्सो। आत्मा। अप्पा। अप्पाणो। पक्षे। आत्मन्। अत्ता।

ड्मक्मोः ॥ २ ॥ ५२ ॥ ड्मक्मोः पो वा भवति। कुड्मलं। कुम्पलम्। रुक्मिणी। रुप्पिणी। क्वचित् चमोऽपि। रुक्मी। रुच्मी। रुप्पी।

भीष्मेष्मः ॥ २ ॥ ५४ ॥ भीष्मे ष्मस्य फो भवति। भीष्म.। भिप्फो।

श्लेष्मणि वा ॥ २ ॥ ५५ ॥ श्लेश्मशब्दे ष्मस्य फो वा भवति। श्लेष्मा। सेफो, सिलिम्हो।

ह्वो भो वा ॥ २ ॥ ५७ ॥ ह्वस्य भो वा भवति। जिह्वा। जिब्भा। जीहा।

वा विह्वले वौ वश्च ॥ २ ॥ ५८ ॥ विह्वले ह्वस्य भो वा भवति तत्संन्नियोगे च विशब्दे वस्य वा भो भवति। विह्वलः। भिब्भलो। विब्भलो,। विहलो ॥

वोर्ध्वे ॥ २ ॥ ५९ ॥ ऊर्ध्व शब्दे संयुक्तस्य भो वा भवति। ऊर्ध्वम्। उब्भं। उद्धं।

कश्मीरे म्भो वा ॥ २ ॥ ६० ॥ कश्मीर शब्दे संयुक्तस्य म्भो वा भवति। कश्मीरा। कम्भारा। कम्हारा ॥

न्मो मः ॥२॥ ६१ ॥ न्मस्य मो भवति। अधो लोपापवादः। जन्मन्। जम्मो। मन्मथः। वम्महो। मन्मथे वः । १। २४२। इति मकारस्य वकारादेशः। सन्मन्। सम्मणं।

ग्मो वा ॥ २ ॥ ६२ ॥ ग्मस्य मो वा भवति। युग्मम्। जुग्मं। जुग्गं। तिग्मम्। तिम्मं। तिग्गं।

ब्रह्मचर्य तूर्य सौन्दर्य शौण्डीर्ये र्यो रः ॥ २ ॥ ६३ ॥ एषु र्यस्य रो भवति। जापवादः। ब्रह्मचर्यम्। वम्हचेरं। चौर्यसमत्वाद्। वम्हचरियं। तूर्यम्। तूरं। सौन्दर्यम्। सुन्देरं। शौण्डीर्यम्। सोण्डीरं।

धैर्ये वा ॥ २ ॥ ६४ ॥ धैर्य शब्दे र्यस्य रो वा भवति। धैर्यम्। धीरं। धिज्जं। सूरो सुज्जो इति तु सूर सूर्य प्रकृति भेदात्।

पर्यस्तपर्याणसौकुमार्ये ल्लः ॥ २ ॥ ६८ ॥ एषु र्यस्य ल्लो भवति। पर्यस्तम्। पल्लट्टं। पल्लत्थं। पर्याणम्। पल्लाणं। सौकुमार्यम्। सोअमल्लं।

उतो मुकुलादिषु ॥ १ ॥ १०७ ॥ इति उकारस्य अत्वम्। पल्लङ्को इति तु पल्यङ्क शब्दस्य यलोपे द्वित्वे च। पलिअंको इत्यपि चौर्य समत्वात् ।

बृहस्पति वनस्पत्योः सो वा ॥ २ ॥ ६९ ॥ अनयोः संयुक्तस्य सो वा भवति। बृहस्पतिः। बहस्सई। बहप्फई। भयस्सई। भयप्फई। वनस्पतिः। वणस्सई। वणप्फई।

बाष्पे होऽश्रुणि ॥ २ ॥ ७० ॥ बाष्पशब्दे संयुक्तस्य हो भवति। अश्रुण्यभिधेये। बाष्पः। बाहो। नेत्र जलम्। अश्रुणीति किं? बप्फो। उष्मा।

कार्षापणे ॥ २ ॥ ७१ ॥ कार्षापणे संयुक्तस्य हो भवति। कार्षापणः। काहावणो। कथं कहावणो ह्रस्व संयोगे १-८४ इति पूर्वमेव ह्रस्वत्वे पश्चादादेशे। कर्षापण शब्दस्य वा भविष्यति।

पक्ष्म-श्म-ष्म-स्म-ह्मां म्हः ॥ २ ॥ ७४ ॥ पक्ष्म शब्द सम्बन्धिन संयुक्तस्य श्मष्म स्म ह्मां च मकाराक्रान्तो हकार आदेशो भवति। पक्ष्माणि। पम्हाइं। पक्ष्मल-लोचना। पम्हल-लोअणा। कुश्मानः। कुम्हाणो। कश्मीराः कम्हारा। (ष्म) ग्रीष्म। गिम्हो। ऊष्मा। उम्हा (स्म) अस्मादृशः। अम्हारिसो। विस्मयः। विम्हओ। (ह्म) ब्रह्मा। बम्हा। सुह्म। सुम्हो। ब्राह्मण। बम्हणो। ब्रह्मचर्यम्। बम्हचेरं। क्वचिद् म्भोऽपि दृश्यते। बम्हणो। बम्भचेरं। श्लेष्मा-सिम्भो। क्वचिन्न भवति। रश्मि। रस्सी। स्मर। सरो।

सूक्ष्म-श्न-ष्ण-स्न ह्न ह्ण क्ष्णां ण्हः ॥ २ ॥ ७५ ॥ सूक्ष्म शब्द सम्बन्धिन संयुक्तस्य श्नष्णस्नह्नह्णक्ष्णां च णकारा क्रान्तो हकार आदेशो भवति। सूक्ष्मं। सण्हं। अदूतः सूक्ष्मेवा। १। ११८। इति सू स्थाने सः। (श्न) प्रश्न। पण्हो। शिश्न। सिण्हो। (ष्ण)

विष्णुः। विण्हू। जिष्णुः। जिण्हू। कृष्णः। कण्हो। उष्णीषम्। उण्हीसं। (स्न) ज्योत्स्ना। जोण्हा। स्नातः। ण्हाओ। प्रस्नुतः। पण्हुओ। (ह्न) वह्निः। वण्ही। जह्नुः। जण्हू। (ह्ण) पूर्वाह्णः। पुव्वण्हो। अपराह्णः। अवरण्हो। (क्ष्ण) श्लक्ष्णम्। सण्हं। अदूतः सूक्ष्मे वा इति सूस्थाने सः। तीक्ष्णं। तिण्हं। विप्रकर्षे तु कृष्णकृत्स्न शब्दयो. कसणो। कसिणो।

मध्याह्ने हः ॥ २ ॥ ८४ ॥ मध्याह्ने हस्य लुग् वा भवति। मध्याह्नः। मज्झन्नो, मज्झण्हो।

ह्लो ल्हः ॥ २ ॥ ७६ ॥ ह्लः स्थाने लकाराक्रान्तो हकारो भवति। कह्लारम्। कल्हारं। प्रह्लादः। पल्हाओ।

सर्वत्र लवरामवन्द्रे ॥ २ ॥ ७९ ॥ इत्युक्तम्। अत्र च द्व इत्यादि संयुक्तानाम् उभयप्राप्तौ यथादर्शनं लोपः। क्वचिदूर्ध्वं। उद्विग्नः। उव्विग्गो। द्विगुणः। विउणो। द्वितीयः। बीओ। कल्मषम्। कम्मसं। सर्वम्। सव्वं। शुल्बम्। सुब्बं। क्वचित्तु अधः। काव्यम्। कव्वं। कुल्या। कुल्ला। माल्यम्। मल्लं। द्विपः। दिओ। द्विजातिः। दुआई। क्वचित्पर्यायेण। द्वारम्। दारं। वारं। उद्विग्नः। उव्विग्गो, उव्विण्णो। अवन्द्र इति किम्? वन्द्रं। संस्कृतसमोऽयं प्राकृतशब्दः। अत्रोत्तरेण विकल्पोऽपि न भवति, निषेधसामर्थ्यात्।

द्रे रो नवा ॥ २ ॥ ८० ॥ द्रशब्दे रेफस्य वा लुग् भवति। चन्द्रः। चंदो, चंद्रो। रुद्रः। रुदो, रुद्रो। भद्रम्। भदं, भद्रं। समुद्रः। समुद्दो, समुद्रो। ह्रदशब्दस्य स्थितिपरिवृत्तौ द्रह इति रूपम्, तत्र द्रहो, दहो। केचिद् रलोपं नेच्छंति। द्रहशब्दमपि कश्चित् संस्कृतं मन्यते। वोद्रहादयस्तु तरुणपुरुषादिवाचका नित्यं रेफसंयुक्ता देश्या एव। शिक्षन्ताम् तरुण्यः। सिक्खन्तु वोद्रहीओ। तरुणह्रदे पतिताः। वोद्रह-द्रहम्मि पडिआ।

धात्र्याम् ॥ २ ॥ ८१ ॥ धात्री शब्दे रस्य लुक् वा भवति। धात्री। धत्ती। ह्रस्वात्प्रागेव रलोपे धाई। पक्षे, धारी।

तीक्ष्णे णः ॥ २ ॥ ८२ ॥ तीक्ष्णशब्दे णस्य लुग् वा भवति। तीक्ष्णम्। तिक्खं, तिण्हं।

ज्ञो ञः ॥ २ ॥ ८३ ॥ ज्ञसम्बन्धिनो ञकारस्य लुग् वा भवति। ज्ञानम्। जाणं, णाणं। सर्वज्ञः। सव्वज्जो, सव्वण्णू। आत्मज्ञः। अप्पज्जो, अप्पण्णू। दैवज्ञः। दइवज्जो, दइवण्णू। इंगितज्ञः। इंगिअज्जो इंगिअण्णू। मनोज्ञम्। मणोज्जं, मणोण्णं। अभिज्ञः अहिज्जो, अहिण्णू। प्रज्ञा। पज्जा, पण्णा। अज्ञा। अज्जा, अण्णा। संज्ञा। संजा, सण्णा। क्वचिन्न भवति। विज्ञानम्। विण्णाणं।

दशार्हे ॥२॥८५॥ पृथग् योगात् वेति निवृत्तम्, दशार्हे हस्य लुक् भवति। दशार्हः। दसारो।

आदेः श्मश्रुश्मशाने ॥२॥८६॥ अनयोरादेर्लुक् भवति। श्मश्रुः। मासू मंसू, वक्रादावन्तः।१।२६। इति अनुस्वारागमः मस्सू। श्मशानम्। मसाणं। आर्षे श्मशानशब्दस्य सीआणं। सुसाणं।

श्चो हरिश्चन्द्रे ।२॥८७। हरिश्चन्द्रशब्दे श्च इत्यस्य लुग् भवति। हरिश्चन्द्रः। हरिअंदो।

रात्रौ वा ॥२॥८८॥ रात्रिशब्दे संयुक्तस्य लुग् वा भवति। रात्रिः। राई, रत्ती।

द्वितीयतुर्ययोरुपरि पूर्वः ॥२॥९०॥ द्वितीयतुर्ययो द्वित्व-प्रसङ्गे उपरि पूर्वो भवतः। द्वितीयस्योपरि प्रथमः। चतुर्थस्योपरि तृतीय इत्यर्थः। शेष.। व्याख्यानम्। वक्खाणं। व्याघ्रः। वग्घो। मूर्च्छा। मुच्छा। निर्झरः। निज्झरो। कष्टम्। कट्ठं। तीर्थम्। तित्थं। निर्धनः।

निक्खणो। गुल्फम्। गुप्फं। निर्भरः। निब्भरो। आदेशः। यक्षः। जक्खो। घस्य नास्ति। अक्षिः। अच्छी। मध्यं। मज्झं। स्पृष्टिः। पट्ठी। वृद्धः। वुड्ढो। हस्त। हत्थो। आश्लिष्टः। आलिद्धो। आश्लिष्टे लद्धो इति ष्टस्य द्धः। पुष्पम्। पुप्फं। विह्वलः। भिब्भलो। विह्वले वो भश्च। इति वस्य भः। तैलादौ ॥२॥९८॥ द्वित्वे उदूखलम्। ओक्खलं। सेवादौ ॥२॥९९॥ नखः। नक्खा, नहा। समासे कपिध्वजः। कइद्धओ, कइधओ। द्वित्व इत्येव। ख्यातः। खाओ।

दीर्घे वा ॥२॥९१॥ दीर्घशब्दे शेषस्य घस्य उपरि पूर्वो वा भवति। दीर्घः। दिग्घो, दीहो।

न दीर्घानुस्वारात् ॥२॥९२॥ दीर्घानुस्वाराभ्यां लाक्षणिकाभ्याम् अलाक्षणिकाभ्यां च परयोः शेषादेशयोर्द्वित्वं न भवति। क्षिप्तः। छूढो। निश्वासः। नीसासो। स्पर्शः। फासो। अलाक्षणिकः। पार्श्वम्। पासं। शीर्षम्। सीसं। ईश्वरः। ईसरो। द्वेष्यः। वेसो। लास्यम्। लासं। आस्यम्। आसं। प्रेष्य. पेसो। अवमाल्यम्। ओमालं। आज्ञा। आणा। आज्ञप्तिः। आणत्ती। आज्ञपनम्। आणवणं। अनुस्वारात्। त्र्यस्रम्। तंसं। अलाक्षणिकः। संध्या। संझा। विन्ध्यः। विंझो। कांस्यालः। कंसालो।

र्होः ॥२॥९३॥ रेफहकारयोर्द्वित्वं न भवति। रेफः शेषो नास्ति। आदेशः। सौन्दर्यम्। सुन्देरं। ब्रह्मचर्यम्। बम्हचेरं। पर्यन्तम्। पेरंतं। शेषस्य हस्य। विह्वलः। विहलो। आदेशस्य। कार्षापणः। कहावणो।

धृष्टद्युम्ने णः ॥२॥९४॥ धृष्टद्युम्नशब्दे आदेशस्य णस्य द्वित्वं न भवति। धृष्टद्युम्नः। धट्ठज्जुणो।

कर्णिकारे वा ॥२॥९५॥ कर्णिकारशब्दे शेषस्य णस्य द्वित्वं न भवति। कर्णिकारः। कणिआरो। कण्णिआरो।

दृप्ते ॥२॥९६॥ दृप्तशब्दे शेषस्य द्वित्वं न भवति। दृप्त-सिंहेन। दरिअ-सीहेण।

समासे वा ॥२॥९७॥ शेषादेशयोः समासे द्वित्वं वा भवति। नदीग्रामः। नइग्गामो, नइगामो। कुसुमप्रकरः। कुसुमप्पयरो। कुसुमपयरो। देवस्तुतिः। देवत्थुई, देवथुई। हरस्कंदौ। हरक्खंदा, हरखन्दा। आलानस्तम्भः। आणालक्खम्भो, आणालखंभो। बहुलाधिकाराद् अशेषादेशयोरपि। सपिपासः। सप्पिवासो। सपिवासो। बद्धफलः। बद्धप्फलो। बद्धफलो। मलय शिखर खण्डम्। मलय सिहर क्खण्डं, मलय सिहर खंडं प्रमुक्तम्। पम्मुक्कं, पमुक्कं। अदर्शनम्। अद्दंसणं, अदंसणं। प्रतिकूलम्। पडिक्कूलं, पडिकूलं। त्रैलोक्यम्। तेल्लोक्कं, तेलोक्कं इत्यादि।

तैलादौ ॥२॥९८॥ तैलादिषु अनादौ यथादर्शनम् अन्त्यस्यानन्त्यस्य च व्यञ्जनस्य द्वित्वं भवति। तैलम्। तेल्लं। मण्डूकः। मण्डुक्को। विचकिलम्। वेइल्लं। ऋजुः। उज्जू। व्रीडा। विड्डा। प्रभूतम्। बहुत्तं। अनन्त्यस्य। स्रोतस्। सोत्तं। प्रेमन्। पेम्मं। यौवनम्। जुव्वणं। आर्षे प्रतिस्रोतः। पडिसोओ। विस्रोतसिका। विस्सोअसिआ।

सेवादौ वा ॥२॥९९॥ सेवादिषु अनादौ यथादर्शनम् अन्त्यस्यानन्त्यस्य च द्वित्वं वा भवति। सेवा। सेव्वा, सेवा। नीडम्। नेड्डं, नीडं। नखाः। नक्खा, नहा। निहितः। निहित्तो, निहिओ। व्याहृतः। वाहित्तो, वाहिओ। मृदुकम्। माउक्कं, माउअं। एकः। एक्को, एओ। कुतूहलम्। कोउहल्लं, कोउहलं। व्याकुलः। वाउल्लो, वाउलो। स्थूलः। थुल्लो, थोरो। हूतम्। हुत्तं, हूअं। दैवम्। दइव्वं, दइवं। तूष्णीकः। तुण्हिक्को, तुण्हिओ। मूकः। मुक्को, मूओ। स्थाणुः। खण्णू, थाणू। स्त्यानम्। थिण्णं, थीणं। अनन्त्यस्य। अस्मदीयम्। अम्हक्केरं, अम्हकेरं। तदेव। तं च्चेअ, तं चेअ। स एव। सो च्चिअ। सो चिअ।

शार्ङ्गे ङात्पूर्वोऽत् ॥२॥१००॥ शार्ङ्गे ङात्पूर्वोऽदागमो भवति। शार्ङ्गम्। सारंगं।

क्ष्मा-श्लाघा-रत्नेऽन्त्यव्यञ्जनात् ॥२॥१०१॥ एषु संयुक्तस्य यद् अन्त्यव्यञ्जनं तस्मात्पूर्वोऽकारागमो वा भवति। क्ष्मा। छमा। श्लाघा। सलाहा। रत्नम्। रयणं। आर्षे सूक्ष्मेऽपि सुहुमं।

स्नेहाग्न्योर्वा ॥२॥१०२॥ अनयोः संयुक्तस्य अन्त्यव्यञ्जनात्पूर्वोऽकारागमो वा भवति। स्नेहः। सणेहो, नेहो। अग्निः। अगणी, अग्गी।

प्लक्षे लात् ॥२॥१०३॥ प्लक्ष शब्दे संयुक्तस्य अन्त्यव्यञ्जनात् लात्पूर्वोऽदागमो भवति। प्लक्षः। पलक्खो।

र्ह श्री ह्री कृत्स्न क्रिया दिष्ट्यास्वित् ॥२॥१०४॥ एषु संयुक्तस्य अन्त्यव्यञ्जनात्पूर्व इकाराऽऽगमो भवति। (र्ह) अर्हति। अरिहइ। अर्हा। अरिहा। गर्हा। गरिहा। बर्हः। बरिहो। श्री। सिरी। ह्री। हिरी। ह्रीतः। हिरीओ। अह्रीकः। अहिरीओ। कृत्स्नः। कसिणो। क्रिया। किरिआ। आर्षे तु। हयम् ज्ञानम् क्रिया हीनम्। हयं नाणं किया हीणं। दिष्ट्या। दिट्ठिआ।

र्श-र्ष-तप्त-वज्रे वा ॥२॥१०५॥ र्शर्षयोस्तप्तवज्रयोश्च संयुक्तस्य अन्त्यव्यञ्जनात्पूर्व इदागमो वा भवति। (र्श) आदर्शः। आयरिसो, आयंसो। सुदर्शनः। सुदरिसणो, सुदंसणो। दर्शनम्। दरिसणं, दंसणं। (र्ष) वर्षम्। वरिसं, वासं। वर्षा। वरिसा, वासा। वर्षशतम्। वरिससयं, वास सयं। व्यवस्थितविभाषया क्वचिन्नित्यं। परामर्षः। परामरिसो। हर्षः। हरिसो। अमर्षः। अमरिसो। तप्तः। तविओ, तत्तो। वज्रम्। वइरं वज्जं।

लात् ॥२॥१०६॥ संयुक्तस्य अन्त्यव्यञ्जनात् लात्पूर्व इद् भवति। क्लिन्नम्। किलिन्नं। क्लिष्टम्। किलिट्ठं। श्लिष्टम्।

सिलिट्ठं । प्लुष्टम् । पिलुट्ठं । प्लोषः । पिलोसो । श्लेष्मा । सिलिम्हो । श्लेषः । सिलेसो । शुक्लम् । सुक्किलम् । सेवादौ वा इति दित्व विकल्पात् पक्षे के लोपे सति । सुइलं । श्लोकः । सिलोओ । क्लेशः । किलेसो । आम्लम् । अम्बिलं । ग्लायति । गिलाइ । ग्लानम् । गिलाणं । म्लायति । मिलाइ । म्लानम् । मिलाणं । क्लाम्यति । किलम्मइ । क्लान्तम् । किलन्तं । क्वचिन्न भवति । क्लमः । कमो । प्लवः । पवो । विप्लवः । विप्पवो । शुक्ल पक्षः । सुक्क पक्खो । उत्प्लावयति । उप्पावेइ ।

स्याद् भव्य चैत्य चौर्यसमेषु यात् ॥२॥ १०७॥ स्यादादिषु चौर्य शब्देन समेषु च संयुक्तस्य यात्पूर्व इद् भवति । स्यात् । सिआ । स्याद्वादः । सिआवाओ । भव्यः । भविओ । चैत्यम् । चेइअं । चौर्यसमः । चोर्यम् । चोरिअं । स्थैर्यम् । थेरिअं । भार्या भारिआ । गाम्भीर्यम् । गम्भीरिअं गहीरिअं । आचार्यः । आयरिओ । सौन्दर्यम् । सुन्दरिअं । शौर्यम् । सोरिअं । वीर्यम् । वीरिअं । वर्यम् । वरिअं । सूर्यः । सूरिओ । धैर्यम् । धीरिअं । ब्रह्मचर्यम् । बम्हचरिअं

स्निग्धे वादितौ ।'२॥ १०९ ॥ स्निग्धे संयुक्तस्य नात्पूर्वौ अदितौ वा भवत । स्निग्धम् । सणिद्धं, सिणिद्धं, पक्षे । निद्धं ।

कृष्णे वर्णे वा ॥२॥ ११०॥ वर्णवाचिनि कृष्णे संयुक्तस्य अन्त्यव्यञ्जनात्पूर्वौ अदितौ वा भवतः । कृष्णः । कसणो, कसिणो कण्हो । वर्ण इति किम् ? कृष्णः । कण्हो विष्णो ।

उच्चार्हति ॥२॥१११॥ अर्हत् शब्दे संयुक्तस्य अन्त्यव्यञ्जनात्पूर्वौ उद् अदितौ च भवतः । अर्हन् । अरुहो, अरहो अरिहो अर्हन्तः । अरुहंतो, अरहंतो, अरिहंतो ।

तन्वीतुल्येषु ॥२॥११३॥ उकारान्ता ङीप्रत्ययान्तास्तन्वीतुल्याः, एषु संयुक्तस्य अन्त्यव्यञ्जनात्पूर्व उकारो भवति । तन्वी । तणुवी ।

लघ्वी । लहुवी । गुर्वी । गरुवी । बह्वी । बहुवी । पृथ्वी । पुहुवी । मृद्वी । मउवी । क्वचिदन्यत्रापि । स्रुघ्नं । सुरुग्घं । आर्षे सुदमं । सुहुमं ।

एकस्वरे श्वःस्वे ॥२॥११४॥ एक स्वरे पदे यौ श्वस् स्व इत्ये तौ तयोरन्त्यव्यञ्जनात्पूर्व उद् भवति । श्वःकृतं । सुवेकयं । एत शय्यादौ, इति वकाराकारस्य एत्वम् । स्वे जना. । सुवे जणा । एक स्वर इति किम् ? स्वजनः । सयणो ।

ज्यायामीत् ॥ २ ॥ ११५ ॥ ज्याशब्देऽन्त्यव्यञ्जनात्पूर्व ईद् भवति । ज्या । जीआ ।

करेणू–वाराणस्योरणोर्व्यत्ययः ॥ २ ॥ ११६ ॥ अनयो रेफणकारयोर्व्यत्ययः स्थितिपरिवृत्तिर्भवति । करेणुः । कणेरू । वाराणसी । वाणारसी । स्त्रीलिङ्गनिर्देशात् पुंसि न भवति । एष: करेणुः । एसो करेणू ।

आलाने लनोः ॥२॥११७॥ आलानशब्दे लनोर्व्यत्ययो भवति । आलानः । आणालो । आलान स्तम्भः । आणालक्खंभो ।

अचलपुरे चलोः ॥२॥११८॥ अचलपुरशब्दे चलयोर्व्यत्ययो भवति । अचलपुरम् । अलचपुरं ।

ह्रदे हदोः ॥ २ ॥ १२० ॥ ह्रद शब्दे हकार दकारयोर्व्यत्ययो भवति । ह्रदः । द्रहो । द्रे रोनवा ॥२॥८०॥ इति रेफलोपाभावः । आर्षे । ह्रदे महापुण्डरीकः । हरए महपुण्डरिए ।

हरिताले रलोर्न्वा ॥२॥१२१॥ हरिताल शब्दे रकारलकारयोर्व्यत्ययो वा भवति । हरितालः । हलिआरो हरिआलो ।

लघुके लहोः ॥२॥१२२॥ लघुक शब्दे घस्य ह्त्वे कृते लहो-

र्व्यत्ययो वा भवति। लघुकम्। हलुअं। लहुअं। घस्य व्यत्यये कृते पदादित्वात् हो न प्राप्नोतीति हकरणम्।

ह्ये ह्योः ॥ २ ॥ १२४ ॥ ह्यशब्दे हकार यकारयोर्व्यत्ययो वा भवति। गुह्यं। गुय्हं, गुज्झं। सह्यः। सय्हो, सज्झो।

स्तोकस्य थोक्क थोव थेवाः ॥२॥१२५॥ स्तोक शब्दस्य एते त्रय आदेशा वा भवन्ति। स्तोकम्। थक्कं, थोव, थेवं। पक्षे थोअं।

दुहितृभगिन्योर्धूआ वहिण्यौ ॥२॥ १२६ ॥ अनयोरेतावादेशौ वा भवतः। दुहिता। धूआ। भगिनी। वहिणी, भइणी।

वृक्षक्षिप्तयो रुक्खछूढौ ॥ २ ॥ १२७ ॥ वृक्षक्षिप्तयोर्यथा संख्यं रुक्ख छूढ इत्यादेशौ वा भवतः। वृक्षः। रुक्खो, वच्छो। क्षिप्तम्। छूढं,-खित्तं। उत्क्षिप्तम्। उच्छूढं। उक्खित्तं।

वनिताया विलया ॥२॥१२८॥ वनिता शब्दस्य विलया इत्यादेशो वा भवति। वनिता। विलया, वणिया, विलयेति संस्कृतेऽपि केचित्।

गौणस्येषतः कूरः ॥१॥१२९॥ ईषत् शब्दस्य गौणस्य कूर इत्यादेशो वा भवति। चिञ्चा इव ईषद् पक्वाः। चिंचव्व कूर पिक्का। पक्षे ईसि।

स्त्रिया इत्थी ॥ २ ॥ १३० ॥ स्त्रीशब्दस्य इत्थी इत्यादेशो वा भवति। स्त्री। इत्थी, थी।

धृतेर्दिहिः ॥ २ ॥ १३१ ॥ धृतिशब्दस्य दिहिरित्यादेशो वा भवति। धृतिः। दिही, धिई।

मार्जारस्य मञ्जरवञ्जरौ ॥ २ ॥१३२॥ मार्जारशब्दस्य मञ्जर-वञ्जर इत्यादेशौ वा भवतः। मार्जारः। मञ्जरो, वञ्जरो पक्षे मज्जारो।

वैडूर्यस्य वेरुलिअं ॥२॥१३३॥ वैडूर्यशब्दस्य वेरुलिअ इत्यादेशो वा भवति। वैडूर्यम्। वेरुलिअं, वेडुज्जं।

एण्हिं एत्ताहे इदानीमः ॥२॥१३४॥ इदानीं शब्दस्य एतावादेशौ वा भवतः। इदानीम्। एण्हि. एत्ताहे, इयाणिं।

पूर्वस्य पुरिमः ॥२॥१३५॥ पूर्वस्य स्थाने पुरिम इत्यादेशो वा भवति। पूर्वम्। पुरिमं, पुव्वं।

त्रस्तस्य हित्थतट्ठौ ॥२॥१३६॥ त्रस्तशब्दस्य हित्थ तट्ठ इत्यादेशौ वा भवतः। त्रस्तम्। हित्थं, तट्ठं, तत्थं।

बृहस्पतौ बहो भयः ॥२॥१३७॥ बृहस्पतिशब्दे बह इत्यस्यावयवस्य भय इत्यादेशो वा भवति। बृहस्पतिः। भयस्सई, भयप्फइ, भयप्पई, पक्षे बहस्सई, बहप्फई, बहप्पई॥ वा बृहस्पतौ ।१।१३८ इति इकारे उकारे च बिहस्सई, बिहप्फई, बिहप्पई, बुहस्सई, बुहप्फई बुहप्पई।

मलिनोभय शुक्तिछुप्तारब्धपदातेर्मइलावहसिप्पिछिक्काढत्त पाइक्कं ॥२॥१३८॥ मलिनादीनां यथासंख्यं मइलादय आदेशा वा भवन्ति। मलिनम्। मइलं, मलिणं। उभयं। अवहं, उवह इत्यपि केचित्। उभयावकाशं। अवहोआसं। उभयबलं। आर्षे उभयकालं। शुक्तिः। सिप्पी, सुत्ती। छुप्तः। छिक्को, छुत्तो। आरब्धः। आढत्तो, आरद्धो। पदातिः। पाइक्को, पयाई।

दंष्ट्राया दाढा ॥२॥१३९॥ पृथक् योगात् वेति निवृत्तम्। दंष्ट्राशब्दस्य दाढा इत्यादेशो भवति। दंष्ट्रा। दाढा अयम् संस्कृतेऽपि।

बहिसो बाहिं बाहिरौ ॥२ १४०॥ बहिः शब्दस्य बाहिं बाहिर इत्यादेशौ भवतः। बहिस्। बाहिं, बाहिरं।

अधसो हेट्ठं ॥२॥१४१॥ अधश्शब्दस्य हेट्ठ इत्ययं आदेशो भवति। अधस्। हेट्ठं।

मातृपितुः स्वसुः सिआछौ ॥२॥१४२॥ मातृपितुभ्यां परस्य स्वसृ शब्दस्य सिआ छा इत्यादेशौ भवतः। मातृष्वसा। माउसिआ, माउच्छा। पितृष्वसा। पिउसिआ, पिउच्छा।

तिर्यचस्तिरिच्छिः ॥२॥१४३॥ तिर्यच्छब्दस्य तिरिच्छि इत्यादेशो भवति। तिर्यक् प्रेक्षते। तिरिच्छि पेच्छइ। आर्षे, तिरिआ इत्यादेशोऽपि तिरिआ।

गृहस्य घरोऽपतौ ॥ २ ॥ १४४ ॥ गृहशब्दस्य घर इत्यादेशो भवति, पतिशब्दश्चेत्परो न भवति। गृहः। घरो। गृहस्वामी। घर सामी। राजगृहम्। रायहरं। अपताविति किं? गृहपतिः। गहवई।

शीलाद्यर्थस्येरः ॥२॥१४५॥ शीलधर्म साध्वर्थे विहितस्य प्रत्ययस्य इर इत्यादेशो भवति। हसनशीलः। हसिरो। रोदनशीलः। रोविरो। लज्जाशीलः। लज्जिरो। जल्पनशीलः। जंपिरो। वेपनशीलः। वेविरो। भ्रमणशीलः। भमिरो। उच्छ्वसन शीलः। ऊससिरो। केचित् तृन एव इरमाहुस्तेषां नमिरगमिरादयो न सिध्यन्ति। तृनोऽत्र रादिना वाधितत्वात्।

क्त्वस्तुमत्तूणतुआणाः ॥२॥१४६॥ क्त्वा प्रत्ययस्य तुम्, अत् तूण, तुआण इत्येते आदेशा भवन्ति। (तुम्) दृष्ट्वा। दट्ठुं। मुक्त्वा। मोत्तुं। (अत्) भ्रमित्वा। भमिअ। रमित्वा। रमिअ। (तूण) गृहीत्वा। घेत्तूण। कृत्वा। काऊण (तुआण) भित्त्वा। भेत्तुआण। श्रुत्वा। सोउआण। वंदित्तु इत्यनुस्वार लोपात्। वन्दित्ता, इति तु सिद्धसंस्कृतस्यैव वलोपेन। कट्टु इति तु आर्षे।

इदमर्थस्य केरः ॥२॥१४७॥ इदमर्थस्य प्रत्ययस्य केर इत्यादेशो भवति। युष्मदीयः। तुम्हकेरो। अस्मदीयः। अम्हकेरो। न च भवति, मदीय-पक्षे। मईअ पक्खे। पाणिनीया। पाणिणीआ।

पर राजभ्यां क्क डिक्कौ च ॥२॥१४८॥ पर राजन् इत्येताभ्यां परस्य इदमर्थस्य प्रत्ययस्य यथासंख्यं संयुक्तौ क्को ङित् इक्कश्चादेशौ भवतः, चकारात् केरश्च। परकीयम्। पारक्कं, परक्कं, पारकेर। राजकीयम्। राइक्कं। रायकेरं।

युष्मदस्मदोऽञ एच्चयः ॥२॥१४९॥ आभ्यां परस्येदमर्थस्य अञः एच्चय इत्यादेशो भवति। युष्माकमिद—यौष्माकम्। तुम्हेच्चयं। एवं, अस्मदीयम्। अम्हेच्चयं।

वतेर्व्वः ॥२॥१५०॥ वतेः प्रत्ययस्य द्विरुक्तो वो भवति। मथुरावत् पाटलिपुत्रे प्रासादाः। महुरव्व पाडलिउत्ते पासाया।

सर्वाङ्गादीनस्येकः ॥ २ ॥ १५१ ॥ सर्वाङ्गात् सर्वादेः। पथ्यङ्ग (हे० ७–१) इत्यादिना वहितस्येनस्य स्थाने इक इत्यादेशो भवति। सर्वाङ्गीणः। सव्वङ्गिओ।

पथो णस्येकट् ॥२॥१५२॥ नित्यं णः पन्थश्च (हे० ६—४) इति यः पथो णो विहितस्य इकट् भवति। पान्थः। पहिओ।

ईयस्यात्मनो णयः ॥२॥१५३॥ आत्मनः परस्य ईयस्य णय इत्यादेशो भवति। आत्मीयम्। अप्पणयं।

त्वस्य डिमात्तणौ वा ॥ २ ॥ १५४ ॥ त्वप्रत्ययस्य डिमा त्तण इत्यादेशौ वा भवतः। पीनत्वम्। पीणिमा, पीणत्तणं, पीणत्तं। पुष्पत्वम्। पुप्फिमा, पुप्फत्तणं, पुप्फत्तं। इम्नः पृथ्वादिषु नियतत्वात् तदन्य प्रत्ययान्तेषु अस्य विधिः। पीनता इत्यस्य प्राकृते पीणया इति भवति। पीणदा इति तु भाषान्तरे। तेनेह तलो दा न क्रियते।

अनङ्कोठात् तैलस्य डेल्लः ॥२॥१५५॥ अङ्कोठवर्जितात् शब्दात्परस्य तैलप्रत्ययस्य डेल्ल इत्यादेशो भवति। सुरभिजलेन कटु तैलम्। सुरहिजलेण कडुएल्लं। अनङ्कोठादिति किम्? अङ्कोठ तैलम्। अङ्कोल्ल तेल्लं।

यत्तदेतदोऽतोरित्तिअ एतल्लुक् च॥१॥१५६॥ एभ्यः परस्य डावादेरतोः परिमाणार्थस्य इत्तिअ इत्यादेशो भवति, एतदो लुक् च। यावत्। जित्तिअं। तावत्। तित्तिअ। एतावत्। इत्तिअं।

इदं किमश्च डेत्तिअ डेत्तिल डेद्दहाः॥ २ ॥१५७॥ इदं किंभ्याम् यत्तदेतद्भ्यश्च परस्यातोः डावतोर्वा डित् एत्तिअ एत्तिल एद्दह इत्यादेशा भवन्ति। एतल्लुक् च। इयत्। एत्तिअं, एत्तिलं एद्दहं। कियत्। केत्तिअं, केत्तिलं, केद्दहं। यावत्। जेत्तिअं, जेत्तिल, जेद्दहं। तावत्। तेत्तिअं, तेत्तिलं, तेद्दहं। एतावत्। एत्तिअ, एत्तिलं, एद्दहं।

कृत्वसो हुत्तं ॥२॥१५८॥ वारे कृत्वस् (हे० ७-२) इति यः कृत्वस् प्रत्ययो विहितस्तस्य हुत्तमित्यादेशो भवति। शतकृत्वः। सयहुत्तं, सहस्रकृत्वः। सहस्सहुत्तं। कथं प्रियाभिमुखं पियहुत्तं। अभिमुखार्थेन हुत्तशब्देन भविष्यति।

आल्विल्लोल्लालवन्तमन्तेत्तेरमणा मतोः॥ २ ॥ १५९ ॥ आलु इत्यादयो नव आदेशा मतोः स्थाने यथाप्रयोगं भवन्ति। (आलु) स्नेहवान्। नेहालू। दयावान्, दयालू, ईर्ष्यावान्। ईसालू, लज्जावती, लज्जालुआ, (इल्ल) शोभावान्। सोहिल्लो। छायावान्। छाइल्लो-दर्पवान्। दप्पुल्लो। (आल) शब्दवान्। सद्दालो। जटावान्। जडालो। फटावान्। फडालो। रसवान्। रसालो। ज्योत्स्नावान्। जोण्हालो। (वन्त) धनवान्। धणवन्तो। भक्तिमान्। भत्तिवन्तो। (मन्त) हनुमान् हणुमन्तो। श्रीमान्। सिरिमन्तो। पुण्यवान्। पुण्णमन्तो। (इत्त) काव्यवान्। कव्वइत्तो। मानवान्। माणइत्तो। (इर) गर्ववान्। गव्विरो।

रेखावान्। रेहिरो। (मण) धनवान्। धणमणो। केचिन्मादेशमपीच्छन्ति। हनुमान्। हणुमा। मतोरिति किम् ? धनी। धणी। आर्थिकः। अत्थिओ।

त्तो दो तसो वा ॥२॥१६०॥ तसः प्रत्ययस्य स्थाने त्तो दो इत्यादेशौ वा भवतः। सर्वतः। सव्वत्तो, सव्वदो। एकतः। एकत्तो, एकदो। अन्यतः। अन्नत्तो, अन्नदो। कुतः। कत्तो, कदो। यतः। जत्तो, जदो। ततः। तत्तो, तदो। इतः। इत्तो, इदो। पक्षे।

अतो डो विसर्गस्य ॥१॥३७॥ संस्कृतलक्षणोत्पन्नस्य अतः परस्य विसर्गस्य स्थाने डो इत्यादेशो भवति। सर्वतः। सव्वओ। पुरतः। पुरओ। अग्रतः। अग्गओ। मार्गतः। मग्गओ। एवं सिद्धावस्थापेक्षया। भवतः। भवओ। भवन्तः। भवन्तो। सन्तः। सन्तो। कुतः। कुदो इत्यादिरपि।

त्रपो हिहत्थाः ॥२॥१६१॥ त्रप् प्रत्ययस्य एते भवन्ति। यत्र। जहि, जह, जत्थ। तत्र। तहि, तह, तत्थ। कुत्र। कहि, कह, कत्थ अन्यत्र। अन्नहि, अन्नह, अन्नत्थ।

वैकाद्ः सि सिअं इआ ॥२॥१६२॥ एकशब्दात्परस्य दा प्रत्ययस्य सि सिअं इआ इत्यादेशा वा भवन्ति। एकदा। एक्कसि, एक्कसिअं, एक्कइआ। पक्षे एगया।

डिल्ल डुल्लौ भवे ॥२॥१६३॥ भवार्थे नाम्नः परौ इल्ल उल्ल इत्येतौ डितौ प्रत्ययौ भवतः। ग्रामेयका। गामिल्लिआ, पुराभवं। पुरिल्लं अधो-भवं, अधस्तनम्। हेट्ठिल्ल। उपरि-भवं उपरितनम्। उवरिल्लं। आत्मनि-भवं आत्मीयम्। अप्पुल्लं। आल्वालौ अपीच्छन्ति अन्ये।

स्वार्थे कश्च वा ॥२॥१६४॥ स्वार्थे कश्चकारादिल्लोल्लौ डितौ प्रत्ययौ वा भवतः। (क) कुङ्कुम-पिंजरम्। कुंकुमपिञ्जरयं।

चंद्रकः । चन्दओ । गगने (गगनके)। गयणयम्मि । धरणीधर
पक्षोद्भ्रान्तम्। धरणीहर पक्खुब्भन्तयं। दुःखिते रामहृदये। दुहि-
अए रामहिअयए। इह। इहयं। आश्लेष्टुम् । आलेद्धुअं । द्विरपि
भवति। बहुकम्। बहुअयं। ककारोच्चारणं पैशाचिकभाषार्थम् । यथा
वदने वदनं समर्पयित्वा। वतनके वतनकं समप्पेत्तून। (इल्ल) निर्जिता-
शोक-पल्लवेन । निज्जिआसोअपल्लविल्लेणं । पुरिल्लो, पुरा, पुरो
वा (उल्ल) ममपितृकः । महपिउल्लओ। मुखम्। मुहुल्लं।। हस्ताः।
हस्तकाः। हत्थुल्ला। पक्षे चंदो, गयणं, इह, आलेद्धुं, बहु, बहुअं,
मुहं, हत्था। कुत्सादिविशिष्टे तु संस्कृतवदेव कप् सिद्धः। यावादिल-
क्षणः कः प्रतिनियतविषय एवेति वचनम्।

ल्लो नवैकाद् वा ॥२॥१६५॥ आभ्यां स्वार्थे संयुक्तो ल्लो वा भवति। नवः। नवल्लो, नवो। एकः एकल्लो, एओ। सेवादित्वात्कस्य द्वित्वे, एक्कल्लो।

उपरेः संव्याने ॥ २ ॥ १६६ ॥ संव्यानेऽर्थे वर्तमानादुपरि शब्दात् स्वार्थे ल्लो भवति। उपरितनः। उवरिल्लो। संख्या इति किम्। उवरि। अवरिं।

भ्रुवो मया डमया ॥२॥१६७॥ भ्रूशब्दात् स्वार्थे मया डमया इत्येतौ प्रत्ययौ भवतः। भ्रूः। भुमया, भमया।

शनैसो डियम् ॥२॥१६८॥ शनैश्शब्दात्स्वार्थे डिमया भवति। शनैः अवगूढः। सणिअमवगूढो।

मनाको नवा डयं च ॥ २ ॥१६९॥ मनाक् शब्दात्स्वार्थे डयं डियम् च प्रत्ययो वा भवति। मनाक्। मणयं, मणियं, पक्षे मणा।

मिश्राड्डालिअः ॥ २ ॥ १७० ॥ मिश्रशब्दात् स्वार्थे डालिअः प्रत्ययो वा भवति। मिश्रम्। मीसालिअं। पक्षे मीसं।

रो दीर्घात् ॥ २ ॥१७१॥ दीर्घशब्दात्परे स्वार्थे रो वा भवति। दीर्घम्। दीहरं, दीहं।

त्वादेः सः ॥२॥१७२॥ भावे त्वतल (हे० ७।१) इत्यादिना विहितात्त्वादेः परः स्वार्थे स एव त्वादिर्वा भवति। मृदुकत्वेन। मउअत्तयाइ। अतिशायिकात्त्वातिशायिकः संस्कृतवदेव सिद्धः। ज्येष्ठतरः। जिट्ठयरो। कनिष्ठतरः। कणिट्ठयरो।

विद्युत्पत्रपीतान्धाल्लः ॥ २ ॥ १७३ ॥ एभ्यः स्वार्थे लो वा भवति। विद्युत्। विज्जुला, विज्जू। पत्रम्। पत्तलं, पत्तं। पीतम्। पीवलं, पीते वो ले वा इति तस्य वः। पीअलं, पीअं। अन्धः। अन्धलो, अन्धो। कथं जमलं? यमलमिति संस्कृतशब्दाद् भविष्यति।

गोणादयः ॥२॥१४७॥ गोणादयः शब्दा अनुक्तप्रकृतिप्रत्ययलोपागमवर्णविकारा बहुलं निपात्यन्ते। गौः। गोणो, गावी। गावः। गावीओ। बलीवर्दः। बइल्लो। आपः। आऊ। पञ्चपञ्चाशत्। पंचावण्णा, पणपन्न। त्रिपञ्चाशत्। तेवण्णा। त्रिचत्वारिंशत्। तेआलीसा। व्युत्सर्गः। विउसग्गो। व्युत्सर्जनं। वोसिरणं। बहिर्मैथुनं वा। बहिद्धा। कार्यम्। णामुक्कसिअं। क्वचित्। कत्थइ। उद्वहति। मुव्वहइ। अपस्मारः। वम्हलो। उत्पलं। कन्दुट्टं। धिक्धिक्। छिछि, द्धिद्धि। धिगस्तु। धिरत्थु। प्रतिस्पर्धी। पडिसिद्धी, पाडिसिद्धी। स्थासकः। चच्चिक्कं। निलयः। निहेलणं। मघवान्। मघोणो। साक्षी। सक्खिणो। जन्म। जम्मणं। महान्। महन्तो। भवान्। भवन्तो। आशीः। आसीसा। क्वचित् हस्य ड्भौ। बृहत्तर। वड्डयरं। हिमोरः। भिमोरो। ल्लस्य डुः। क्षुल्लकः। खुड्डओ। घोषाणाम् अग्रे तनः। गायनः। घायणो। वडः। वढो। ककुदम्। ककुधं। अकाण्डम्। अत्थक्कं। लज्जावती। लज्जालुइणी। कुतूहलं। कुड्डं। चुतः। मायन्दो, माकन्दशब्दः संस्कृतेऽपीत्यन्ये। विष्णुः। भट्टिओ। श्मशानम्। करसी। असुराः। अगया। खेलं। खेड्डं। पौष्पं रजः। तिंगिच्छि। दिनम्। अल्लं।

समर्थः । पक्कलो । पंडकः । नेलच्छो । कर्पासः । पल्लही । बली । उजल्लो । ताम्बूलम् । झसुरं । पुंश्चली । छिंछई । शाखा । साहुली इत्यादि ॥ वाधिकारात्पक्षे यथादर्शनं गउओ इत्याद्यपि भवति, गोला गोआवरी, इति तु गोलागोदावरीभ्यां सिद्धम् ।

भाषाशब्दाश्च आहित्थ लल्लक्क विड्डिर पच्चड्डिआ उप्पेहड मडप्फर पडिच्छिर अट्टमट्ट विहडप्फड उज्जल्ल हल्लप्फल इत्यादयो महाराष्ट्रविदर्भादिदेशप्रसिद्धा लोकतोऽवगन्तव्याः ॥ क्रियाशब्दाश्च अवयासइ फुम्फुल्लइ उप्फालेइ इत्यादयः ॥

अत एव च कृष्ट घृष्ट वाक्य विद्वस् वाचस्पति विष्टरश्रवस् प्रचेतस् प्रोक्त प्रोतादीनां ॥ क्विबादिप्रत्ययान्तानां च अग्निचित्सोमसुत्सुग्लसुम्लेत्यादीनां पूर्वैः कविभिरप्रयुक्तानां प्रतीतिवैषम्यपरः प्रयोगो न कर्त्तव्यः ॥ शब्दान्तरैरेव तु तदर्थोऽभिधेयः, यथा, कृष्टः कुशलः, वाचस्पतिर्गुरुः विष्टरश्रवाः हरिरित्यादि ॥ घृष्टशब्दस्य तु सोपसर्गस्य प्रयोग इष्यते एव, मन्दरतट परिघृष्टम् । 'मन्दरयडपरिघट्टं' । तद्दिअस निहट्ठाणंगो इत्यादि ॥ आर्षे तु यथा दर्शनं सर्वम् अविरुद्धम् ॥ यथा घृष्टाः । घट्ठा । मृष्टाः । मट्ठा । विद्वांसः । विउसा । सुअलक्खणाणुसारेण वक्कन्तरेसु अपुणो इत्यादि ॥ इति व्यञ्जनसन्धिः ॥

अथाव्यय प्रकरणम्

अव्ययम् ॥२॥१७५॥ अधिकारोऽयम् । इतः परं ये वक्ष्यन्ते, आपादपरिसमाप्तेस्तेऽव्ययसंज्ञका ज्ञातव्याः ।

तं वाक्योपन्यासे ॥२॥१७६॥ तमिति वाक्योपन्यासे प्रयोक्तव्यम् । तं त्रिदशवन्दिमोक्षम् । तं तिअसवंदिमोक्खं ।

आम अभ्युपगमे ॥२॥१७७॥ आमेत्यभ्युपगमे प्रयोक्तव्यम् । आम बहला वनालिः । आम बहला वणोली ।

णवि वैपरीत्ये ॥२॥१७८॥ णवीति वैपरीत्ये प्रयोक्तव्यं । णवि हा वने। णवि हा वने। हा इति खेदे ।

पुणरुत्तं कृत करणे ॥ २ ॥ १७९॥ पुणरुत्तमिति कृतकरणे प्रयोक्तव्यम्। अयि स्वपति पांसुले निःसहैरङ्गैः पुणरुत्तम्। अइ सुप्पइ पंसुलि णीसहेहि अंगेहि पुणरुत्तं। वार वार स्वपितीत्यर्थ।

हन्दि विषाद विकल्प पश्चात्ताप निश्चय सत्ये ॥२॥१८०॥ हन्दि इति विषादादिपु प्रयोक्तव्यम्।

हन्दि चलणे नओ सो ण माणिओ, हन्दि हुज्ज एत्ताहे ।
हन्दि न होही भणिरी सा सिज्जइ, हन्दि तुह कज्जे ॥

हन्दि चरणे नतः स न मानित इति विपाद हन्दि भविष्यति इदानीम्। नवेति विकल्प हन्दि न भविष्यति भणन शीला, इति पश्चाताप.। सास्विद्यति हन्दि (निश्चय अर्थे सत्यार्थे वा तव कार्ये।

हन्द च गृहाणार्थे ॥ २ ॥ १८१ ॥ हन्द हन्दि च गृहाणार्थे प्रयोक्तव्यम्। हन्द (गृहाण) प्रलोकय इदम्। हन्द पलोएसु इमं, हन्दि, गृहाणेत्यर्थः ।

मिव पिव विव व्व व विअ इवार्थे वा ॥ २ ॥ १८२ ॥ एते इवार्थे अव्ययसंज्ञका प्राकृते वा प्रयुज्यन्ते। कुमुदम् इव। कुमुअं मिव। चदनम् इव। चन्दणं पिव। हस इव। हसो विव। सागर इव क्षीरोद'। साअरो व्व खीरोओ। शेषस्य निर्मोकः इव। सेसस्स व निम्मोओ। कमलम् इव। कमलं विअ। पक्षे। नीलोत्पल-माला इव। नीलुप्पल-माला इव।

जेण तेण लक्षणे ॥२॥१८३॥ जेण तेण इत्येतौ लक्षणे प्रयोक्तव्यौ। भ्रमर रुत येन कमल वनम्। भमररुअं जेण कमलवणं। भमर रुअं तेण कमल वणं।

णइ चेअ चिअ च्च अवधारणे ॥२॥ १८४ ॥ एतेऽवधारणे प्रयोक्तव्याः । गत्या एव । गईए णइ । यत् एव मुकुलनं लोचनानाम् । जं चेअ मउलणं लोअणाणं । अनुबद्धं तद् एव कामिनीनाम् । अणुबद्धं तं चिअ कामिणीणं । सेवादित्वात् द्वित्वमपि, ते एव धन्याः । ते च्चिअ धन्ना । ते एव सुपुरुषाः । ते च्चेअ सुपुरिसा । स एव च रूपेण । स च्च च रूवेण । स एव शीलेन । स च्च सीलेण ।

बले निर्धारण निश्चययोः ॥२॥१८५॥ बले इति निर्धारणे निश्चये च प्रयोक्तव्यम् । निर्धारणे । पुरुषो धनञ्जयः क्षत्रियाणाम् । बले पुरिसो धणंजओ खत्तियाणं । निश्चये । सिंह एवायम् । बले सीहो ।

किरेर हिर किलार्थे वा ॥२॥ १८६ ॥ किर इर हिर इत्येते किलार्थे वा प्रयोक्तव्याः । कल्यं किल खरहृदयः । कल्लं किर खरहिअओ । तस्य किल । तस्स इर । प्रियवयस्य किल । पिअवयंसो हिर । पक्षे । एवं किल तेन स्वप्नके भणिता । एवं किल तेण सिविणए भणिआ ।

णवर केवले ॥ २ ॥ १८७ ॥ केवलार्थे णवर इति प्रयोक्तव्यम् केवलं प्रियाणि एव भवन्ति । णवर पिआइ चिअ णिव्वडन्ति ।

आनन्तर्ये णवरि ॥ २ ॥ १८८ ॥ आनन्तर्ये णवरि इति प्रयोक्तव्यम् । णवरि (अनन्तरं) च तस्य रघुपतिना । णवरि अ से रहुवइणा । केचित्तु केवलाऽनन्तर्यार्थयोः णवर-णवरि इत्येकमेव सूत्रं कुर्वते तमते उभावप्युभयार्थौ ।

अलाहि निवारणे ॥२॥१८९॥ अलाहीति निवारणे प्रयोक्तव्यम् । मा, किम् वाचितेन लेखेन । अलाहि किं वाइएण लेहेण ।

अणणाहं नञर्थे ॥२॥१९०॥ अणणाइं इत्येतौ नञोऽर्थे प्रयो-

क्तव्यौ। अचिन्तितम् अजानन्ती। अण चिन्तिअममुणन्ती। न करोमि रोत्रम्। णाइं करेमि रोस।

माइं मार्थे ॥२॥१९१॥ माइं इति मार्थे प्रयोक्तव्यम्। मा कार्षीद् रोषम्। माइं काहीअ रोसं।

हद्धी निर्वेदे ॥२॥१९२॥ हद्धी इत्यव्ययमत एव निर्देशात् हा धिक् शब्दादेशो वा निर्वेदे प्रयोक्तव्यम्। हा धिक धिक्, हद्धी हद्धी हा धाह धाह।

वेव्वे भय वारण विषादे ॥२॥१९३॥ भय वारण विषादेषु वेव्वे इति प्रयोक्तव्यम्।

वेव्वे त्ति भये वेव्वे त्ति वारणे जूरणे अ वेव्वे त्ति।
उल्लाविरीइ वि तुहं वेव्वे त्ति मयच्छि किं णेअं ॥ १ ॥
किं उल्लावेन्तीए उअ जूरन्तीए किं तु भीआए।
उव्वाडिरीए वेव्वेत्ति तीए भणिअं न विम्हरिमो ॥ २ ॥

वेव्वे इति भये वेव्वे इति वारणे (खेदे) विषादे च वेव्वे इति उल्लपनशीलया अपि तव वेव्वे इति मृगाक्षि ! किम् ज्ञेयं।

कि उल्लापयन्त्या उत खिद्यन्त्या किं तु भीतया।
उद्वातशीलया वेव्वे इति तया भणित न विस्मरामः।

वेव्व आमन्त्रणे ॥ २ ॥ १९४ ॥ वेव्व वेव्वे च आमंत्रणे प्रयोक्तव्ये। वेव्व गोले। वेव्व गोले। हे मुरन्दले वहसि पानीयम्। वेव्वे मुरन्दले वहसि पाणिअं।

मामि हला हले सख्या वा ॥ २ ॥ १९५ ॥ एते सख्या आमन्त्रणे वा प्रयोक्तव्याः। हे (सखि) सदृशाक्षराणाम् अपि। मामि सरिसक्खराण वि। प्रणमत मानाय हे (सखि)। पणवह माणस्स हला

इ (सखि) हताशस्य । हले हयासस्स । पक्षे । हे सखि ! ईदृशी एवं गति । सहि ! एरिसि च्चिअ गई ।

दे संमुखीकरणे च ॥ २ ॥ १९६ ॥ संमुखीकरणे सख्या आमन्त्रणे च दे इति प्रयोक्तव्यम् । दे प्रसीद तावत् सुन्दरि । दे पसिअ ताव सुन्दरि । दे हे (सखि) आप्रसीद निवर्त्तस्व । दे आपसिअ निअत्तसु ।

हुं दान पृच्छा निवारणे ॥ २ ॥ १९७ ॥ हुं इति दानादिषु प्रयोक्तव्यम् । 'दाने' हुं गृहाण आत्मन एव । हुं गेण्ह अप्पणो च्चिअ । 'पृच्छायां' हुं कथय सद्भावम् । हुं साहसु सब्भावं । 'निवारणे' हुं निर्लज्ज समपसर । हुं निल्लज्ज समोसर ।

हु खु निश्चय-वितर्क-संभावन-विस्मये ॥ २ ॥ १९८ ॥ हु खु इत्येतौ निश्चयादिषु प्रयोक्तव्यौ । 'निश्चये' त्वमपि हु (एवं) अच्छिन्न-श्री । तंपि हु अच्छिन्न सिरी । त्वम् खु (=खलु) श्रियः रहस्यम् । तं खु सिरीए रहस्सं । वितर्कः ऊहः संशयो वा । 'ऊहे' न हु केवलं संगृहीता । न हु णवर संगहिआ । एताम् खु हसति । एअं खु हसइ । 'संशये' जल-धर खु धूमपटलः खु । जलहरो खु धूमवडलो खु । सम्भावने । तरितुं न हु केवलम् इमाम् । तरीउं ण हु णवर इमं । एतम् खु हसति । एअं खु हसइ । विस्मये । क खलु एषः सहस्रशिराः । को खु एसो सहस्ससिरो । बहुलाधिकारादनुस्वारात् परो हुर्न प्रयोक्तव्यः ।

ऊ गर्हाक्षेप विस्मय सूचने ॥ २ ॥ १९९ ॥ ऊ इति गर्हादिषु प्रयोक्तव्यम । गर्हा । अरे (धिक्) निर्लज्ज । ऊ णिल्लज्ज । प्रक्रान्तस्य वाक्यस्य विपर्यासाशङ्कया विनिवर्तन लक्षण आक्षेप । किम् मया भणित । ऊ कह भणिअ । विस्मये । ऊ कथं ज्ञाता (=मुनिता) अहम् । ऊ कह मुणिआ अहयं । सूचने । ऊ, केन न विज्ञातम् । ऊ केण न विण्णायं ।

थूं कुत्सायाम् ॥ २ ॥ २०० ॥ थू इति कुत्सायां प्रयोक्तव्यः। थू (निन्दनीयः) निर्लज्ज लोक । थू निल्लज्जो लोओ ।

रे अरे संभाषण रति कलहे ॥ २ ॥ २०१ ॥ अनयोरर्थयोर्यथासंख्यम् एतौ प्रयोक्तव्यो । रे संभाषणे । रे हृदय। मृतक सरिता। रे हिअय मडह-सरिआ। अरे रतिकलहे । अरे ! मया समं मा कुरु उपहासं । अरे ! मए समं मा करेसु उवहासं ।

हरे क्षेपे च ॥ २ ॥ २०२ ॥ क्षेपे संभाषण रति कलहयोर्हरे इति प्रयोक्तव्यम् । 'क्षेपे' हरे निर्लज्ज । हरे णिल्लज्ज । सम्भाषणे । हरे पुरुषाः । हरे पुरिसा । रति कलहे । हरे बहु वल्लभ । हरे बहु-वल्लह ।

ओ सूचना पश्चात्तापे ॥ २ ॥ २०३ ॥ ओ इति सूचना पश्चात्तापयोः प्रयोक्तव्यम् । सूचनायाम् । ओ अविनय-तृप्ति परे । ओ अविणय तत्तिल्ले । पश्चातापे । ओ । (खेद-अर्थे) न मया छाया एतावत्याम् । ओ न मए छाया इत्तिआए। विकल्पे तु उतादेशेनैव ओकारेणैव सिद्धम् । उत विरचयामि नभस्तले । ओ विरएमि नहयले ।

अव्वो सूचना-दुःख-संभाषणापराध-विस्मयानन्दादरभय-खेद विषाद पश्चात्तापे ॥ २ ॥ २०४ ॥ अव्वो इति सूचनादिषु प्रयोक्तव्यम् । सूचनायाम्' अव्वो दुष्कर कारक । अव्वो दुक्करयारय । दुःखे' अव्वो दलन्ति हृदयम् । अव्वो दलन्ति हियय । संभाषणे। अव्वो किमिदं किमिदम् । अव्वो किमिणं किमिणं । अपराधविस्मययो ।

अव्वो हरन्ति हिययं तह वि न वेसा हवन्ति जुवईणं ।
अव्वो किं पि रहस्सं मुणन्ति धुत्ता जणब्भहिआ ॥१॥

आनन्दादर भवेत्तु ।

अव्वो सुपहायमिणं, अव्वो अज्जम्ह सप्फलं जीअं ।
अव्वो अइअम्मि तुमे नवरं जइ सा न जूरिहिइ ॥२॥

खेदे । अव्वो न यासि गेहम् । अव्वो न जामि छेत्तं
अव्वो नासेन्ति दिहिं पुलयं वड्ढेंन्ति देन्ति रणरणयं । विषादे,
एण्हिं तस्सेअ गुणा ते च्चिअ अव्वो कह णु एअं ॥३॥

अव्वो हरन्ति हृदयं तथापि न द्वेष्याः भवन्ति युवतीनाम् ।
अव्वो किमपि रहस्यं जानंति धूर्ताः जनाभ्यधिकाः ॥१॥
अव्वो सुप्रभातम् इदम् अव्वो अद्य अस्माकम् सफलम् जीवितम् ।
अव्वो अतीते त्वयि केवलम् यदि सा न खेदूष्यति ॥२॥
अव्वो नाशयंति धृतिम् पुलकम् वर्धयन्ति ददति रणरणकम् ।
इदानीम् तस्य इति गुणा ते एव अव्वो कथम् नु एतत् ॥३॥
पश्चात्तापे । अव्वो तथा तेन कृता अहम् यथा कस्य कथयामि ।
अव्वो तह तेण कया अहयं जह कस्स साहेमि ।

अइ संभावने ॥२॥२०५॥ संभावने अइ इति प्रयोक्तव्यम् । अइ, देवर किम् न पश्यसि । अइ, दिअर किं न पेच्छसि ।

वणे निश्चय विकल्पानुकम्प्ये च ॥२॥२०६॥ निश्चयादौ संभावने च वणे इति प्रयोक्तव्यम् । निश्चय ददामि । वणे देमि । (विकल्पे) भवति वा न भवति । होइ वणे न होइ । दासोऽनुकम्प्यो न मुच्यते । दासो वणे न मुच्चइ । सम्भावने । नास्ति वणे यद् न ददाति विधिपरिणामः । नत्थि वणे जं न देइ विहि-परिणामो, संभाव्यते एतदित्यर्थः ।

मणे विमर्शे ॥२॥२०७॥ मणे इति विमर्शे प्रयोक्तव्यम् । किं स्वित्सूर्यः । मणे सूरो । अन्ये मन्ये इत्यर्थमपीच्छन्ति ।

अम्मो आश्चर्ये ॥२॥२०८॥ अम्मो इत्याश्चर्ये प्रयोक्तव्यम् । आश्चर्यमेतत् कथम् पार्यते । अम्मो कह पारिज्जइ ।

स्वयमोऽर्थे अप्पणो नवा ॥२॥२०९॥ स्वयमित्यस्यार्थे अप्पणो वा प्रयोक्तव्यम । विशदं विकसन्ति स्वयं कमल- सरांसि । विसयं विअसंति अप्पणो कमल सरा । पक्षे, स्वयं चैव जानासि करणीयम् । सयं चेव मुणसि करणिज्जं ।

प्रत्येकमः पाडिक्कंम् पाडिएक्कम् ॥२॥२१०॥ प्रत्येकम् इत्यस्यार्थे पाडिक्कं पाडिएक्कम इति च प्रयोक्तव्यम् वा । प्रत्येकम् । पाडिक्कं, पाडिएक्कं पक्षे । पत्तेअं ।

उअ पश्ये ॥२॥२११॥ उअ इति, पश्य इत्यस्य अर्थे वा प्रयोक्तव्यम् ।

उअ निच्चलनिप्फंदा भिसिणीपत्तंमि रेहइ बलाया
निम्मल मरगयभायणपरिट्ठिआ सङ्ख-सुत्तिव्व ॥

पश्य निश्चय-निष्पन्दा बिसिनी-पत्रे राज ते बलाका । निर्मल-मरकत-भाजन-प्रतिष्ठिता शङ्ख शुक्तिरिव पक्षे । पुल आदयः ।

इहरा इतरथा ॥२॥२१२॥ इहरा इति इतरथार्थे प्रयोक्तव्यं वा । इतरथा निःसासान्यैः । इहरा नीसामन्नेहिं । पक्षे इअरहा ।

एक्कसरिअं झगिति संप्रति ॥२॥२१३॥ एक्कसरिअं झगित्यर्थे, सम्प्रत्यर्थे च प्रयोक्तव्यम् । एक्कसरिअ झगिति, सांप्रत वा ।

मोरउल्ला मुधा ॥२॥२१४॥ मोरउल्ला इति मुधार्थे प्रयोक्तव्यम् । मोरउल्ला मुधा इत्यर्थः ।

दराधाल्पे ॥२॥२१५॥ दर इत्यव्ययम् अर्धार्थे, ईषदर्थे च प्रयोक्तव्यम् । दर विअसिअं । अर्धेनेषद्वा विकसित मित्यर्थः ।

किणो प्रश्ने ॥२॥२१६॥ किणो इति प्रश्ने प्रयोक्तव्यम् । किम् धूनोषि । किणो धुवसि ।

इ-जे-राः पादपूरणे ॥२॥२१७॥ इ-जे-र इत्येते पाद पूरणे प्रयोक्तव्या । न पुनः अक्खीणि । न उणा इ अच्छीइ । अनुकूलं वक्तु । अणुकूल वोत्तुं जे । गृह्णाति कलम-गोपी । गेण्हइ र कलम गोवी । अहो हंहो हे हो हा नाम अहह ह्रीमि अयि अहाह अरि रि हो इत्यादयस्तु संस्कृत समत्वेन सिद्धाः ।

प्यादयः ॥२॥२१८॥ प्यादयो नियतार्थ वृत्तयः प्राकृते प्रयोक्तव्या ॥ पि वि अप्यर्थे ।

इति अव्ययप्रकरणम् ।

अथ लिङ्गानुशासनम् ॥

प्रावृट् शरत्तरणयः पुंसि ॥१॥३१॥ प्रावृट् शरत्तरणि इत्यते शब्दाः पुंसि पुलिङ्गे प्रयोक्तव्या । प्रावृण् । पाउसो । शरद् । सरओ । एषा तरणि । एस तरणी । तरणिशब्दस्य पुंस्त्रीलिङ्गत्वेन नियमार्थस उपादानम् ।

स्नमदाम-शिरो-नभः ॥ १ ॥३२॥ दामन शिरस् नभस् वर्जितं मकारान्तं नकारान्तं च शब्दरूप पुंसि प्रयोक्तव्यम् । सान्तं । यशस् । जसो । पयस् । पओ । तमस् । तमो । उरस् । उरो । नान्तम् । जन्मन । जम्मो । नर्मन । नम्मो । मर्मन् । मम्मो । अदाम शिरोनभ इति किम् ? दामन् । दामं । शिरस् । सिरं । नभस् । नहं । यच्च श्रेयस् । सेयं । वयस् । वयं । सुमनस् । सुमणं । शर्मन । सम्मं । चर्मन । चम्मं । इति दृश्यते तद् बहुलाधिकारात् ।

वाऽक्ष्यर्थ वचनाद्याः ॥१॥३३॥ अक्षिपर्याया लोचनादयश्च शब्दाः पुंसि वा प्रयोक्तव्याः। अक्ष्यर्थाः। अद्यापि सा शपति ते अक्षिः। अज्ज वि सा सवइ ते अच्छी। नर्तितानि तेन अस्माकम् अक्षीणि। नच्चा वयाइं तेणं म्ह अच्छीइं। अञ्जल्यादि पाठाद् अक्षिशब्दः स्त्रीलिङ्गे ऽपि। एषा अक्षि। एसा अच्छी। चक्खू, चक्खूइं, नयणा, नयणाइं। लोअणा, लोअणाइं (वचनादिः) वयणा, वयणाइं। विज्जुणा, विज्जूए। कुलो, कुलं। छन्दो, छन्दं। माहप्पो, माहप्पं। दुक्खा, दुक्खाइं, भायणा, भायणाइं इत्यादि। इतिवचनादयः। नेत्ता, नेत्ताइं। कमला, कमलाइं इत्यादिस्तु संस्कृतवदेव सिद्धम्।

गुणाद्याः क्लीबे वा ॥१॥३४॥ गुणादयः क्लीबे वा प्रयोक्तव्याः। गुणाइं, गुणा। विभवैः गुणाः मृग्यन्ते। विहवेहिं गुणाइं मग्गन्ति। देवाणि, देवा। बिन्दूइं, बिन्दुणो। खग्गं, खग्गो, मण्डलग्गं, मण्डलग्गो, कररुहं, कररुहो। रुक्खाइं, रुक्खा। इत्यादि। इति गुणादयः।

वेमाञ्जल्याद्याः स्त्रियाम् ॥१॥३५॥ इमन्ता अञ्जल्यादयश्च शब्दाः स्त्रियां वा प्रयोक्तव्याः। एषा गरिमा। एसा गरिमा, एस गरिमा। एषा निर्लज्जत्वम्। एसा निल्लज्जिमा, एस निल्लज्जिमा। एष धूर्तत्वम्। एसा धुत्तिमा, एस धुत्तिमा। अञ्जल्यादिः। एसा अञ्जली, एस अंजली। पृष्ठम्। पिट्ठी, पिट्ठं। पृष्ठमित्वे कृते स्त्रियामेवेत्यन्ये। अच्छी अच्छि। पण्हा, पण्हो। चोरिआ, चोरिअं। एवं कुच्छी, बली निही, विही, रस्सी, गण्ठी इत्यञ्जल्यादयः। गड्डा, गड्डो इति तु संस्कृतवदेव सिद्धम्। इमेति तन्त्रेण त्वादेशस्य डिमा इत्यस्य पृथ्वादीम्नश्च संग्रहः त्वादेशस्य स्त्रीत्वमेव इच्छन्ति एके। इति लिङ्गानुशासनम्।

इति हेमचन्द्राचार्यरचिते प्राकृतव्याकरणे द्वितीयपादः समाप्तिम् अगमत्।

॥ अर्हम् ॥

श्री स्तम्भनकपार्श्वनाथस्वामिभ्यो नमः ॥

अथ स्यादिविभक्तीन् समारभन्ते तत्र अकारान्तः पुंलिङ्गो वृक्षशब्दः ॥

वृक्षशब्दात् सिप्रत्यये कृते छोऽक्ष्यादौ ॥२।१७॥ इति क्षस्य छ आदेशे जाते 'वच्छ सि' इत्यवस्थितम् ॥

अतः सेर्डो ॥३॥२॥ अकारान्तान्नाम्नः परस्य स्यादेः सेः स्थाने डो भवति ॥वच्छो॥ प्राकृते द्विवचनाभावात्, वच्छ जस, इत्यवस्थायाम् ॥

जश्शसोर्लुक् ॥३॥४॥ अकारान्तान्नाम्नः परयोः स्यादिसम्बन्धिनोर्जश्शसोर्लुक् भवति ।

जश्शस्-ङसि-त्तो-दो-द्वामि दीर्घः ॥३॥१२॥ एषु अतो दीर्घो भवति ॥वच्छा एए ॥

अमोऽस्य ॥३॥५॥ अतः परस्य अमोऽकारस्य लुग् भवति ॥वच्छं पेच्छ, ॥

टाणशस्येत् ॥३॥१४॥ टादेशे णे, शसि च परे अत एत्वं भवति । टाणे, वच्छेण, णे इति किं, अप्पणा, अप्पणिआ,[1] अप्पणइआ, शसि वच्छे पेच्छ ॥ जश्शसिति (३॥१२) दीर्घपक्षे तु वच्छा ॥

---

१ आत्मनष्टो णिआ णइआ ॥३॥५७॥ इति टास्थाने णिआ णइआ इत्यादेशौ॥

टा-आमोर्णः ॥ ३ ॥ ६ ॥ अत. परस्य टा इत्यस्य षष्ठी-बहुवचनस्य चामो णो भवति ॥ वच्छेण, वच्छेणं[1] ॥

भिसो हिहिंहिं ॥ ३ ॥ ७ ॥ अतः परस्य भिसः स्थाने केवलः सानुनासिकः सानुस्वारश्च हिर्भवति ॥

भिस्भ्यस्सुपि ॥ ३ ॥ १५ ॥ एषु अत एत्त्वं भवति ॥ वच्छेहि वच्छेहिँ वच्छेहिं, कया छाही ॥ प्राकृते चतुर्थी विभक्तिर्न भवति प्रायेण, तादर्थ्ये भवत्यपि तथापि च तत्र संस्कृतवत् वच्छाय इति रूपम् ज्ञेयम् ॥

ङसेस् त्तो-दो-दु-हि-हिन्तो-लुक् ॥३॥८॥ अतः परस्य ङसेः त्तो दो दु हि हिन्तो लुक् इत्येते षड् आदेशा भवन्ति ॥ ह्रस्व संयोगे' इति ह्रस्वत्वं । वच्छत्तो, वच्छाओ,[2] वच्छाउ, वच्छाहि, वच्छाहिन्तो, वच्छा ॥ दो इत्यत्र दकारकरणं भाषान्तरार्थम् ॥ ङसिनैव सिद्धे त्तोदोदुग्रहणं भ्यसि एत्त्वबाधनार्थम् ॥

भ्यसस् त्तो - दो - दुहि - हिन्तो - सुन्तो ॥ ३ ॥ ९ ॥ अतः परस्य भ्यसः स्थाने त्तो दो दुहि हिन्तो सुन्तो इत्यादेशा भवन्ति ॥

भ्यसि वा ॥ ३ ॥ १३ ॥ भ्यसादेशे परेऽतो दीर्घो वा भवति ॥ दीर्घाभावपक्षे एत्त्वम्[3] ॥ वच्छत्तो वच्छाओ, वच्छाउ, वच्छाहि, वच्छेहि, वच्छाहिन्तो, वच्छेहिन्तो, वच्छासुन्तो, वच्छेसुन्तो ॥

ङसः स्सः ॥ ३ ॥ १० ॥ अतः परस्य ङसः स्थाने स्सो

---

१ क्त्वास्यादेर्णस्वोर्वा ॥१॥२७॥ इति अनुस्वारागमः ॥ २ जश्शस् ङसि, त्तोदोद्वामि दीर्घः ॥ ३ ॥ १२ ॥ इति दीर्घत्वम् ॥ ३ भिस्भ्यस्सुपि ॥ ३ ॥ १५ ॥ इत्यनेन सूत्रेण एत्वे ॥

भवति । वच्छस्स, पियस्स, पेमस्स, उपकुम्भशैत्यम् । उपकुंभस्स सीअ-लत्तणं ॥ षष्ठीबहुवचने, वच्छाण,[1] वच्छाणं ॥

ङेर्म्मि ङे: ॥ ३ ॥ ११ ॥ अत. परस्य ङे ङित् एकारः संयुक्तो म्मिश्च भवति ॥ वच्छे, वच्छम्मि । देवं, देवम्मि । तं, तम्मि, अत्र 'द्वितीयातृतीययोः सप्तमी ॥ ३ ॥ १३५ ॥' इत्यमो ङिः । सुपि वच्छेसु[2] वच्छेसुं ॥

डो दीर्घो वा ॥ ३ ॥ ३८ ॥ आमन्त्रणात् परे सौ सति, अतः सेर्डोरीति, यो नित्यं डो प्राप्तो'यश्च 'अक्लीवे सौ, इति इदुतोरकारान्तस्य च प्राप्तो दीर्घः, स वा भवति, हे वच्छ, हे वच्छो, हे देव हे देवो, हे खमासमण हे खमासमणो, हे अज्ज हे अज्जो, हे वच्छा ॥ एवं देव मनुष्य, रामकृष्णजिनादयः ॥

सर्वनामसंज्ञकशब्दानां तु विशेषं तथाहि अकारान्तसर्वशब्दस्य पुंलिङ्गे रूपाणि, तत्र प्रथमायां सि विभक्तौ सव्वो, ॥

अतः सर्वादेर्डेर्जसः ॥ ३ ॥ ५८ ॥ सर्वादेरदन्तात् परस्य जसः डित् ए इत्यादेशो भवति। सव्वे, अन्ने,जे[3] ते, के,एक्के,कयरे, इयरे एए, अतः इति किम्? सव्वाओ[4] रिद्धीओ, जस इति किं, सव्वस्स, ॥१॥ सव्वं, सव्वे सव्वा २ ॥ सव्वेण सव्वेणं सव्वेहिं सव्वेहि सव्वेहि ॥ ३ ॥ सव्वत्तो,सव्वाओ,सव्वाउ,सव्वाहि,सव्वाहिन्तो, सव्वा॥ सव्वत्तो सव्वाओ सव्वाउ, सव्वाहि, सव्वेहि, सव्वाहिन्तो सव्वेहिन्तो, सव्वासुन्तो सव्वेसुन्तो ॥ ५ ॥ सव्वस्स ।

---

१ टाआमोर्णः ॥ ३ ॥ ६ ॥ इत्यामस्थाने णः ॥ जश्शस्ङसित्तोदोद्वामि दीर्घः ॥ ३ ॥ १२ ॥ इति दीर्घत्वम् ॥ २ भिस्भ्यस्सुपि ॥ ३ ॥ १५ ॥ इति अकारस्य एत्त्वम् ॥३ अन्त्यव्यंजनस्य ॥ १ ॥११॥ इत्यनेनान्त्यव्यंजनस्य लोपे तेऽक्त त्यदादीनामपि प्रायेण अदन्तत्वेनोदाहरति, जे ते इति । ४ स्त्रियामुदोतौ वा ॥३॥ २७ ॥ इति जस् स्थाने ओदादेशः ॥

आमो डेसिं ॥ ३ ॥ ६१ ॥ सर्वादेरकारान्तात्परस्य आमो डेसिम् इत्यादेशो वा भवति । सव्वेसिं, अन्नेसिं, अवरेसि, इमेसिं, एएसिं, जेसिं, तेसिं, केसिं, पक्षे सव्वाण सव्वाणं ॥ ६ ॥ अन्नाण, अवराण, इमाण, एआण, जाण, ताण, काण ॥ बहुलाधिकारात् स्त्रियामपि, (सर्वासाम्) सव्वेसि, एवम्, अन्नेसिं तेसिं, ॥

ङेः स्सि-म्मि-त्थाः ॥ ३ ॥ ५९ ॥ सर्वादेरकारान्तात्परस्ये ङेः स्थाने स्सि-म्मि-त्थ-इत्येते आदेशा भवन्ति । सव्वस्सि,सव्वम्मि, सव्वत्थ, अन्नस्सि, अन्नम्मि, अन्नत्थ, एवं सर्वत्र, अत इत्येव, अमुम्मि ॥

नवाऽनिदमेतदो हिं ॥ ३ ॥ ६० ॥ इदमेतद् वर्जितात् सर्वादेरदन्तात्परस्य ङेर्हिमादेशो वा भवति ॥ सव्वहिं, अन्नहिं, कहिं, जहिं, तहिं, बहुलाधिकारात् किंयत्तद्भ्य. स्त्रियामपि, काहिं, जाहिं, ताहिं ॥ बहुलकादेव 'किंयत्तदोस्यमामि ॥ ३ ॥ ३३ ॥ इति ङीर्नास्ति, पक्षे, सव्वस्सि, सव्वम्मि, सव्वत्थ, इत्यादि स्त्रियां तु पक्षे, काए[1], कीए, जाए, जीए, ताए, तीए । इदमेतद्वर्जनं किम्, इमस्सिं एअस्सिं । सुपि तु सव्वेसु सव्वेसुं । ७ । हे सव्व, हे सव्वो, हे सव्वे। एवं विश्वादयोऽपि अदन्ताः। त्यदादीनाम् तु विशेषः, तत्र तावत् तदेतच्छब्दयोः[2] पुंलिङ्गे रूपाणि कथ्यते ॥

वैतत्तदः ॥ ३ ॥ ३ ॥ एतत्तदोऽकारात् परस्य स्यादे. सेर्डो वा भवति ॥

तदश्च तः सोऽक्लीवे ॥ ३ ॥ ८६ ॥ तद एतदश्च तकारस्य सौ परे अक्लीवे सो भवति ॥ स णरो, सो पुरिसो, सा महिला, एस

---

१. टाङसङे-रदादिदेद् वा तु ङसे ३ ॥ २९ ॥ इति एत्त्वम्

२ प्राकृते त्यदादीनामपि अन्त्यव्यञ्जनलोपेन अदन्तत्वात् प्रसङ्गसंगतिमाश्रित्य तेषामपि रूपाणि अत्रैव लिख्यन्ते ॥ अत एव प्राकृतभाषाया हलन्तशब्दानामभावात् त्रिणि एव लिङ्गानि प्रायेण भवन्ति ॥ नतु षड्लिङ्गानि ॥

णरो, एसो पिओ, एसा मुद्धा, साविटयेत्र, ते एए धन्ना, ताओ एआओ महिलाओ, अन्तीने इति किम्? तं एअं वणं ॥

वैसेणमिणमो सिना ॥ ३ ॥ ८५ ॥ एतदः सिना सह एस इणम् इणमो[1] इत्यादेशा वा भवन्ति ॥ सव्वस्स वि एस गई ॥ सव्वाण वि पत्थिवाण एस मही ॥ एस सहाओ च्चिअ ससहरस्स, एस सिरं, इणं इणमो ॥ पक्षे एअं, एसा, एसो ॥

तदो णः स्यादौ क्वचित् ॥ ३ ॥ ७० ॥ तदः स्थाने स्यादौ परे ण आदेशो भवति ॥ क्वचिद् लक्ष्यानुसारेण ॥ णं पेच्छ 'तं पश्ये-त्यर्थः, सोअइ[1] 'अ णं रहुवई 'तमित्यर्थ, स्त्रियामपि. हत्थुन्नामिअमुही णं तिअडा[2], 'तां त्रिजटेत्यर्थः, णेण भणिअं 'तेन 'भणितमित्यर्थः, तो[3] णेण करयलट्ठिआ 'तेन इत्यर्थ, भणिअं च णाए,'तयेत्यर्थः', णेहिं कयं 'तैः कृतमित्यर्थः, णाहिं कयं 'ताभिः कृतमित्यर्थः' जसि तु, ते एए, । १ । अमि, तं णं एअं, शसि ता ते एता एए ॥ २ ॥

इदमेतत्किं यत्तद्भ्यष्टो डिणा ॥ ३ ॥ ६६ ॥ एभ्यः सर्वादि-भ्योऽकारान्तेभ्य. परस्याष्टायाः स्थाने डित् इणा इत्यादेशो वा भवति ॥ इमिणा इमेण, एदिणा,[4] एदेण, किणा केण, जिणा जेण, तिणा, तेण, पक्षे तेण तेणं, एएण एएणं, तेहिं तेहि, एएहिं एएहि ॥ ३ ॥

ङसेम्हा ॥ ३ ॥ ६६ ॥ किंयत्तद्भ्यः परस्य ङसेः स्थाने म्हा इत्यादेशो वा भवति ॥ कम्हा जम्हा तम्हा, पक्षे काओ जाओ ताओ ॥

---

१ एते आदेशास्त्रिषु अपि लिङ्गेषु भवन्ति ॥ २ हस्तोन्नामितमुखीता त्रिजटा । १ शोचति च त रघुपतिः ॥ ३ तस्मात् तेन करतलस्थिता ॥ ४ तोदोऽनादौ शौरसेन्यामयुक्तस्य ॥ ४ ॥ २६० ॥ इति तकारस्य दकारादेशः ॥

वैतदो ङसेस्त्तो त्ताहे ॥ ३ ॥८२॥ एतदः परस्य ङसे- स्थाने त्तो त्ताहे इत्येतौ आदेशौ वा भवतः ॥

त्थे च तस्य लुक् ॥ ३ ॥ ८३ ॥ एतदस्त्थे परे चकारात् त्तो त्ताहे इत्येतयोश्च परयोः तस्य लुक् भवति ॥ एत्तो एत्ताहे पत्ते, एआओ एआउ एआहि एआहिन्तो एआ ॥ ताओ ताउ ताहि ताहिन्तो ॥

तदो डोः ॥ ३ ॥ ६७ ॥ तदः परस्य ङसेर्डो इत्यादेशो वा भवति । तो, पत्ते तम्हा ॥ ५ ॥

किंयत्तद्भ्यो ङसः ॥ ३ ॥ ६३ ॥ एभ्य परस्य ङसः स्थाने डास इत्यादेशो वा भवति । 'ङसः स्सः' ॥ ३ ॥ १० ॥ इत्यस्यापवाद, पत्ते सोऽपि भवति । कास कस्स, जास जस्स तास तस्स, एअस्स, बहुलाधिकारात् किंतद्भ्याम् आकारान्ताभ्यामपि डासादेशो वा भवति, (कस्या धनं,) कास धणं (तस्या धनं) तास धणं पत्ते, काए ताए ॥

किंतद्भ्यां डासः ॥ ३ ॥ ६२ ॥ किंतद्भ्यां परस्य आमः स्थाने डास इत्यादेशो वा भवति । कास, तास, पत्ते, केसि, तेसिं ॥

वेदं तदेतदो ङसाम्भ्यां सेसिमौ ॥ ३ ॥ ८१ ॥ इदं तद् एतद् इत्येतेषां स्थाने ङस् आम् इत्वेताभ्यां सह यथा संख्यं से सिम इत्यादेशौ वा भवत. । 'इदम्, से सीलं, से गुणा' (अस्य शीलं गुणा वेत्यर्थः ।) सिं उच्छाहो, (एषामुत्साह) इत्यर्थः ॥ तद्, से सीलं, (तस्य तस्या वेत्यर्थः) सिं गुणा, (तेषां तासा वेत्यर्थ.) (एतद्) से अहिअं, (एतस्याधिकम् अहित वेत्यर्थः) सि गुणा, सिं सीलं, (एतेषां गुणाः शीलं वेत्यर्थः) पत्ते इमस्स इमेसिं इमाण, तस्स तेसिं ताण, एअस्स एएसिं एआण ॥ इदंतदोरामापि से आदेशं केचिदिच्छन्ति ६ ॥ सप्तम्येकवचने, स्सि म्मि त्थ इत्यादेशे कृते ॥

एरदीतौ म्मौ वा ॥ ३ ॥ ८४ ॥ एतद एकारस्य ङ्यादेशे म्मौ परे अदीतौ वा भवतः ॥ अअम्मि ईअम्मि, पक्षे एअम्मि, एअस्सि एत्थ[1] तस्सि तत्थ तम्मि ॥

ङे र्डाहे–डाला–इआ काले ॥ ३ ॥ ६५ ॥ कियत्तद्भ्यः कालेऽभिधेये ङेः स्थाने, आहे आला इति डितौ इआ इति च आदेशा वा भवन्ति ॥ हिंस्सिम्मित्थानामपवाद, पक्षे तेपि भवन्ति ॥ काहे काला कइआ, जाहे जाला जइआ, ताहे ताला तइआ, । ताला[1] जाअंति, गुणा जाला ते सहि अएहिं घेप्पंति ॥ रविकिरणाणुग्गहि आइं हुंति कमलाइं कमलाइं ॥ सुपि तु एरासु एएसु तेसु तेसुं ॥७॥ शेषं सर्ववत् त्यदादीनां प्रायेण संबोधन न संभवति ॥ हे स इति भाष्यप्रयोगात्क्वचिद्भवत्यपि ॥

अथ इदं शब्दस्य पुंलिङ्गे रूपाणि

पुंस्त्रियोर्न वाऽयमिमिआ सौ ॥ ३ ॥ ७३ ॥ इदम् शब्दस्य सौ परे अयम् इति पुंलिङ्गे, इमिआ इति स्त्रीलिङ्गे आदेशौ व भवतः । अहवाऽयं कयकज्जो, इमिआ वाणिअधूआ ॥ पक्षे,

इदम इमः ॥ ३ ॥ ७२ ॥ इदम स्यादौ परे इम आदेशो भवति इमो, इमे, । १ । स्त्रियामपि इमा ॥

अमेणम् ॥ ३ ॥ ७८ ॥ इदमोऽमा सहितस्य स्थाने इणम् इत्यादेशो वा भवति । इणं पेच्छ पक्षे ॥

---

१ त्ये च तस्य लुक् ॥ ३ ॥ ८३ ॥ इति तकारस्य लुक् ॥ २ ॥ तदा जायान्ति गुणा., यदा ते स्वहृदयैर्गृह्णन्ति रविकिरणानुगृहीतानि भवन्ति कमलानि कमलानि ।

णोऽम्शस्टाभिसि ॥३॥७७॥ इदमः स्थाने अम्शस्टा-भिस्सु परेषु ण आदेशो वा भवति। णं पेच्छ। णे पेच्छ। णेण णेहिं कय। पक्षे इमं इमे इमा ॥२॥ इमेण इमेणं, [1]इमिणा इमेहि इमेहिं इमेहि ॥३॥ ङसि-इमत्तो, इमाओ, इमाउ,। इमाहि, इमाहिन्तो इमा। भ्यसि-इमत्तो, इमाओ, इमाउ। इमाहि इमेहि, इमाहिन्तो इमेहिन्तो, इमासुन्तो इमेसुन्तो ॥५॥

स्सिस्सयो–रत् ॥३॥७४॥ इदमः स्सिस्स इत्येतयोः परयोरद् वा भवति। अस्स, अस्सि पक्षे इमादेशोपि। इमस्स इमस्सि से[2]। बहुलाधिकारादन्यत्रापि भवति। [3]एहि, एसु, आहि, एभिः, एषु आभिरित्यर्थः। आमि तु इमाणसि ॥६॥

ङेर्मेन ह ॥३॥७५॥ कृतेमादेशाद् इदमः परस्य ङे स्थाने मेन सह ह आदेशो वा भवति। इह। पक्षे।

न त्थः ॥३॥७६॥ इदम. परस्य ङे· स्सिम्मित्था इति प्राप्तस्त्थो न भवति। इह इमस्सि इमम्मि। सुपि–इमेसु, इमेसु ॥७॥ शेप सर्ववद्।

---

१ इदमेतत्किंयत्तद्भ्यष्टो डिणा ॥३॥६९॥ इति टास्थाने डिणादेश ॥

२ वेद तदेतदो ङसाम्भ्या सेसिमौ ॥३॥८१॥ इति ङसा सहितस्य इदमः से आदेश.।

३ अत्र भिस्सुपोः परयोरिदमोऽत्त्वम्।

अथ किं *शब्दस्य रूपाणि

किम् सि इति स्थितम्

किमः कस्त्रतसोश्च ॥३॥७१॥ किम. को भवति स्यादौ त्रतसोश्च परयो: । को । के ॥१॥ कं । के। का ॥२॥ [1]किणा, केण, केहि केहिं, केहिँ ॥३॥

किमो डिणो डीसौ ॥३॥६८॥ किम परस्य डसेर्डिणो डीस इत्यादेशौ वा भवत. । किणो कीस, कम्हा, कत्तो कदो काउ काहि काहिन्तो का कत्तो काओ काउ काहि केहि काहिन्तो केहिन्तो कासुन्तो केसुन्तो ॥५॥ [2]कास कस्स, [3]कास [4]केसिं काण ॥६॥ [5]कहिं कस्सि कत्थ, कम्मि, केसु केसुं ॥७॥ इत्यादि । शेष सर्ववत् ।

अथ अदश्शब्दस्य पुल्लिङ्गे रूपाणि

वाऽदसो दस्य हो नोदाम् ॥३॥८७॥ अदसो दकारस्य सौ परे ह आदेशो वा भवति, तस्मिश्च कृते अत: सेर्डोरि-योत्त्वं शेषं सस्कृतवदित्यतिदेशात्, आत् (हे. २।४) इत्याप्,

---

* यद्यपि गणपाठानुसारेण किं शब्दस्य रूपाणि युष्मच्छब्दात्पश्चादेव दर्शनीयानि भवन्ति, तथापि तदेतच्छब्दयोर्मध्ये बहुसूत्राणां सद्भावात् किं शब्दस्यापि तदन्तर्गतत्वात् गणपाठक्रमो न विवक्षित ।

१ इदमेतत्कियत्तद्भ्यष्टो डिणा ॥३।६९॥ इति टास्थाने डिणादेश ।

२ कियत्तद्भ्यो ङस ॥३॥६३॥ इति ङसस्थाने डासादेश ।

३ कितद्भ्या डाम ॥३॥६२॥ इत्यामो डासादेश. ।

४ आमो डेसिं ॥३॥६१॥ इत्यामो डेसिमादेश ।

५ नवा तिदमेतदो हिं ॥३॥६०॥ इति ङेर्हिमादेश. ।

क्लीबे स्वरान्म् सेः ॥३॥२५॥ इति मश्च न भवति, अह पुरिसो । अह महिला । अह वण । अह मोहो पर गुण लहु आई । अह णे हिअएण हसइ मारुअतणओ । (असावस्मान् हसति इत्यर्थ) अह कमलमुही, पक्षे

मुः स्यादौ ॥३॥८८॥ अदसो दस्य स्यादौ परे मुरादेशो भवति । अमू पुरिसो । अमु वणं । अमू माला । जशि, [१]अमुणो पुरिसा, [२]अमूइ वणाइ । अमूणि धनाणि । [३]अमूउ, अमूओ, मालाओ ॥१॥ अमु पुरिस । अमुणो पुरिसे, ॥२॥ अमुणा, अमूहिं ॥३॥ अमुत्तो, अमूओ, अमूउ अमूहिन्तो । भ्यसि अमूहिन्तो अमूसुन्तो ॥५॥ ङसि, [४]अमुणो, अमुस्स । आमि, अमूण ॥६॥ङो ।

म्मावयेऔ वा ॥३॥८९॥ अदसोऽन्त्यव्यञ्जनस्य लुकि दकारान्तस्य स्थाने ङचादेशे म्मौ परे अय इय इत्यादेशौ वा भवत । अयम्मि । इअम्मि । पक्षे अमुम्मि सुपि, अमूसु । शेषं वक्ष्यमाण भानु शव्दवत् ।

अथ युष्मदस्मच्छब्दयो रूपाणि

युष्मदस्तं तुं तुवं तुह तुमं सिना ॥३॥९०॥ युष्मदः सिना सह तं तु तुवं तुह तुमं इत्येते पञ्चादेशा भवन्ति । त तुं तुव तुह तुमं दिट्ठो ॥

---

१ जश्शसोर्णो वा ॥३॥२२॥ इति जसो णो ।

२ जश्शस् ईंइंणय सप्राग् दीर्घ ॥३॥२६॥ इति जस् इमादेश ।

३ स्त्रियामुदोतौ वा ॥३॥२७॥ इति जश उदोतौ आदेशौ ।

४ ङसिङसो पुंक्लीवे वा ॥३॥२२॥ इति ङसो णोरादेश. ।

भे तुब्भे उज्झे तुम्ह तुय्हे उय्हे जसा ॥३॥९१॥ युष्मदो जसा सह एते षडादेशा भवन्ति । भे तुब्भे, उज्झे तुम्ह तुय्हे उय्हे चिट्ठह । ब्भो म्हज्झौ वा ॥३॥१०४॥ इति वचनात् तुम्हे तुज्झे एवं चाष्ट रूपाणि ॥१॥

तं तुं तुवं तुमं तुह तुमे तुए अमा ॥३॥९२॥ युष्म-दोऽमा सह एते सप्तादेशा भवन्ति । तं तु तुवं तुम तुह तुमे तुए वंदामि ॥

वो तुब्भे उज्झे तुय्हे उय्हे भे शसा ॥३॥९३॥ युष्मदः शसा सह एते षडादेशा भवन्ति । वो तुब्भे उज्झे तुय्हे उय्हे भे, पेच्छामि ॥२॥ ब्भो म्हज्झौ वेति वचनात् तुम्हे तुज्झे ॥

भे दि दे ते तइ तए तुमं तुमइ तुमए तुमे तुमाइ टा ॥३॥९४॥ युष्मदष्टा इत्यनेन सह एते एकादशा देशा भवन्ति । भे दि दे ते तइ तए तुमं तुमइ तुमए तुमे तुमाइ, जंपिअं ॥

भे तुब्भेहिं उज्झेहिं, उम्हेहिं तुय्हेहिं उय्हेहिं भिसा ॥३॥९५॥ युष्मदो भिसा सह एते षडादेशा भवन्ति । ब्भे तुब्भेहिं उज्झेहिं उम्हेहिं तुय्हेहिं उय्हेहिं भुत्त, ब्भो म्हज्झौ वेति वचनात् तुज्झेहिं तुम्हेहिं एवम् च अष्ट रूपाणि ॥३॥

तइ तुव तुम तुह तुब्भा ङसौ ॥३॥९६॥ युष्मदो ङसौ पञ्चम्येक वचने परत एते पञ्चादेशा भवन्ति ङसेस्तु त्तोदो दुहि हिन्तो लुको यथा प्राप्तमेव । तइत्तो तुवत्तो तुमत्तो, तुहत्तो तुब्भत्तो, ब्भो म्हज्झौ वेति वचनात् तुम्हत्तो तुज्झत्तो एव

दो दुहि हिन्तो लुक्ष्वपि उदाहार्यम् ॥ तत्तो इति तु त्वत्त इत्यस्य व लोपे सति ।

तुय्ह तुब्भ तहिन्तो ङसिना ॥३॥९७॥ युष्मदो ङसिना सहितस्य एते त्रय आदेशा भवन्ति । तुय्ह तुब्भ तहिन्तो आगओ । ब्भो म्हज्झौ वेति वचनात् तुम्ह तुज्झ एवञ्च पञ्चरूपाणि ।

तुब्भ तुय्हो य्हो म्हा भ्यसि ॥३॥९८॥ युष्मदो भ्यसि परत एते चत्वार आदेशा भवन्ति । भ्यसस्तु यथा प्राप्तमेव, तुब्भत्तो, तुय्हत्तो, उय्हत्तो, उम्हत्तो, ब्भो, म्हज्झौ वेति वचनात् तुम्हत्तो तुज्झत्तो । एवं दोदुहि हिन्तो सुन्तेष्वपि उदाहार्यम् ॥५

तइ तुं ते तुम्ह तुह तुहं तुम तुव तुमे तुमो तुमाइ दि दे इ ए तुब्भो ब्भो-य्हा ङसा ॥३॥९९॥ युष्मदो ङसा षष्ठ्येकवचनेन सहितस्य एते अष्टादशादेशा भवन्ति । तइ तुं ते तुम्ह तुह तुहं तुव तुम तुमे तुमो तुमाइ दि दे इ ए तुब्भ उब्भ उय्ह धण । ब्भो म्हज्झौ वेति वचनात् तुम्ह तुज्झ उम्ह उज्झ एव च द्वाविंशतिरूपाणि ।

तु वो भे तुय्ह तुब्भ उब्भ तुब्भाण तुवाण तुमाण तुहाण तुम्हाण आमा ॥३॥१००॥ युष्मद आमा सहितस्य एते दशादेशा भवन्ति । तु वो भे तुय्ह तुब्भ उब्भ तुब्भाण तुवाण तुमाण तुहाण तुम्हाण । क्त्वास्यादेर्णस्वोर्वेत्यनुस्वारे, तुब्भाण तुवाण तुमाण तुहाण तुम्हाण । ब्भो म्हज्झौ वेति वच-नात् तुम्ह तुज्झ उम्ह उज्झ तुम्हाण तुम्हाण तुज्झाण तुज्झाण,

एवं च त्रयोविंशति रूपाणि ॥६॥

तुमे तुमए तुमाइ तइ तए ङिना ॥३॥१०१॥ युष्मदो ङिना सप्तम्येकवचनेन सहितस्य एते पञ्चादेशा भवन्ति । तुमे तुमए तुमाइ तइ तए ठिअ ॥

तु तुव तुम तुह तुब्भा ङौ ॥३॥१०२॥ युष्मदो ङौ परत एते पञ्चादेशा भवन्ति । ङेस्तु यथा प्राप्तमेव, तुम्मि, तुवम्मि तुमम्मि तुहम्मि, तुब्भम्मि ब्भो म्हज्झौ वेति वचनात् तुम्हम्मि तुज्झम्मि इत्यादि ॥

सुपि ॥३॥१०३॥ युष्मद सुपि परत तु तुव तुम तुह तुब्भा भवन्ति । तुसु तुवेसु तुमेसु तुहेसु तुब्भेसु ब्भो म्हज्झौ वेति वचनात् तुम्हेसु तुज्झेसु । केचित्तु सुपि एत्त्वविकल्पमिच्छन्ति, तन्मते, तुवसु तुमसु तुहसु तुब्भसु तुम्हसु तुज्झसु तुब्भस्य आत्व-मपि इच्छन्ति इत्यन्ये, तुब्भासु तुम्हासु तुज्झासु ॥

ब्भो म्हज्झौ वा ॥३॥१०४॥ युष्मदादेशेषु यो द्विरुक्तो भस्तस्य म्ह ज्झ इत्येतौ आदेशौ वा भवतः । पक्षे स एवास्ते तथैव च उदाहृतम् ॥

अस्मदो म्मि अम्मि अम्हि हं अहं अहयं सिना-॥३॥१०५॥ अस्मद सिना सह एते षडादेशा भवन्ति । अज्ज म्मि हासिआ मामि तेण, मामि (इति सम्बोधने) अद्य अहं तेन हासिता । उन्नम न अम्मि कुविआ, अम्हि करेमि जेण ह विद्धा कि पम्हट्ठम्मि अहं अहयं कयप्पणामो ॥

अम्ह अम्हे अम्हो मो वयं भे जसा ॥३॥१०६॥
असमदो जसा सहैते षडादेशा भवन्ति । अम्ह अम्हे अम्हो मो वय भे, भणामो ॥१॥

णे णं मि अम्मि अम्ह मम्ह मं ममं मिमं अहं अमा ॥३॥१०७॥ अस्मदोऽमा सह एते दशादेशा भवन्ति । णे ण मि अम्मि अम्ह मम्ह म ममं मिम अह पेच्छ ॥

अम्हे अम्हो अम्ह णे शसा ॥३॥१०८॥ अस्मद शसा सह एते चत्वार आदेशा भवन्ति । अम्हे अम्हो अम्ह णे पेच्छ ॥

मि मे ममं ममए ममाइ मइ मए मयाइ णे टा– ॥३॥१०९॥ अस्मदष्टा सहितस्य एते नवादेशा भवन्ति । मि मे मम ममए ममाइ मइ मए मयाइ णे कयं ॥

अम्हेहिं अम्हाहिं अम्ह अम्हे णे भिसा ॥३॥११०॥ अस्मदो भिसा सह एते पञ्चादेशा भवन्ति ॥ अम्हेहि, अम्हाहि अम्ह, अम्हे, णे, कय ॥३॥

मइ मम मह मज्झा ङसौ ॥३॥१११॥ अस्मदो ङसौ पञ्चम्येकवचने परत एते चत्वार आदेशा भवन्ति । ङसे–स्तु यथाप्राप्तमेव, मइत्तो, ममत्तो, महत्तो, मज्झत्तो, आगओ, मत्तो इति तु मत्त इत्यस्य, एव दोदुहिहिन्तोलुक्ष्वपिउदाहार्यम् ॥

ममाम्हौ भ्यसि ॥३॥११२॥ अस्मदो भ्यसि परतो मम अम्ह इत्यादेशौ भवत । भ्यसस्तु यथाप्राप्त, ममत्तो अम्हत्तो ममाहिन्तो अम्हाहिन्तो, ममासुन्तो अम्हासुन्तो, ममेसुन्तो अम्हेसुन्तो ॥५॥

से मइ मम मह महं मज्झ मज्झं अम्ह अम्हं ङसा ॥३॥११३॥ अस्मदो ङसा षष्ठ्येकवचनेन सहितस्य एते नवादेशा भवन्ति। मे मइ मम मह मह मज्झ मज्झ अम्ह अम्हं धणं ॥

णे णो मज्झ अम्ह अम्हं अम्हे अम्हो अम्हाण ममाण महाण मज्झाण आमा ॥३॥११४॥ अस्मद आमा सहितस्य एते एकादशादेशा भवन्ति । णे णो मज्झ अम्ह अम्हं अम्हे अम्हो अम्हाण ममाण महाण मज्झाण धणं । क्त्वास्यादेर्णस्वोर्वेत्यनुस्वारे, अम्हाण ममाण महाणं मज्झाण । एव च पञ्चदश रूपाणि ॥६॥

मि मइ ममाइ मए मे डिना ॥३॥११५॥ अस्मदो डिना सहितस्य एते पञ्चादेशा भवन्ति । मि मइ ममाइ मए मे ठिअ ॥

अम्ह मम मह मज्झा ङौ ॥३॥११६॥ अस्मदो ङौ परत एते चत्वार आदेशा भवन्ति। ङेस्तु यथाप्राप्तम् । अम्हम्मि ममम्मि महम्मि मज्झम्मि ठिअ ॥

सुपि ॥३॥११७॥ अस्मद सुपि परे अम्हादयश्चत्वार आदेशा भवन्ति । अम्हेसु ममेसु महेसु मज्झेसु । एत्त्वविकल्पमते तु अम्हसु ममसु महसु मज्झसु । अम्हस्य आत्त्वमपीच्छन्ति अन्ये अम्हासु ॥

इति युष्मदस्मत्प्रकरणम् ॥

अथ इकारोकारान्तौ गिरिभानुशब्दौ

गिरि सि भाणु सि इति स्थिते

अक्लीबे सौ ॥३॥१९॥ इदुतोरक्लीबे नपुंसकादन्यत्र सौ दीर्घो भवति। गिरी भाणू बुद्धी धेणू। अक्लीब इति किं [1]दहि महु। साविति किं गिरिं भाणुं बुद्धिं धेणुं। केचित्तु दीर्घत्वं विकल्प्य तदभावपक्षे सेर्मादेशमपीच्छन्ति। अग्गिं निहिं वाउं विहुं ॥

पुंसि जसो डउ डओ वा ॥ ३॥२०॥ इदुत इति पञ्चम्यन्तं सम्बध्यते। इदुतः परस्य जसः पुंसि अउ अओ इत्यादेशौ डितौ वा भवतः। गिरउ गिरओ भाणउ भाणओ चिट्ठन्ति॥ पुंसीति किम् [2]बुद्धीओ धेणूओ दहीइं, [3]महूइं। जस इति किम्, [4]गिरी गिरिणो भानू भानुणो पेच्छइ, इदुत इत्येव वच्छा। पक्षे

जश्शसोर्णो वा ॥३॥२२॥ इदुत परयोः जश्शसोः पुंसि णो इत्यादेशो वा भवति ॥

न दीर्घो णो ॥३॥१२५॥ इदुदन्तयोरर्थात् जश्शसङ-स्यादेशे णो इत्यस्मिन् परतो दीर्घो [5]न भवति। गिरिणो भाणुणो रेहन्ति। पक्षे शेषे अदन्तवद् [6]भावात् गिरी भाणू। पुंसीत्येव

---

१ अत्र 'क्लीबे स्वरान्म्से ॥३॥२५॥ इति सेर्मकारादेश ॥ २ स्त्रियामुदोतौ वा ॥३॥२७॥ इति उत् ओत् आदेश' सप्राग् दीर्घ ।३। जश् जस् इं-इणय सप्राग् दीर्घा ॥३॥२६॥ इति। ४। अत्र च शस स्थाने न भवतः॥ ५ जश्शस्ङसित्तोदोद्वामि दीर्घः इति ॥३॥१२॥ प्राप्तस्य अनेन निषेधः॥ ६ शेषेऽदन्तवत् ॥३॥१२४॥ इति सूत्रेण ॥

दहीइं महूइं, जश्शसोरिति किम् गिरिं भाणु । इदुत इत्येवं वच्छा वच्छे । जश्शसोरिति द्वित्वम् इदुत इत्यनेन [1] यथासङ्ख्याभावार्थम् । एवमुत्तरसूत्रेऽपि ॥

वोतो डवो ॥३॥२१॥ उदन्तात् परस्य जसः पुंसि डित् अवो इत्यादेशो वा भवति । भाणवो । पक्षे भाणओ भाणउ भाणू भाणुणो । उत इति किं वच्छा, पुंसीत्येव धेणू महूइं, जस इत्येव भाणू भाणुणो पेच्छ ॥१॥ अमि तु गिरिं भाणु । शसि, गिरिणो भाणुणो, ॥

लुप्ते शसि ॥३॥१८॥ इदुतोः शसि लुप्ते दीर्घो भवति । गिरी भाणू, वुद्धी धेणू पेच्छ, लुप्त इति किम् गिरिणो भाणुणो पेच्छ । इदुत इत्येव वच्छे पेच्छ । जस्शस् ॥३॥१२॥ इत्यादिना शसि दीर्घस्य लक्ष्यानुरोधार्थोऽय योगः । लुप्त इति तु णवि प्रतिप्रसवार्थशङ्कानिवृत्त्यर्थम् ॥२॥

टो णा ॥३॥२४॥ पुंक्लीबे वर्त्तमानादिदुतः परस्य टा इत्यस्य णा भवति । गिरिणा [2] गामणिणा, भाणुणा खलपुणा तरुणा, दहिणा महुणा । टा इति किम् । गिरी भाणू दहि महुं पुंक्लीबे इत्येव, [3] बुद्धीए धेणूए कय । इदुत इत्येव कमलेण ॥

इदुतोदीर्घः ॥३॥१६॥ इकारस्य उकारस्य च भिस्भ्यस्सुप्सु परेषु दीर्घो भवति । गिरीहि गिरीहिँ गिरीहि भाणूहि

---

१ अन्यथा इकारान्तात् जशो णो, उकारान्तात् शसो णो इत्यर्थोपि सम्भाव्येत ॥ २ क्विप. ३॥४३॥ इति सूत्रेण ह्रस्वः ॥ ३ टाङस्ङे रदादिदेद्वा तु ङसेः ३॥२९॥ इति सूत्रेण एत्वम्

भाणूहिँ भाणूहिं, बुद्धीहिं दहीहिं तरूहिं धेणूहिं कयं ॥३॥ क्वचिन्न भवति, [१] दिअभूमिसु दाणजलोल्लिआइं, इदुत इति किम् वच्छेहिं, वच्छेसुन्तो, वच्छेसु, भिसभ्यस्सुपीत्येव, गिरि तरुं पेच्छ ॥३॥

ङसिङसोः पुंक्लीबे वा ॥३॥२३॥ पुंसि क्लीबे च वर्त्तमानादिदुतः परयोर्ङसिङसोर्णो वा भवति, गिरिणो [२] भाणुणो, दहिणो महुणो आगओ वियारो वा। पक्षे ङसौ गिरीओ गिरीउ गिरीहिन्तो भाणूओ भाणूउ भाणूहिन्तो। [३] हिलुकौ निषेत्स्येते। भ्यसि गिरीओ गिरिहिन्तो गिरीसुन्तो, भाणूओ भाणूहिन्तो भाणूसुन्तो ॥५॥ ङसि गिरिणो गिरिस्स भाणुणो भाणुस्स। आमि तु, गिरीण गिरीणं भाणूण भाणूण ॥६॥ ङौ गिरिम्मि भाणुम्मि सुपि *गिरीसु गिरीसुं भाणूसु भाणूसुं ॥७॥ हे [४] गिरी हे गिरि, हे *गिरिणो गिरओ गिरउ। हे भाणू हे भाणु हे [५] भाणवो भाणुणो भाणओ भाणउ। शेषं वच्छशब्दवत्, एवं कविमुनिसूरिप्रभृतय इकारान्तास्तथा वायुतरुगुर्वादय उकारान्ताश्च अन्यपि ज्ञेयाः। प्राकृते इकारान्तो द्विशब्दो बहुवचनान्तः ॥

---

१ द्विजभूमिषु दानजलार्द्रितानि ॥ २ न दीर्घो णो ॥३॥ १२५॥ इति दीर्घाभावः ॥ ३ ङसेर्लुक् ॥३॥१२६॥ भ्यसश्चहि ॥३॥१२७॥ इति सूत्राभ्याम् ॥ ४ डोदीर्घोवा ॥३॥३८॥ इति विकल्पेन दीर्घः ॥ ५ वोतो डवो ॥३॥२१॥ इति जसो डवो आदेश ॥ *इदुतोर्दीर्घः ॥३॥१६॥ इति दीर्घः *जश्शसो र्णो वा ॥३॥२२॥ इति णो आदेशः ॥

दुवे दोण्णि वेण्णि च जश्शसा ३॥१२०॥ जश्शस्भ्यां सहितस्य द्वेः स्थाने दुवे दोण्णि वेण्णि इत्येते दो वे च आदेशा भवन्ति । दुवे दोण्णि वेण्णि दो वे, ठिआ, पेच्छ वा, 'ह्रस्वः संयोगे ॥१॥८४॥ इति ह्रस्वत्वे दुण्णि विण्णि ॥

द्वेर्दो वे ॥३॥११९॥ द्विशव्दस्य तृतीयादौ दो वे इत्यादेशौ भवतः । दोहिं वेहिं कयं ॥३॥ दोहिन्तो वेहिन्तो ॥५॥ आगओ ॥

संख्याया आमो ण्ह ण्हं ॥३॥१२३॥ सख्याशव्दात्परस्य आमो ण्ह ण्हं इत्यादेशौ भवतः । दोण्ह दोण्हं वेण्ह वेण्हं धणं ॥६॥ पंचण्ह छण्ह सत्तण्ह अट्ठण्ह नवण्ह दसण्ह पचण्हं छण्हं सत्तण्हं अट्ठण्हं नवण्हं दसण्हं, 'पण्णरसण्हं दिवसाणं, अट्ठारसण्हं समणसाहस्सीणं, (कतीनाम्) कइण्हं, वहुलाधिकारात् विंशत्यादेर्न भवति । सुपि तु । दोसु दोसुं, वेसु वेसुं इति ॥७॥

त्रेस्तिण्णिः ॥३॥१२१॥ जश्शस्भ्यां सहितस्य त्रेःस्थाने तिण्णि इत्यादेशो भवति, तिण्णि ठिआ पेच्छ वा ॥

त्रेस्ती तृतीयादौ ॥३॥११८॥ त्रे. स्थाने ती इत्यादेशो भवति, तृतीयादौ । तीहिं कयं, तीहिन्तो, आगओ, तिण्ह तिण्हं धणं, तीसु ठिअं ॥

चतुरश्चत्तारो चउरो चत्तारि ॥३॥१२२॥ चतुःशव्दस्य जश्शस्भ्यां सह चत्तारो चउरो चत्तारि इत्येते आदेशा भवन्ति । [1]चत्तारो चउरो चत्तारि, चिट्ठन्ति पेच्छ वा ॥

---

१ चतु.शव्दस्यापि अन्त्यव्यञ्जनस्य इति रलोपे उकारान्तत्वात् तन्मध्ये निर्देशः ॥

चतुरो वा ॥३॥१७॥ चतुरुदन्तस्य भिस्भ्यस्सुप्सु परेषु दीर्घो वा भवति । चऊहि चऊहिँ, चऊहिं चउहि चउहिँ चउहिं ॥३॥ चऊओ चउओ चऊहिन्तो चउहिन्तो चऊसुन्तो चउसुन्तो॥५॥ चउण्ह चउण्हं ॥६॥ चऊसु चउसु ॥७॥ इति इदुदन्ता. शब्दा. ॥

ईकारान्त. पुल्लिङ्गो ग्रामणी शब्द:, तथा ऊकारान्त: पुल्लिङ्ग: खलपूशब्द: ॥

क्विप: ॥३॥४३॥ [१]क्विबन्तस्य ईदूदन्तस्य ह्रस्वो भवति गामणिणा खलपुणा गामणिणो खलपुणो ॥

ईदूतोर्ह्रस्व. ॥३॥४२॥ आमन्त्रणे सौ परे ईदूदन्तयो-र्ह्रस्वो भवति । हे नइ, हे गामणि हे समणि, हे खलपु, इत्यादि । शेषं गिरिभानुशव्दवत्, एवं सुश्रीसुधीवर्षाभ्वग्रसरा अपि ज्ञेया. ॥

ऋकारान्त: पुल्लिङ्ग: कर्त्तृशब्द: ॥

आ सौ न वा ॥३॥४८॥ ऋदन्तस्य सौ परे आकारो वा भवति । कत्ता, पिआ, जामाया, माया ॥ पक्षे

आर: स्यादौ ॥३॥४५॥ स्यादौ परे ऋत आर इत्या-देशो भवति । कत्तारो, कत्तारा ॥१॥ कत्तारं कत्तारे कत्तारा ॥२॥ कत्तारेण कत्तारेहि ॥३॥ एवं ङस्यादिष्वपि सर्वत्र वृक्ष-शव्दवद् उदाहार्यम् । संबोधने तु

---

१ प्राकृतप्रकाशे ईकारोकारान्तशब्दाना सावकानि पृथक् सूत्राणि न दृश्यन्ते, ज्ञायते तेषामपि इकारोकारान्तवद् रूपाणि भवन्ति, अत्र ततो यद् विशेष तदाह क्विप इति ॥

ऋतोऽद्वा ॥३॥३९॥ ऋकारान्तस्य आमन्त्रणे सौ परे अकारो वा भवति । हे कत्त, (हे कर्त्त) हे पिअ (हे दात.) हे दाय, पक्षे हे कत्तार, ॥

नाम्न्यरं वा ॥३॥४०॥ ऋदन्तस्य आमन्त्रणे सौ परे नाम्नि सज्ञायां विषये अरम् इत्यादेशो वा भवति । (हे पितः) हे पिअरं, पक्षे हे पिअ, नाम्मीति किम्, (हे कर्त्तः) हे कत्तार ॥

ऋताम् उद् अस्यमौसु वा ॥३॥४४॥ सि अम् औ वर्जिते अर्थात् स्यादौ परे ऋदन्तानाम् उदन्तादेशो वा भवति । जसि, कत्तू, कत्तुणो, कत्तउ, कत्तओ, पक्षे, कत्तारा ॥१॥ शसि, कत्तू, कत्तुणो, पक्षे कत्तारे ॥२॥ टा कत्तुणा, पक्षे कत्तारेण, भिसि कत्तूहिं। पक्षे कत्तारेहिं ॥३॥ ङसौ कत्तुणो, कत्तूओ, कत्तूउ, कत्तूहिन्तो, पक्षे, कत्ताराओ ॥५॥ ङसि कत्तुणो कत्तुस्स, पक्षे कत्तारस्स ॥६॥ सुपि कत्तूसु, पक्षे कत्तारेसु । शेषं भानुशब्दवत्। एवं भर्त्तृनेतृदातृप्रभृतयोऽपि ज्ञेया. ऋकारान्त पुल्लिङ्ग. पितृशब्दः

नाम्न्यरः ॥३॥४७॥ ऋदन्तस्य नाम्नि संज्ञायां स्यादौ परे अर इत्यन्तादेशो भवति । पिअरो पिअरा ॥१॥ पिअरं पिअरे ॥२॥ पिअरेण पिअरेहिं ॥३॥ जामायरो जामायरा ॥१॥ जामायरे ॥२॥ जामायरेण ॥३॥ इत्यादि, शेष वच्छशब्दवत् ॥ भ्रातृप्रभृतयोऽपि सज्ञावाचका उदाहार्या । इति ऋदन्तशब्दाः ॥ गोशब्दस्य च पुल्लिङ्गे [1] गाव इति गोण इति वा आदेशो भवति । ततश्च स्यादौ अदन्तवत् रूपाणि भवन्ति ॥

---

१ गोणादयः ॥२॥१७४॥ इत्यनन सूत्रेण ॥

नकारान्तः पुल्लिङ्गो राजन् इति शब्दः ॥

राज्ञः ॥३॥४९॥ राज्ञो लोपेऽन्त्यस्य आत्वं वा भवति सौ परे। राया, हे राया, पक्षे आणादेशं च [1]वक्ष्यते रायाणो, हे राया, हे रायमिति तु शौरसेन्याम्, एव हे अप्प हे अप्प ॥

जश्शस्ङसिङसां णोः ॥३॥५०॥ राजन्शब्दात् परेषाम् एषां णो इत्यादेशो वा भवति, ॥

इर्जस्य णोणाङौ ॥३॥५२॥ राजन्शब्दसम्बन्धिनो जकारस्य स्थाने णोणाङिषु परेषु इकारो वा भवति। रायाणो राइणो वा चिट्ठन्ति, पक्षे [2]राया [3]रायाणा ॥१॥

इणम् अमामा ॥३॥५३॥ राजन्शब्दसम्बन्धिनो जकारस्य अमाम्भ्या सहितस्य स्थाने इणम् इत्यादेशो वा भवति। राइणं पेच्छ, पक्षे राय रायाण। शसि, [4]रायाणो राइणो वा पेच्छ, पक्षे राया राए, [5]रायाणा, रायाणे, ॥२॥

टो णा ॥३॥५१॥ राजन्शब्दात्परस्य टा इत्यस्य णा इत्यादेशो वा भवति

---

१ पुस्यन आणो राजवच्च।३।५६। इति अनित्यस्य आणादेश. कथयिष्यति ॥
२ अन्त्यव्यञ्जनस्येति नलोप ॥ जश्शसोर्लुक् इति जसो लुक् ॥ जश्शस्ङसि त्तोदो द्वामि दीर्घ इति दीर्घत्वम् ॥ ३ पुस्यन आणो राजवच्च ॥३। ५६॥ इति अनित्यस्य आणादेश शेष पूर्ववत् एवम् अन्यत्रापि ज्ञेयम्।
४ जश्शस्ङसिङसा णो ॥३॥५०॥ इति शसो णो आदेश. ॥ राइणो इत्यत्रतु 'इर्जस्यणोणाङौ' ॥३॥५२॥ इति विशेष ॥ ५ पुस्यनेत्यादिना ॥३॥५६॥ अनित्यस्य आणादेश ॥

आजस्य टाङसिङस्सु सणाणोष्वण् ॥३॥५५॥ राजन्शब्दसम्बन्धिन आज इत्यवयवस्य टाङसिङस्सु णाणो इत्यादेशापन्नेषु अण् वा भवति। रण्णा राइणा, पक्षे रायणा [1]राएण रायाणेण ॥

ईद् भिस्भ्यसाम् सुपि ॥३॥५४॥ राजन्शब्दसम्बन्धिनो जकारस्य भिसादिषु परतो वा ईकारो भवति। राईहि, पक्षे [2]राएहि, रायाणेहि। एव हि हिँ परयोरपि ॥३॥ ङसौ [3]राइणो [4]रण्णो, राअत्तो रायाओ रायाउ, रायाणत्तो रायाणाओ राया-णाउ रायाणाहिन्तो। भ्यसि तु [5]राईओ राईहिन्तो राईसुन्तो, रायत्तो रायाओ रायाहिन्तो रायासुन्तो, आणादेशपक्षे रायाणाओ रायाणाउ रायाणाहिन्तो, रायाणेहिन्तो रायाणेसुन्तो ॥५॥ ङसि राइणो रण्णो, रायस्स रायाणस्स। आमि [6]राइणं, [7]राईण, रायाणं, रायाणाणं ॥६॥ [8]राइम्मि, राए, रायाणम्मि रायाणे। राईसु, राएसु, रायाणेसु। इत्यादि। राजन्शब्दस्याऽन्येषा च नकारान्तानां सर्वासु विभक्तिषु सामान्यतो रूपाणि तु एवम् ॥

---

१ अन्त्यव्यजनस्येति नलोप, टाआमोर्ण इति टास्थाने णस्तत. टाणशस्येत्, इति अकारस्य एत्त्वम् ॥

२ अन्त्यव्यञ्जनस्येति नलोप ॥ भिस्भ्यस्सुपि ॥३॥१५॥ इति जका-रोत्तराऽकारस्य एत्त्वम् ॥ ३ जस्शस्ङसिङसां णो ॥२॥५०॥ इति ङसेर्णो.॥ इर्जस्य णोणाङौ ॥३॥५२॥ इति जस्य इकार ॥ ४ आजस्य टाङसिङस्सु सणा-णोष्वण् ॥३॥५५। इत्याजस्य अणादेश ॥ ५ ईद् भिस्भ्यसाम्सुपि ॥३॥५४॥ इति जकारस्य ई इत्यादेश. ॥ ६ इणममामा ॥३॥५३॥ इति आम सह जकारस्य इणमित्यादेश ॥ ७ ईद् भिस्भ्यसा सुपि ॥३॥५४॥ इति जस्य ईत्त्वम् ॥ ८ इर्जस्य णोण[illegible] ५२॥ इति जस्य इत्त्वम ॥

पुंस्यन आणो राजवच्च ॥३॥५६॥ पुल्लिङ्गे वर्त-मानस्य अन्नन्तस्य स्थाने आण इत्यादेशो वा भवति । पक्षे यथादर्शनं राजवत् च कार्यं भवति । आणादेशे च 'अतः सेर्डोः (३।२) । इत्यादय. प्रवर्त्तन्ते । पक्षे तु राज्ञः जस्शस्ङसिङसां णो ॥३॥५०॥ टो णा ॥३॥५१॥ इणममामा ॥३॥५३॥ इति प्रवर्त्तन्ते ॥ अप्पाणो अप्पाणा ॥१॥ अप्पाणं अप्पाणा अप्पाणे ॥२॥

आत्मनष्टो णिआ णइआ ॥३॥५७॥ आत्मनः पर-स्याष्टाया. स्थाने णिआ णइआ इत्यादेशो वा भवत । 'अप्प-णिआ पाउसे उवगयम्मि, अप्पणिआ य विअड्डि खाणिआ, अप्प-णइआ । पक्षे अप्पाणेण, अप्पाणेहिं ॥३॥ अप्पाणाओ, अप्पाणा-सुन्तो ॥५॥ अप्पाणस्स अप्पाणाण ॥६॥ अप्पाणम्मि अप्पाणेसु । अप्पाणकय । पक्षे राजवत्, अप्पा अप्पो, हे अप्पा हे अप्प, अप्पाणो पेच्छ, अप्पणा, अप्पहिं, अप्पाणो अप्पाओ अप्पाउ अप्पाहि अप्पाहिन्तो अप्पा, अप्पासुन्तो ॥५॥ अप्पणो धण । अप्पाणं ॥६॥ अप्पे अप्पेसु । रायाणो, रायाणा, ॥१॥ रायाणं रायाणे ॥२॥ रायाणेण रायाणेहिं ॥३॥ रायाणाहिन्तो ॥५॥ रायाणस्स राया-णाणं ॥६॥ रायाणम्मि रायाणेसु । पक्षे राया, इत्यादि । एवं जुवाणो, जुवाणजणो, जुआ । वम्हाणो बम्हा । अद्धाणो अद्धा । (उक्षन्) उच्छाणो, उच्छा । (गोवान्) गावाणो गावा । पूसाणो पूसा । तक्खाणो तक्खा । मुद्धाणो मुद्धा । (श्वन्) साणो सा । (सुकर्मणः पश्य) सुकम्माणे पेच्छ । [1]निअइ कह सो सुकम्माणे (पश्यति कथं स सुकर्मण) इत्यर्थ । पुसीति किं 'शर्म, सम्मं ॥

---

१ दृशो-निअच्छ-पेच्छावयच्छा ॥४॥१८१॥ इति सूत्रेण दृश् धातो स्थाने निअइ इति आदेश. ॥

शेषेऽदन्तवत् ॥३॥१२४॥ उपयुक्तादन्यः शेषस्तत्र स्यादिविधिरदन्तवद् अतिदिश्यते, येषु आकाराद्यन्तेषु पूर्वं कार्याणि नोक्तानि तेषु जश्शसोर्लुग् इत्यादीनि, अदन्ताधिकारविहितानि कार्याणि भवन्तीत्यर्थः। तत्र जश्शसोर्लुक्, इत्येतत्कार्यातिदेशः, गिरी बाऊ तरू सही वहू माला रेहन्ति पेच्छ वा। अमोऽस्य ॥३॥५॥ इत्येतत्कार्यातिदेशः गिरिं वाउं तरुं गुरुं सहिं वहुं [१]गामणिं खलपुं पेच्छ। टा-आमोर्णः ॥३॥६॥ इत्येतत्कार्यातिदेशः। मालाण हाहाण कयं गिरीण वाऊणं गुरूणं सहीण वहूणं धणं। टायास्तु 'टो णा ॥३॥२४॥ टाङस्ङेरदादिदेद्वा तु ङसे ॥३॥२९॥ इति विधिरुक्तः। भिसो हि हिँ हिं ॥३॥७॥ इत्येतत्कार्यातिदेशः। [२]गिरीहि गुरूहि सहीहि वहूहि मालाहि कयं। एवं सानुनासिकानुस्वारयोरपि। ङसेस् त्तोदो दुहि हिन्तो लुक. ॥३॥८॥ इत्येतत्कार्यातिदेशः। गिरीओ वाऊओ मालाओ मालाउ मालाहिन्तो। बुद्धीओ बुद्धीउ बुद्धीहिन्तो। धेणूओ धेणूउ धेणूहिन्तो आगओ। हिलुकौ तु प्रतिषेत्स्येते, 'भ्यसस्तोदो दुहि हिन्तो सुन्तो, इत्येतत्कार्यातिदेशः, मालाहिन्तो मालासुन्तो हिस्तु निषेत्स्यते। एव गिरीहिन्तो इत्यादि, ङस स्स इत्येतत्कार्यातिदेश. गिरिस्स गुरुस्स दहिस्स महुस्स। स्त्रियां तु टाङस्ङेरित्याद्युक्तम्, ङेम्मिङे-रित्येतत्कार्यातिदेशः, गिरिम्मि गुरुम्मि दहिम्मि महुम्मि ङेस्तु निषेत्स्यते। स्त्रिया तु टाङस्ङेरित्यादि उक्त, जश्शस्ङसि त्तोदो द्वामिदीर्घः। इत्येतत्कार्यातिदेश., गिरी गुरू चिट्ठन्ति, गिरीओ

---

१ क्विपः ॥३॥४३॥ इति सूत्रेण ह्रस्व. २ इदुतो दीर्घः ॥३॥१६॥ इति दीर्घः।

गुरुओ आगओ, गिरीण गुरूण धणं । ङ्यसि वा । इत्येतत्कार्या-तिदेशो न प्रवर्त्तते इदुतोर्दीर्घः । इति नित्यं विधानात् । टाण-शस्येत् । भिस्भ्यस्सुपि । इत्येतत्कार्यातिदेशस्तु निषेत्स्यते ॥

इति स्वरान्तपुल्लिङ्ग. ॥

आकारान्तः स्त्रीलिङ्गो मालाशब्दः ॥

प्रथमैकवचने [1]माला, जसि तु ॥

स्त्रियामुदोतौ वा ॥३॥२७॥ स्त्रियां वर्तमानान्नाम्नः परयोर्जश्शसोः स्थाने प्रत्येकम् उत् ओत् इत्येतौ सप्राग्दीर्घौ वा भवतः । वचनभेदो यथासंख्यानिवृत्त्यर्थः मालाउ मालाओ बुद्धीउ बुद्धीओ, सहीउ सहीओ, धेणूउ धेणूओ, वहूउ वहूओ, पक्षे [2]माला [3]बुद्धी सही धेणू वहू । स्त्रियामिति किम् वच्छा, जश्शस इत्येव [4]मालाए कयं ॥१॥

ह्रस्वोऽमि ॥३॥३६॥ स्त्रीलिङ्गस्य नाम्नोऽमि परे ह्रस्वो भवति मालं नइं वहुं हसमाणिं हसमाणं पेच्छ, अमीति किम्, माला सही वहू । गत्ति तु मालाउ मालाओ माला । शेषेऽदन्त-वद् ॥३॥११४॥ इति प्राप्तमेत्त्वं निषेधयति ॥

एत् ॥३॥१२९॥ आकारान्तादीनाम् अर्थात्, टाशस्-भिस्भ्यस्सुप्सु परतोऽदन्तवद् एत्त्वं न भवति । हाहाणं कयं, मालाओ पेच्छ, एवम् अग्गिणो वाउणो इत्यादि ॥२॥ माला टा इतिस्थिते, ॥

---

१ अत. सेर्डो ॥३॥२॥ इत्यत्र तपरकरणात् दीर्घान्तात्सेर्डो न भवति ततश्चान्त्यव्यञ्जनस्येति सकारलोप ॥ २ जश्शसोर्लुक् ॥३॥४॥ इति जसो-लुक् ॥ ३ जश्-शस् ङसित्तोदोद्वामिदीर्घ. ॥३॥१२॥ इति दीर्घः ॥ ४ टाङ-सुङे-रदादिदेद् वा तु ङसे ॥३॥२९॥ इति सूत्रेण एत्वम् ॥

टाङस्ङे-रदादिदेद् वा तु ङसेः ॥३॥२९॥ स्त्रियां वर्तमानान्नाम्नः परेषां टाङस्ङीना स्थाने प्रत्येकम् अत् आत् एत् इत्येते चत्वार आदेशाः सप्राग्दीर्घा भवन्ति । ङसेः पुनरेते सप्राग् दीर्घा वा भवन्ति । मालाअ मालाइ मालाए कयं मुहं ठिअं वा, कप्रत्यये तु [१] मालिआअ मालिआइ मालिआए । कमलिआअ कमलिआइ कमलिआए । वुद्धीअ वुद्धीआ वुद्धीइ वुद्धीए कयं, विहओ ठिअं वा । सहीअ सहीआ सहीइ सहीए कय वयणं ठिअं वा, धेणूअ धेणूआ धेणूइ धेणूए कयं दुद्धं ठिअं वा, वहूअ वहूआ वहूइ वहूए कयं भवणं ठिअं वा । ङसेस्तु वा मालाअ मालाइ मालाए, वुद्धीअ वुद्धीआ वुद्धीइ वुद्धीए, सहीअ सहीआ सहीइ सहीए धेणूअ धेणूआ धेणूइ धेणूए, वहूअ वहूआ वहूइ वहूए, आगओ । पक्षे मालाओ मालाउ मालाहिन्तो, रईओ रईउ रई-हिन्तो, धेणूओ धेणूउ धेणूहिन्तो इत्यादि । शेषेऽदन्तवत् ॥३॥ १२४॥ इत्यतिदेशात् जश्शस् ङसित्तोदो द्वामि दीर्घः ॥३॥१२॥ इति दीर्घत्वम्, पक्षेऽपि भवति, स्त्रियामित्येव वच्छेण वच्छस्स वच्छम्मि वच्छाओ, टादीनामिति किम् माला वुद्धी सही धेणू वहू ॥

नात आत् ।३।३०। स्त्रियां वर्तमानादादन्तान्नाम्नः परेषां टाङस् ङिङसीनाम् आदादेशो न भवति मालाअ मालइ मालाए कय भिसि [२] मालाहि मालाहिँ मालाहिं ।३। [३] मालाअ, मालाइ, मालाए, पक्षे

---

१ मालाशब्दात् स्वार्थे कः, तत आप्, पूर्वस्य ह्रस्वः, मालका इति जातम् ततो लकारोत्तराकारस्य इत्वम् मालिका ॥ २ एत् ॥ ३ ॥ १२९ ॥ इति निषेधात् भिस्भ्यस्सुपि ॥ ३ ॥ १५ ॥ इति एत्त्व न भवति ॥ ३टाङस्ङे रदादिदेद्वातुङसेः ॥ ३ ॥ २९ ॥ इति ङसेर्विकल्पेन अदेदिदादेशा. ॥

ङसेर्लुक् ।३।१२६।। आकारान्तादिभ्योऽदन्तवत्प्राप्तो ङसेर्लुक् न भवति, मालत्तो मालाओ मालाउ मालाहिन्तो आगओ, भ्यसि तु

भ्यसश्च हिः ।।३।।१२७।। आकारान्तादिभ्योऽदन्तवत्प्राप्तो भ्यसो ङसेश्च हिर्न भवति । मालत्तो मालाओ मालाउ मालाहिन्तो मालासुन्तो ।।५।। ङसि, मालाअ मालाइ मालाए । आमि मालाण मालाआ ।।६।। ङौ तु–

ङेर्डेः ।।३।।१२८।। आकारान्तादिभ्योऽदन्तवत्प्राप्तो ङेर्डेः न भवति । मालाअ मालाइ मालाए । सुपि मालासु मालासुं ।।

वाऽऽप ए ।।३।।४१।। आमन्त्रणे सौ परे आप एत्त्वं वा भवति । हे माले हे महिले हे [१]अज्जिए, हे पज्जिए, पक्षे हे माला इत्यादि ।। आप इति किम्, हे पिउच्छा हे माउच्छा ।बहुलाधिकारात् क्वचिदोत्वमपि अम्मो भणामि भणिए । एव मुग्धारामाश्यामाप्रियतमामनोरमादयोऽन्येऽपिस्त्रीलिङ्गा आबन्ताः कथनीयाः

छाया हरिद्रयोः ।।३।।३४।। अनयोराप्प्रसङ्गे नाम्नः स्त्रियां ङीर्वा भवति । [२]छाही, छाया । छायाउ छायाओ ।।१।। छायं, छायाउ छायाओ छाया ।।२।। शेष मालावत् । हलद्दी हलद्दा हलद्दाउ हलद्दाओ ।१। हलद्दं हलद्दाउ हलद्दाओ हलद्दा ।।२।। शेष मालावत् । ङीपक्षे तु [३]छाईआ छाई, जसि छाईआ छाईउ छाईओ ।१। छाइं, छाईउ छाईओ ।।२।। हलद्दी हलद्दीआ, हलद्दीउ हलद्दीओ ।।१।। हलद्दिं हलद्दीउ हलद्दीओ ।।२।। इत्यादि शेषं नदीशब्दवत् ।।

---

१ आर्या शब्दात् स्वार्थे कप्रत्यये, आपि, ऱ्हस्वे इत्वे ऱ्हस्व सयोगे इति ऱ्हस्वे, अज्जका एव पार्जा ।। २ छायाया होऽकान्तौ वा ।।१।।२४९।। इति सूत्रेण यकारस्य हकारे । ३ ईतः सेश्चा वा ।३।२८। इत्यनेन सिस्थाने आ

प्रत्यये ङीर्न वा ॥३॥३१॥ अणादिसूत्रेण (हे १-२-४०) प्रत्ययनिमित्तो यो ङीरुक्त स स्त्रियां वर्त्तमानान्नाम्नो वा भवति, साहणी कुरुचरी, पक्षे आत् (हे० २-४) इत्याप् साहणा कुरुचरा ॥

अजातेः पुंसः ॥३॥३२॥ अजातिवाचिन. पुल्लिङ्गात् स्त्रियां वर्तमानात् ङीर्वा भवति, नीली नीला, काली काला, हसमाणी हसमाणा, सुप्पणही सुप्पणहा, इमीए इमाए, इमीण इमाणं, एईए एआए एईण एयाणं, अजातेरिति किम्, करिणी अया एलया, अप्राप्ते विभाषेयं, तेन गौरी, कुमारी, इत्यादौ संस्कृतवन्नित्यमेव ङी । इकारान्तस्त्रीलिङ्गो मतिशब्द. [1]मई, [2]मईओ मईउ मई ॥१॥ मइ मईओ मईउ मई ॥२॥ [3]मईअ मईआ मईइ मईए । [4]मईहिं मईहिँ मईहि ॥३॥ मईअ मईआ मईइ मईए । [5]मइत्तो मईओ मईउ मईहिन्तो । मइत्तो मईओ मईउ मईहिन्तो मईसुन्तो ॥५॥ मईअ मईआ मईइ मईए । मईण मईणं ॥६॥ मईअ मईआ मईइ मईए । मईसु मईसुं ॥७॥ सम्बोधने, हे [6]मई हे मइ । हे [7]मईओ हे मईउ हे मई । एवं रुचिबुद्धिप्रभृतयोऽपि ज्ञेया । एवं स्त्रीलिङ्गोकारान्ता धेन्वादयोपि ज्ञेया ॥

---

१ अक्लीबे सौ ॥३॥१९॥ इति दीर्घ. ॥ २ स्त्रियामुदोतौ वा ॥३॥२७॥ इति जस.स्थाने उदोतौ ।३। टाङस्ङेरदादिदेद्वातुङसे: ॥३॥२९॥ इति टास्थानेऽदादिदेदादेशा ॥ ४ इदुतोर्दीर्घ ॥३॥१६॥ इति भिसि परत. । इकारस्य दीर्घ ॥५ ङसेरदादिदेद् विकल्पात् पक्षे त्तोदोदु इत्यादय आदेशाः ।

६ ङोदीर्घो वा ॥३॥३८॥ इति विकल्पेन दीर्घत्वम् ॥ ७ स्त्रियामुदोतौ वा ॥३॥२७॥ इति उत् ओत् आदेश सप्राग् दीर्घ. ॥

ईकारान्तः स्त्रीलिङ्गो नदीशब्दः ॥

ईतः सेश्चाऽऽवा ॥३॥२८॥ स्त्रियां वर्तमानादीकारान्तात् सेर्जश्शसोश्च स्थाने आकारो वा भवति । नईआ नई । जसि नईआ, नई, एसा हसन्तीआ गोरीआ चिट्ठन्ति इत्यादि पक्षे नईउ नईओ नई ॥१॥ नइं, शसि नईआ नई, पेच्छ, पक्षे नईउ नईओ नई ॥२॥ नईअ नईआ नईइ नईए । नईहि नईहिँ नईहि ॥३॥ नईअ नईआ नईइ नईए, नईत्तो नईओ नईउ नईहिन्तो । भ्यसि नइत्तो नईओ नईउ नईहिन्तो नईसुन्तो ।५। नईअ नईआ नईइ नईए । नईण नईण ॥६॥ नईअ नईआ नईइ नईए । नईसु नईसुं ।७।

ईदूतोर्ह्रस्वः ॥३॥४२॥ आमन्त्रणे सौपरे ईदूदन्तयोर्ह्रस्वो भवति । हे नइ । हे गामणि हे समणि हे वहु हे खलपु । हे नईआ हे नई, हे नईओ हे नईउ । एवं गौरीदेवीभवतीपचन्तीप्रभृतयोऽपि ईकारान्ता उदाहार्याः । एवमूकारान्ता वध्वादयोऽपि ज्ञातव्याः ॥

स्त्रीलिङ्गे यच्छब्दस्य रूपाणि ॥

किंयत्तदोऽस्यमामि ॥३॥३३॥ सि अम् आम् वर्जिते स्यादौ परे एभ्यः स्त्रियां ङीर्वा भवति । इति ङी पक्षे । जा, [1]जीओ जीउ [2]जीआ जी ॥१॥ [3]जं । जीओ जीउ जीआ जी ॥२॥ जीअ जीआ जीइ जीए । जीहि जीहिँ जीहि ॥३॥ जीअ जीआ जीइ जीए, जित्तो जीओ जीउ जीहिन्तो । जित्तो जीओ जीउ जीहिन्तो जीसुन्तो ॥५॥ ङसि तु–

---

[1]स्त्रियामुदोतौ वा ॥३॥२७॥ इति उत् ओदौ । [2]ईतः सेश्चाऽऽवा ।३।२८। इति आत्वे । [3] ह्रस्वोऽमि ।३।३६। इति ह्रस्वे ।

प्रत्यये ङीर्न वा ॥३॥३१॥ अणादिसूत्रेण (हे १-२-४०) प्रत्ययनिमित्तो यो ङीरुक्त स स्त्रियां वर्त्तमानान्नाम्नो वा भवति, साहणी कुरुचरी, पक्षे आत् (हे० २-४) इत्याप् साहणा कुरुचरा ॥

अजातेः पुंस. ॥३॥३२॥ अजातिवाचिनः पुल्लिङ्गात् स्त्रियां वर्तमानात् ङीर्वा भवति, नीली नीला, काली काला, हसमाणी हसमाणा, सुप्पणही सुप्पणहा, इमीए इमाए, इमीण इमाणं, एईए एआए एईण एयाणं, अजातेरिति किम्, करिणी अया एलया, अप्राप्ते विभाषेय, तेन गौरी, कुमारी, इत्यादौ संस्कृतवन्नित्यमेव ङी । इकारान्तस्त्रीलिङ्गो मतिशब्दः [१]मई, [२]मईओ मईउ मई ॥१॥ मइ मईओ मईउ मई ॥२॥ [३]मईअ मईआ मईइ मईए । [४]मईहि मईहिँ मईहि ॥३॥ मईअ मईआ मईइ मईए । [५]मइत्तो मईओ मईउ मईहिन्तो । मइत्तो मईओ मईउ मईहिन्तो मईसुन्तो ॥५॥ मईअ मईआ मईइ मईए । मईण मईणं ॥६॥ मईअ मईआ मईइ मईए । मईसु मईसुं ॥७॥ सम्बोधने, हे [६]मई हे मइ । हे [७]मईओ हे मईउ हे मई । एवं रुचिवुद्धिप्रभृतयोऽपि ज्ञेया । एवं स्त्रीलिङ्गोकारान्ता धेन्वादयोपि ज्ञेया ॥

---

१ अक्लीवे सौ ॥३॥१९॥ इति दीर्घ. ॥ २ स्त्रियामुदोतौ वा ॥३॥२७॥ इति जस.स्थाने उदोतौ ।३। टाङपूङेरदादिदेद्वातुङसेः ॥३॥२९॥ इति टास्थानेअदादिदेदादेशा. ॥ ४ इदुतोर्दीर्घ ॥३॥१६॥ इति भिसि परत. । इकारस्य दीर्घ ॥५ ङसेरदादिदेद् विकल्पात् पक्षे त्तोदोदु इत्यादय आदेशा ।

६ ह्रोदीर्घो वा ॥३॥३८॥ इति विकल्पेन दीर्घत्वम् ॥ ७ स्त्रियामुदोतौ वा ॥३॥२७॥ इति उत् ओत् आदेश सप्राग् दीर्घ ॥

ईकारान्तः स्त्रीलिङ्गो नदीशब्दः ॥

ईतः सेश्चाऽऽवा ॥३॥२८॥ स्त्रियां वर्तमानादीकारान्तात् सेर्जस्शसोश्च स्थाने आकारो वा भवति । नईआ नई । जसि नईआ, नई, एसा हसन्तीआ गोरीआ चिट्ठन्ति इत्यादि पक्षे नईउ नईओ नई ॥१॥ नइं, शसि नईआ नई, पेच्छ, पक्षे नईउ नईओ नई ॥२॥ नईअ नईआ नईइ नईए । नईहि नईहिँ नईहि ॥३॥ नईअ नईआ नईइ नईए, नईत्तो नईओ नईउ नईहिन्तो । भ्यसि नइत्तो नईओ नईउ नईहिन्तो नईसुन्तो ।५। नईअ नईआ नईइ नईए । नईण नईण ॥६॥ नईअ नईआ नईइ नईए । नईसु नईसु ।७।

ईदूतोर्ह्रस्वः ॥३॥४२॥ आमन्त्रणे सौपरे ईदूदन्तयोर्ह्रस्वो भवति । हे नइ । हे गामणि हे समणि हे वहु हे खलपु । हे नईआ हे नई, हे नईओ हे नईउ । एवं गौरीदेवीभवतीपचन्तीप्रभृतयोऽपि ईकारान्ता उदाहार्याः । एवमूकारान्ता वध्वादयोऽपि ज्ञातव्याः ॥

स्त्रीलिङ्गे यच्छब्दस्य रूपाणि ॥

किंयत्तदोऽस्यमामि ॥३॥३३॥ सि अम् आम् वर्जिते स्यादौ परे एभ्यः स्त्रियां ङीर्वा भवति । इति ङी पक्षे । जा, [1]जीओ जीउ [2]जीआ जी ॥१॥ [3]जं । जीओ जीउ जीआ जी ॥२॥ जीअ जीआ जीइ जीए । जीहि जीहिँ जीहि ॥३॥ जीअ जीआ जीइ जीए, जित्तो जीओ जीउ जीहिन्तो । जित्तो जीओ जीउ जीहिन्तो जीसुन्तो ॥५॥ ङसि तु–

१स्त्रियामुदोतौ वा ॥३॥२७॥ इति उत् ओतौ । २ईत सेश्चाऽऽवा ।३।२८। ति आत्वे। ३ ह्रस्वोऽमि।३।३६। इति ह्रस्वे ।

ईद्भ्यः स्सा से ॥३॥६४॥ किमादिभ्य ईदन्तेभ्यः परस्य ङसः स्थाने स्सा से इत्यादेशो वा भवत. । टाङस्ङेरदादिदेद्वातु ङसेः ॥३॥२९॥ इत्यस्यापवाद., पक्षे अदादयोऽपि जिस्सा जीसे, पक्षे जीअ जीआ जीइ जीए । जाण जाणं ॥६॥ जीअ जीआ जीइ जीए । जीसु जीसुं ॥७॥ ङीरभावपक्षे तु जा, जाओ जाउ जा ॥१॥ जं । जाओ जाउ जा ॥२॥ जाअ जाइ जाए, जाहि जाहिँ जाहि ॥३॥ जाअ जाइ जाए जम्हा, पक्षे जत्तो जाओ जाउ जाहिन्तो । जत्तो जाओ जाउ जाहिन्तो जासुन्तो ॥५॥ जाअ जाइ जाए, जाण जाण ॥६॥ जाअ जाइ जाए । जासु जासुं ॥७॥ तच्छब्दस्य तु णादेशो विशेषः । तथाहि [१]सा ता [२]णा, तीओ तीउ [३]तीआ ती ॥१॥ त णं, तीओ तीउ तीआ ती ॥२॥ शेषं सर्वं यच्छब्दवत् ज्ञेयम् । किंशब्दस्य रूपाणि तु एवम्, का, कीओ कीउ कीआ की ॥१॥ कं, कीओ कीउ कीआ की ॥२॥ कीअ कीआ कीइ कीए । कीहि कीहिँ कीहि ॥३॥ कीअ कीआ कीइ कीए । पक्षे कित्तो कीओ कीउ कीहिन्तो कम्हा । कित्तो कीओ कीउ कीहिन्तो कीसुन्तो ॥५॥ कीअ कीआ कीइ कीए, [४]किस्सा कीसे [५]कास । काण काणं [६]कास [७]केसिं

---

१ तदश्चत. सोऽक्लीबे।३।८६। इति तकारस्य सकारः । २ तदो ण स्यादौ क्वचित् ।३।७०। इति तकारस्य रादेश ॥ ३ ईतः सेश्चा वा॥३॥२८॥ इति शस आकारादेश ॥ ४ ईद्भ्य स्सासे ॥३॥६४॥ ति ङस स्सा से इत्यादेशो ॥ ५ कियत्तद्भ्यो ङस ॥३॥६३॥ इत्यत्र बहुलाधिकारात् ईकारान्तादपि ङसो डासादेश । ६ कितद्भ्या डासः ॥३॥६२॥ इतित्यामो डासादेश. । ७ आमो डेसिं ॥३॥६१॥ इत्यामो डेसिमादेश. ॥

॥६॥ कीअ कीआ कीइ कीए। कीसु कीसु ॥७॥ आकारान्तपक्षे तु का, काओ काउ का ॥१॥ इत्यादि शेषं यत्तद् शब्दवत् । एवम् इदमेतच्छब्दयोरपि ज्ञेयानि ।

ऋकारान्तः स्त्रीलिङ्गो दुहितृशब्दः ॥

स्वस्रादेर्डा ॥३॥३५॥ स्वस्रादेः स्त्रियां वर्त्तमानात् डा प्रत्ययो भवति। दुहिआ, ससा नणन्दा, जसि दुहिआउ, दुहिआओ, दुहिआ ॥१॥ दुहिअं । दुहिआउ दुहिआओ दुहिआ ॥२॥ दुहिआअ दुहिआइ दुहिआए दुहिआहि दुहिआहिँ दुहिआहिं ॥३॥ इत्यादि शेषं मालाशब्दवत् ॥

ऋकारान्तः स्त्रीलिङ्गो मातृशब्दः ॥

आ अरा मातुः ॥३॥४६॥ मातृसम्बन्धिन ऋकारस्य स्यादौ परे आ अरा इत्यादेशौ भवतः। माआ माअरा । [1]माआउ माआओ, माअराउ माअराओ, पक्षे [2]माऊओ माऊउ माऊ ॥१॥ माअं माअरं । माआओ माआउ माआ, माअराओ माअराउ माअरा, माऊओ माऊउ माऊ ॥२॥ माआअ माआइ माआए, माअराअ माअराइ माअराए, पक्षे माऊअ माऊआ माऊइ माऊए । इत्यादि शेषं मालाशब्दवत्, उदादेशपक्षे तु धेनुशब्दवत् ॥

इति स्त्रीलिङ्गम् ॥

---

१ आ अरा मातुः ॥३॥४६॥ आ अरा आदेशे कृते, स्त्रियामुदोतौ वा ॥३॥२७॥ इति जसः स्थाने उदोदादेशौ ॥ एवं शसि अपि ॥ २ ऋतामुदस्यमौसु वा ॥३॥४४॥ इति ऋकारस्य उत्त्वम् शेषं पूर्ववत् ॥

अथ नपुंसकलिङ्गम्

अकारान्तो नपुंसकलिङ्गो वनशब्दः, वण सि इत्यवस्थितम् ।।

क्लीबे स्वरान्म्से: ।।३।।२५।। क्लीबे वर्तमानात् स्वरान्तात् नाम्नः परस्य सेः स्थाने म् भवति । वण पेम्म, दहिं महुं, दहि महु इति तु सिद्धावस्थापेक्षया, केचिद् अनुनासिकम-पीच्छन्ति, दहिँ महुँ, क्लीबे इति किम् । बालो बाला, स्वरा-दिति इदुतोः निवृत्त्यर्थम् ।।

जश्शस् इँ इं णयः सप्राग् दीर्घाः ।।३।।२६।। क्लीबे वर्तमानान्नाम्नः परयोः जश्शसोः स्थाने सानुनासिकसानुस्वरी इकारौ णिश्चादेशा भवन्ति, स प्राग् दीर्घाः एषु सत्सु पूर्व स्वरस्य दीर्घत्वं विधीयते इत्यर्थ । वणाइँ वणाइं वणाणि ।।१।। जाइँ वयणाइँ अम्हे, उम्मीलन्ति पंकयाइ, पेच्छ वा, चिट्ठन्ति दहीइं जेम वा, हुन्ति महूइ मुंच वा, फुल्लन्ति पकयाणि गेण्ह वा, हुन्ति दहीणि जेम वा, एव महूणि, क्लीबे इत्येव वच्छा वच्छे, जश्शस इति किं सुह । अमि तु वणं, शस्यपि वणाइँ वणाइ वणाणि, शेषं वच्छशब्दवत् । एवमेव इकारोकारान्तयोरपि शब्दयोः रूपाणि ज्ञेयानि । समानसूत्रत्वात् पृथक् नोपदर्शितानि ।।

नामन्त्र्यात्सौ मः ।।३।।३७।। आमन्त्र्यार्थात् परे सौ सति 'क्लीबे स्वरान्म् सेः' ।३।२५। इति यो म् उक्तः स न भवति, हे वण हे दहि हे महु, हे वणाइँ हे वणाइं, हे वणाणि । एवम् इदुदन्तयोरपि ।

क्लीबे स्यमेदमिणमो च ।।३।।७९।। नपुंसकलिङ्गे वर्तमानस्य इदमः स्यम्भ्या सहितस्य इदम् इणमो इणम् च

नित्यम् आदेशा भवन्ति । इदं इणमो इणं धणं चिट्ठइ पेच्छ वा, [1]इमाइँ इमाइं इमाणि ॥१॥ पुनरपि, इदं इणमो इणं, इमाइँ इमाइं इमाणि ॥२॥ शेषं पुंलिङ्गवत् ॥

किमः किम् ॥३॥८०॥ किमः क्लीबे वर्तमानस्य स्यम्भ्यां सहितस्य किम् भवति । किं कुलं तुह, किं किं ते [2]पडिहाइ, [3]काइँ काइं काणि, ॥१॥ द्वितीयायामपि किं काइँ काइं काणि ॥२॥ शेषं पुल्लिङ्गवत् इति नपुंसकलिङ्गम् ॥

वीप्सात्स्यादेर्वीप्स्ये स्वरे मो वा ॥३॥१॥ वीप्सार्थात्पदात्परस्य स्यादे स्थाने स्वरादौ वीप्सार्थे पदे परे मो वा भवति । (एकैकम्) [4]एक्कमेक्कं एक्कमेक्केण, (अङ्गे अङ्गे) अंगमंगम्मि, पक्षे एक्केक्कं । इति स्यादिविभक्तिप्रकरणम् ॥

अथ कारकप्रकरणम्

द्विवचनस्य बहुवचनम् ।३।१३०। सर्वासां विभक्तीनां त्यादीनां स्यादीनां च द्विवचनस्य स्थाने बहुवचनं भवति । दोण्णि कुणंति, दुवे कुणन्ति, दोहिं दोहिन्तो दोसुन्तो दोसु, हत्था, पाया थणया नयणा

चतुर्थ्याः षष्ठी ॥३॥१३१॥ चतुर्थ्या स्थाने षष्ठी भवति, मुणिस्स मुणिण देइ, नमो देवस्स देवाण

तादर्थ्यङेर्वा ॥३॥१३२॥ तादर्थ्यविहितस्य ङेश्चतुर्थ्येकवचनस्य स्थाने षष्ठी वा भवति । देवस्स देवाय, देवार्थमित्यर्थः । ङेग्गिति किं देवाणं ॥

---

(१) इदम इम. ॥३॥७२॥ इति इमादेशे ॥ (२) किं किं ते प्रतिभाति (३) किम. कस्त्रतसोश्च ॥३॥७१॥ इति कञ्चादेशे (४) सेवादौ वा ॥२॥९९॥ इति द्वित्वे ।

वधाड् डाइश्च वा ॥३॥१३३॥ वधशब्दात् परस्य ङेर्डिद् आइः षष्ठी च वा भवति, । वहाइ वहस्य वहाय वधार्थमित्यर्थः ॥

क्वचिद् द्वितीयादे ॥३॥१३४॥ द्वितीयादीनां विभक्तीनां क्वचिद् षष्ठी भवति । सीमाधरस्स वन्दे, तिस्सा मुहस्स भरिमो अत्र द्वितीयायाः षष्ठी, धणस्स लुद्धो (धनेन लुब्ध इत्यर्थः) चिरस्स मुक्का चिरेण मुक्तेत्यर्थः, तेसिं एअमणाइण्ण (तैरेतद-नाचीर्णम्) अत्र तृतीयायाः षष्ठी, चोरस्स बीहइ (चोराद्-बिभेतीत्यर्थः) इअराइं जाण लहुअक्खराइं पायन्तिमिल्ल-सहि-आण (पादान्तेन सहितेभ्य इतराणीति) अत्र पञ्चम्याः । पिट्ठिए केस भारो, अत्र सप्तम्याः ॥

द्वितीया तृतीययोः सप्तमी ॥३॥१३५॥ द्वितीया-तृतीययोः स्थाने क्वचित् सप्तमी भवति, गामे वसामि, नयरे न जामि, अत्र द्वितीयायाः, मइ वेविरीए मलिआइं तिसु तेसु अलं-किआ पुहवी, अत्र तृतीयायाः ॥

पञ्चम्यास्तृतीया च ।३।१३६। पञ्चम्याः स्थाने क्वचित् तृतीयासप्तम्यौ भवतः । चोरेण बीहइ, चोराद् बिभेतीत्यर्थः (अन्तेउरे रमिउं आगओ राया) अन्तःपुराद् रन्त्वाऽऽगत इत्यर्थः ।

सप्तम्या द्वितीया ॥३॥१३७॥ सप्तम्याः स्थाने क्वचिद् द्वितीया भवति । विज्जुज्जोयं भरइ रत्तिं, आर्षे तृतीयाऽपि दृश्यते, तेणं कालेणं तेणं समएण (तस्मिन् काले तस्मिन् समये) इत्यर्थः । प्रथमाया अपि द्वितीया दृश्यते, चउवीसपि जिणवरा (चतुर्विंशतिरपि जिनवरा इत्यर्थः) । इति कारकाणि ॥

अथ तिङन्तप्रकरणम्

त्यादीनामाद्यत्रयस्याद्यस्येचेचौ ॥३॥१३९॥ त्यादीनां विभक्तीना परस्मैपदानाम् आत्मनेपदानां च सम्बन्धिनः प्रथम-त्रयस्य यदाद्यं वचनं तस्य स्थाने इच् एच् इत्यादेशौ भवतः। चकारौ इचे चः ॥४॥३१८॥ इत्यत्र विशेषणार्थौं, हस् इ इतिस्थिते ॥

व्यञ्जनाददन्ते ॥३॥२३९॥ व्यञ्जनान्ताद् धातोरन्ते अकारो भवति। हसइ हसए, [1]भमइ [2]कुणइ चुम्बइ भणइ उपसमइ पावइ सिंचइ रुन्धइ मुसइ हरइ [3]करइ शबादीनां च प्राय. प्रयोगो नास्ति ॥

बहुष्वाद्यस्य न्ति न्ते इरे ॥३॥१४२॥ त्यादीनां पर-स्मैपदानाम् आत्मनेपदानाम् आद्यत्रयस्य सम्बन्धिनो बहुषु वर्त्त-मानस्य वचनस्य स्थाने न्ति न्ते इरे इत्यादेशा भवन्ति। हसन्ति वेवन्ति, [4]हसिज्जन्ति, रमिज्जन्ति, [5]गज्जन्ते खे मेहा, बीहन्ते [5]रक्खसाणं च, [6]उप्पज्जन्ते कइहिअयसायरे कव्वरयणाइं, दोण्णि वि न पहुप्पिरे वाहु न प्रभवत इत्यर्थ विच्छुहिरे, विक्षुभ्यन्तीत्यर्थ.। क्वचिद् इरे एकत्वेऽपि, सुसइरे [7]गामचिक्खल्लो, शुष्य तीत्यर्थ ॥

---

१ भ्रमति, करोति, चुम्बति, भणति, उपशाम्यति, प्राप्नोति, सिञ्चति, रुणद्धि, मुश्णाति हरति किरति ॥ २ कृगे कुण ।४।६५। इति करोते कुणा-देशः ॥ ३ ऋवर्णस्यार ॥४॥२३४॥ इति ऋकारस्य स्थाने अरादेश । ४ ईअइज्जो क्यस्य ॥३॥१६०॥ इति क्यस्य इज्जादेश. ॥ हस्यन्ते, रम्यन्ते ।५ बिभ्यति राक्षसेभ्य (६) उत्पद्यन्ते कवि हृदय सागरे काव्यरत्नानि, (७) ग्रामपक.।

द्वितीयस्य सि से ॥३॥१४०॥ त्यादीनां परस्मैपदानाम् आत्मनेपदाना च द्वितीयस्य त्रयस्य संवन्धिन आद्यवचनस्य स्थाने सि से इत्यादेशौ भवतः। हससि हससे वेवसि वेवसे ॥

अत एवैच्से ॥३॥१४५॥ त्यादेः स्थाने यौ एच् से इत्यादेशावुक्तौ तौ अकारान्तादेव भवतो नान्यस्मात्। हसए हससे [1]तुवरए, तुवरसे करए करसे, अत इति किम् [2]ठाइ, ठासि, [3]वसुआइ, वसुआसि, [4]होइ होसि, एवकारोऽकारान्ताद् एच् से एव भवतः, इति विपरीतावधारणनिषेधार्थं, तेन अकारान्ताद् इच् सि इत्येतावपि सिद्धौ, हसइ हससि वेवइ वेवसि ॥

मध्यमस्येत्था हचौ ॥३॥१४३॥ त्यादीनां परस्मैपदात्मनेपदाना मध्यमत्रयस्य बहुषु वर्त्तमानस्य स्थाने इत्था हच् इत्यादेशौ भवतः। हसित्था हसह वेवित्था वेवह, बहुलाधिकारात् इत्था अन्यत्रापि (यद्यद् ते रोचते) जं जं ते रोइत्था, हच् इति चकारः, इहहचोर्हस्य ॥४।२६८॥ इत्यत्र विशेषणार्थः ॥

तृतीयस्य मिः ॥३॥१४१॥ त्यादीना परस्मैपदानामात्मनेपदाना च तृतीयस्य त्रयस्याद्यस्य वचनस्य स्थाने मिरादेशो भवति ॥

मौ वा ॥३॥१५४॥ अत आ इति वर्त्तते, अदन्ताद् धातोर्मौ परे अत आत्वं वा भवति। हसामि हसमि, वेवामि वेवमि, बहुलाधिकाराद् मिवेः स्थानीयस्य मेरिकारलोपश्च बहु जाणय रूसिउं सक्क, शक्नोमीत्यर्थः। न मर (न म्रिये इत्यर्थः।

---

१ त्वरस्तुवर–जयडो ॥४॥१७०॥ इति त्वरतेरतुवरादेशः ॥ २ स्थष्ठा–थक्क चिट्ठनिरप्पा ।४।१६। इति ठादेशः ३ उद्वतिरोरुम्मा वसुआ ।४।११। इति वसुवा आदेश. ।४। भुवेर्हो-हुवहुवा. ॥४॥६०॥ इति भूधातोर्हो आदेशः

तृतीयस्य मो मु माः ॥३॥१४४॥ त्यादीनां परस्मै-पदात्मनेपदाना तृतीयस्य त्रयस्य संम्बन्धिनो वहुषु वर्तमानस्य वचनस्य स्थाने मोमुम इत्येते आदेशा भवन्ति ॥

इच्च मो मु मे वा ॥३॥१५५॥ अकारान्ताद् धातोः परेषु मोमुमेषु अत इत्वं चकाराद् आत्त्व च वा भवतः। हसिमो हसामो हसमो, वेविमो वेवामो वेवमो, हसिमु हसामु हसमु, वेविमु, वेवामु वेवमु, हसिम हसाम हसम, वेविम वेवाम वेवम। वर्त्तमानपञ्चमीशतृपु वा ॥३॥१५८॥ इत्येत्त्वे तु, हसेमो हसेमु हसेम, वेवेमो वेवेमु वेवेम, अत इत्येव ठामो होमो ॥

अत्थिस्त्यादिना ॥३॥१४८॥ अस्ते. स्थाने त्यादिभिः सह अत्थि इत्यादेशो भवति। पुरुषवचने न विवक्षते। अत्थि सो, अत्थि ते, अत्थि तुवं, अत्थि तुम्हे, अत्थि अहं, अत्थि अम्हे ॥

सिनाऽस्तेः सिः ॥३॥१४६॥ सिना द्वितीयत्रिकादेशेन सह अस्ते. सिरादेशो भवति। निट्ठुरो जं सि, सिना इति किम्। से आदेशे अत्थि तुमं ॥

मि मो मै म्हि म्हो म्हा वा ॥३॥१४७॥ अस्तेर्धातोः स्थाने मिमोम इत्यादेशै. सह यथासख्यं म्हि म्हो म्ह इत्यादेशा भवन्ति। एस म्हि, (एषोऽस्मीत्यर्थः) गय म्हो, गय म्ह। मुकारस्याग्रहणादप्रयोग एव तस्य इत्यवसीयते, पक्षे अत्थि अम्हे। ननु च सिद्धावस्थायां पक्ष्मश्मष्मस्मह्मां म्हः ॥२॥७४॥ इत्यनेनैव म्हादेशे म्हो इति सिद्धयति? सत्यं किन्तु विभक्तिविधौ प्रायः साध्यमानावस्थाऽङ्गी क्रियते, अन्यथा वच्छेण वच्छेसु सव्वे जे ते के इत्याद्यर्थं सूत्राणि नारम्भनीयानि स्युः ॥

भविष्यति हिरादिः ॥३॥१६६॥ भविष्यदर्थे विहिते प्रत्यये परे तस्यैव आदि–हि. प्रयोक्तव्यः, [१]होहिइ, भविष्यति भविता वेत्यर्थ., एवं होहिन्ति होहिसि होहित्था होहिह ॥

मि मो मु मे स्सा हा नवा ॥३॥१६७॥ भविष्यत्यर्थे मिमोमुमेषु तृतीयत्रिकादेशेषु परेषु तेषामेव आदी स्सा हा इत्येतौ वा प्रयोक्तव्यौ, हेरपवादौ, पक्षेहिरपि होस्सामि होहामि, होस्सामो होहामो, होस्सामु होहामु, होस्साम होहाम, पक्षे होहिमि होहिमो होहिमु होहिम, क्वचित्तु हा न भवति, [२]हसिस्सामो हसिहिमो ॥

मेः स्सं ॥३॥१६९॥ धातोः परो भविष्यति काले म्यादेशस्य स्थाने स्सं वा प्रयोक्तव्यः, होस्सं, हसिस्सं, कित्तइस्स पक्षे होहिमि, होस्सामि, होहामि, कित्तइहिमि ॥

श्रु-गमि-रुदि-विदि-दृशि-मुचि-वचि-छिदि-भिदि-भुजां सोच्छं गच्छं रोच्छं वेच्छं दच्छं मोच्छं वोच्छं छेच्छं भेच्छं भोच्छं ॥३॥१७१॥ श्र्वादीना धातूना भविष्यद्विहितम्यन्ताना स्थाने सोच्छम् इत्यादयो वा निपात्यन्ते, सोच्छं (श्रोष्यामि) गच्छ (गमिष्यामि) सगच्छ (सगस्ये) रोच्छं (रोदिष्यामि) विद ज्ञाने, वेच्छं (वेदिष्यामि) दच्छ (द्रक्ष्यामि) मोच्छ (मोक्ष्यामि) वोच्छं (वक्ष्यामि) छेच्छं (छेत्स्यामि) भेच्छं (भेत्स्यामि) भोच्छ (भोक्ष्ये)

सोच्छादय इजादिषु हिलुक् च वा ॥३॥१७२॥

---

१ भुवेर्हो–हुव–हवा ॥४॥६०॥ इति हो भुव स्थाने हो आदेश.
(२)इच्च मोमुमे वा ॥३॥१५५॥ इति इत्वे ॥

शॢ्वादीनां स्थाने इजादिषु भविष्यदादेशेषु यथासंख्यं सोच्छादयो भवन्ति । ते एव आदेशा अन्त्यस्वराद्यवयववर्ज्या [1] इत्यर्थः हिलुक् च वा भवति, सोच्छिइ [2] पक्षे सोच्छिहिइ, एवं सोच्छिंति सोच्छिहिंति, सोच्छिसि सोच्छिहिसि, सोच्छित्था सोच्छिहित्था, सोच्छिह सोच्छिहिह, सोच्छिमि सोच्छिहिमि सोच्छिस्सामि, सोच्छिहामि, सोच्छिस्स, सोच्छं, सोच्छिमो, सोच्छिहिमो, सोच्छिस्सामो, सोच्छिहामो, सोच्छिहिस्सा, सोच्छिहित्था ॥ एवं मुमयोरपि. गच्छिइ, गच्छिहिइ, गच्छिंति, गच्छिहिन्ति, गच्छिसि, गच्छिहिसि, गच्छित्था, गच्छिहित्था, गच्छिह, गच्छिहिह, गच्छिमि, गच्छिहिमि, गच्छिस्सामि, गच्छिहामि, गच्छिस्सं, गच्छं गच्छिमो, गच्छिहिमो गच्छिस्सामो गच्छिहामो, गच्छिहित्था, गच्छिहिस्सा ॥ एवं मुमयोरपि, एवं रुदादीनामपि उदाहार्यम् ॥

मो-मु-मानां हिस्सा हित्था ॥३॥१६८ धातो परो भविष्यति काले मोमुमाना स्थाने हिस्सा हित्था इत्येतौ वा प्रयोक्तव्यौ । होहिस्सा होहित्था, हसिहित्था हसिहिस्सा, पक्षे होहिमो होस्सामो होहामो इत्यादि ॥

कृ-दो हं ॥३॥१७०॥ करोतेर्ददातेश्च परो भविष्यति विहितस्य म्यादेशस्य स्थाने हं वा प्रयोक्तव्यः । [3] काहं दाहं, करिष्यामि दास्यामीत्यर्थः ॥

ज्जाज्जे ॥३॥१५९॥ ज्जा ज्ज इत्यादेशयो. परयोरकारस्य एकारो भवति ॥

---

१ पूर्वसूत्रे तु मिप्रत्ययेन सह आदेशा, अत्र तु इजादिप्रत्ययं विनैव इतिभाव.।
२ हिलुगभावपक्षे ॥ ३ आ. कृगो भूतभविष्यतोश्च ।४।२१४। इति आत्वे ।

वर्त्तमाना-भविष्यन्त्योश्च ज्ज ज्जा वा ॥३॥१७७॥

वर्तमाना भविष्यन्त्योश्च विध्यादिषु च विहितस्य प्रत्ययस्य स्थाने ज्ज ज्जा इत्यादेशौ वा भवतः, पक्षे यथाप्राप्तम्, वर्तमाना । हसेज्ज हसेज्जा, पढेज्ज पढेज्जा, [१]सुणेज्ज सुणेज्जा, पक्षे हसइ, पढइ सुणइ । (भविष्यन्ती) प ज्ज पढेज्जा पक्षे पढिहिइ । विध्यादिषु हसेज्ज हसेज्जा, हसेतु हसेत् वा इत्यर्थः, पक्षे हसउ, एवं सर्वत्र, यथा तृतीयत्रये, अइवाएज्जा, अइवाया-वेज्जा, 'न ममणु जाणामि, न समणु जाणेज्जा वा, अन्ये तु अन्यासामपीच्छन्ति, होज्जा भवति भवेत् भवतु अभवत् अभूत् वभूव भूयात् भविता भविष्यति अभविष्यत् वेत्यर्थ. ॥

मध्ये च स्वरान्ताद्वा ॥३॥१७८॥ स्वरान्ताद् धातोः' प्रकृतिप्रत्यययोर्मध्ये, चकारात् प्रत्ययाना च स्थाने ज्ज ज्जा इत्येती वा भवतः, वर्तमाना-भविष्यन्त्योर्विध्यादिपु च, (वर्त-मानाः) होज्जइ होज्जाइ, होज्ज होज्जा, पक्षे होइ, [२]एव होज्जसि होज्जासि होज्ज होज्जा, होसि इत्यादि, (भविष्यन्ती) होज्जहिइ होज्जाहिइ, होज्ज होज्जा, पक्षे होहिइ, एवं होज्ज-हिसि होज्जाहिसि, होज्ज होज्जा, होहिसि होज्जहिमि होज्जाहिमि [३]होज्जस्सामि होज्जहामि [४]होज्जस्सं होज्ज होज्जा इत्यादि

---

१ चि जि श्रु हु स्तु लू पू धूगा णो ह्रस्वश्च ।४।२४१। इति सूत्रेण णकारागमः
२ वर्त्तमानकालिकमध्यमस्य उदाहरणम् दर्शयति, होज्जसीत्यादि । ३ मिमो-मुमे स्साहा नवा ॥३॥१६७॥ इति मे. स्साही आगमी ॥ ४ मे. स्स ॥३॥ १६९॥ इति मेः स्थाने स्समादेश. ॥

विध्यादिषु होज्जउ होज्जाउ होज्ज होज्जा 'भवतु भवेद्वा इत्यर्थः पक्षे होउ, स्वरान्तादिति किम्, हसेज्ज हसेज्जा 'तुवरेज्ज तुवरेज्जा

सी ही हीअ भूतार्थस्य ॥३॥१६२॥ भूतेऽर्थे विहितोऽद्यतनादिप्रत्ययो भूतार्थः तस्य स्थाने सी ही हीअ इत्यादेशा भवन्ति, उत्तरत्र व्यञ्जनादीअ विधानात् स्वरान्तादेवाऽयं विधिः कासी काही काहीअ, अकार्षीत् अकरोत् चकार वेत्यर्थः। एवं ठासी ठाही ठाहीअ, आर्षे 'देविन्दो इण अब्बवी, इत्यादौ सिद्धावस्थाश्रयणात् ह्यस्तन्याः प्रयोगः ॥

व्यञ्जनादीअः ॥३॥१६३॥ व्यञ्जनान्ताद् धातोः परस्य भूतार्थस्य अद्यतनादिप्रत्ययस्य ईअ इत्यादेशो भवति। हुवीअ, अभूत् अभवत् बभूव वेत्यर्थः, एवम् [2]अच्छीअ आसिष्ट आस्त आसांचक्रे वा, [3]गेण्हीअ अग्रहीत् अगृण्हात् जग्राह वा ॥

तेनास्ते-रास्यहेसी ॥३॥१६४॥ अस्ते-र्धातोस्तेन भूतार्थेन प्रत्ययेन सह आसि अहेसि इत्यादेशौ भवतः। आसि सो तुमं अहं वा, जे आसि ये आसन्नित्यर्थ, एवम् अहेसि ॥

दु सु मु विध्यादिष्वेकस्मिस्त्रयाणाम् ॥३॥१७३॥ विध्यादिष्वर्थेषु उत्पन्नानाम् एकत्वेऽर्थे वर्तमानाना त्रयाणामपि त्रिकाणां स्थाने यथासंख्य दुसुमु इत्येते आदेशा भवन्ति। हसउ सा, हससु तुमं हसामु अहं। पेच्छउ पेच्छसु पेच्छामु दकारोच्चारणं भाषान्तरार्थम्।

सोर्हिर्वा ॥३॥१७४॥ पूर्वसूत्रविहितस्य सोः स्थाने हिरादेशो वा भवति। [4]देहि, देसु ॥

---

१ त्वरस्तुवर-जअडौ ।४॥१७०। इति त्वर स्थाने तुवर आदेश २ गमिष्यमासा ॥४॥२१५॥ इति सूत्रेण मान्तस्य छादेश.। ३ ग्रहो वल-गेण्ह-हर-पङ्ग-निरुवाराहि पच्चु आ ॥४॥२०१॥ इति गेण्हादेश.। ४ स्वराणा स्वरा. ॥४॥२३८॥ इत्याकारस्य एत्त्वम् ॥

अत इज्जस्विज्जहीज्जे लुको वा ॥३॥१७५॥
अकारात् परस्य सोः इज्जसु इज्जहि इज्जे इत्येते लुक् च आदेशा वा भवन्ति । हसेज्जसु हसेज्जहि हसेज्जे हस, पक्षे हससु अत इति किम् होसु ठाहि ॥

बहुषु न्तु ह मो ॥३॥१७६॥ विध्यादिपूत्पन्नानां बहुष्वर्थेषु वर्तमानाना त्रयाणां त्रिकाणां स्थान यथासंख्यं न्तु ह मो इत्यादेशा भवन्ति । हसन्तु, (हसन्तु हसेयुर्वा,) हसह (हसत हसेत वा) हसामो (हसाम हसेम वा) एवं तुवरन्तु तुवरह तुवरामो,

ज्जात् सप्तम्या इर्वा ॥३॥१६५॥ सप्तम्यादेशात् ज्जात् पर इर्वा प्रयोक्तव्यः (भवेत्) होज्जइ होज्ज ॥

क्रियातिपत्तेः ॥३॥१७९॥ क्रियातिपत्ते. स्थाने ज्जज्जावादेशौ भवतः । होज्ज होज्जा अभविष्यदित्यर्थ., जइ होज्ज वण्णणिज्जो ॥

न्त-माणौ ॥३॥१८०॥ क्रियातिपत्तेः स्थाने न्तमाणौ आदेशौ भवत. । होन्तो होमाणो अभविष्यदित्यर्थः ॥

[1] हरिणट्ठाणे हरिणंक जइ सि हरिणाहिवं निवेसन्तो ॥
न सहन्तो च्चिअ तो राहुपरिहवं से जिअन्तस्स ॥ १ ॥

शत्रानशः ॥३॥१८१॥ शतृ आनश् इत्येतयो. प्रत्येकं न्त माण इत्यादेशौ भवतः । शतृ-हसन्तो, हसमाणो, आनश-वेवन्तो वेवमाणो ।

ई च स्त्रियाम् ॥३॥१८२॥ स्त्रिया वर्त्तमानयोः शत्रानशोः स्थाने ई चकारात् न्तमाणौ च भवन्ति । हसई हसन्ती, हसमाणी, वेवई वेवन्ती वेवमाणी ॥

---

१ हरिणस्थाने हरिणाङ्क यदि त्व हरिणाधिप न्यवेशय ॥ नासहिष्यथा एव ततो राहुपरिभवम् अस्य जीवत ॥१॥

उवर्णस्याव: ॥४॥२३३॥ धातोरन्त्यस्य उवर्णस्य अवादेशो भवति। हुङ् निण्हवइ, हु, निह्वइ, च्युङ्, चवइ, रु, रवइ, कु, कवइ, सू, सवइ पसवइ ॥

ऋवर्णस्यार: ॥४॥२३४॥ धातोरन्त्यस्य ऋवर्णस्य अरादेशो भवति। करइ, घरइ, मरइ, वरइ, सरइ, हरइ, तरइ, जरइ ॥

वृषादीनामरि: ॥४॥२३५॥ वृष इत्येवं प्रकाराणा धातूनाम् ऋवर्णस्य अरि' इत्यादेशो भवति। वरिसइ, करिसइ, दरिसइ, मरिसइ, हरिसइ, येषामरिरादेशो दृश्यते ते वृषादय: ॥

रुषादीनां दीर्घ: ॥४॥२३६॥ रुष इत्येवंप्रकाराणां धातूनां स्वरस्य दीर्घो भवति। रूसइ तूसइ सूसइ दूसइ सीसइ पूसइ इत्यादि

युवर्णस्य गुण: ॥४॥२३७॥ धातोरिवर्णस्य उवर्णस्य च ङ्कित्यपि गुणो भवति । जेऊण नेऊण, नेइ नेन्ति, उड्डेइ उड्डेन्ति, मोत्तूण सोऊण, क्वचिन्न भवति, नीओ उड्डीणो ॥

स्वराणां स्वरा. ॥४॥२३८॥ धातुषु स्वराणां स्थाने स्वरा बहुलं भवन्ति । हिवइ हवइ, चिणइ चुणइ, [1] सद्दहणं सद्दहाण, धावइ धुवइ, [2] रुवइ रोवइ, क्वचिन्नित्यम् देइ, लेइ विहेइ, नासइ, आर्षे बेमि ॥

स्वरादनतो वा ॥४॥२४०॥ अकारान्तवर्जितात्स्वरान्तात् धातोरन्ते अकारागमो वा भवति । पाअइ पाइ, धाअइ,

---

१ श्रदो धो दह ॥४॥९॥ इति सूत्रेण धा स्थाने दहादेशो: २) रुदनमोर्वं ॥४॥२२६॥ इति अन्तस्य वो भवति ॥

धाइ, जाअइ जाइ, [1]झाअइ झाइ, [2]जम्भाअइ जम्भाइ, उव्वाअइ उव्वाइ, मिलाअइ मिलाइ, विक्केअइ विक्केइ, होअऊण होऊण अनत इति किम् ? चिइच्छइ दुगुच्छइ ॥

चि-जि-श्रु-हु-स्तु-लू-पू-धूगां णो ह्रस्वश्च ॥४॥२४१॥ च्यादीनां धातूनामन्ते णकारागमो भवति। एषां स्वरस्य च ह्रस्वो भवति। चिणइ, जिणइ, सुणइ, हुणइ, थुणइ, लुणइ, पुणइ, धुणइ, बहुलाधिकारात् क्वचित् विकल्पः, उच्चिणइ उच्चेइ, जेऊण जिणिऊण, जयइ जिणइ, सोऊण सुणिऊण ॥

क्ते ॥३॥१५६॥ क्ते परतोऽत इत्त्व भवति। हसिअं पढिअं नविअं हासिअं पाढिअं 'गयं नयं' इत्यादि तु सिद्धावस्थापेक्षणात्, अत इत्येव झायं लुअं हूअ ॥

एच्च क्त्वा-तुम्-तव्य भविष्यत्सु ॥३॥१५७॥ क्त्वातुम्तव्येषु भविष्यत्कालविहिते प्रत्यये च परतोऽत एकारश्चकाराद् इकारश्च भवति। 'क्त्वा' हसेऊण, 'तुम्' हसेउं हसिउं 'तव्य' हसेअव्वं हसिअव्व 'भविष्यत्' हसेहिइ हसिहिइ, अत इत्येव काऊण ॥

वर्त्तमाना-पञ्चमी शतृषु वा ॥३॥१५८॥ वर्त्तमानापञ्चमीशतृषु परत अकारस्य स्थाने एकारो वा भवति। 'वर्त्तमाना' हसेइ हसइ हसेम हसिम हसेमु हसिमु [3]'पञ्चमी' हसेउ हसउ सुणेउ, 'शतृ' हसेन्तो हसन्तो क्वचिन्न भवति, जयइ क्वचिदात्त्वमपि सुणाउ ॥

---

१ ध्या-गोर्झा-गौ ॥४॥ झा इति आदेश ॥ २ अवेर्जृम्भो जम्भा ।४।१५७॥ इति जम्भादेश. । ३ पञ्चमीति लोट् लकारस्य परत इत्यर्थ. ।

अथ ण्यन्तव्यवस्था

णेरदेदावावे ।।३।।१४९।। णेः स्थाने अत् एत् आव आवे एते चत्वार आदेशा भवन्ति । [१]दरिसइ, [२]कारेइ, करावइ करावेइ, हासेइ हसावइ हसावेइ, उवसामेइ उवसमावइ उवसमावेइ, वहुलाधिकारात् क्वचिद् एन्नास्ति, जाणावेइ, क्वचिद् आवे नास्ति, पाएइ भावेइ ।।

गुर्वादेरवि-र्वा ।।३।।१५०।। गुर्वादेर्णे. स्थाने अवि इत्यादेशो वा भवति। (शोषितम्) सोसविअं (तोषितम्)तोसविअं तोसिअ ।

भ्रमेराडो वा ।।३।।१५१।। भ्रमे परस्य णेराड इति आदेशा वा भवति, भमाडइ, भमाडेइ पक्षे भामेइ भमावइ भमावेइ।

लुगावी क्त-भावकर्मसु ।।३।।१५२।। णेः स्थाने लुग् आवि इत्यादेशौ भवतः क्ते भावकर्मविहिते च प्रत्यये परे, कारिअं कराविअं, हासिअं हासाविअं, खामिअं खमाविअं, भाव-कर्मणोः, [३]कारीअइ करावीअइ कारिज्जइ कराविज्जइ, हासी-अइ हसाविअइ हासिज्जइ हसाविज्जइ ।।

अदेल्लुक्यादेरत आः ।।३।।१५३।। णेरदेल्लोपेषु कृतेपु आदेरकारस्य आ भवति । (अति) [४]पाडइ (एति) कारेइ खामेइ, (लुकि) कारिअ खामिअं, करीअइ खामीअइ, कारि-ज्जइ खामिज्जइ । अदेल्लुकि इति किम्, कराविअ करावीअइ

---

१) विपादीनामरिः ।।४।।२३५ । इति अरि आदेश ।।

२) अदेल्लुक्यादेरत आ. इति आकारादेश ।।

३ ईअइज्जौ क्यस्य ।।३।।१६०।। इति क्यस्य ईअ इज्जो आदेशौ ।।

४) सदपतोर्डः ।।४।।२१९।। इति सूत्रेण अन्त्यस्यडादेश. ।।

करावि‍ज्जइ, आदेरिति किम्, संगामेइ । इह व्यवहितस्य मा भूत्, कारिअ इह अन्त्यस्य माभूत्, अत इति किं, दूसेइ, केचित्तु आवेआव्यादेशयोरपि आदेरत आत्वम् इच्छन्ति, कारावेइ । हासाविओ जणो सामलीए ॥

अथभावकर्मप्रक्रिया

ईअ-इज्जौ क्यस्य ॥३॥१६०॥ [१] चिजिप्रभृतीना भावकर्मविधिं वक्ष्यामः, येषां तु न वक्ष्यते तेषां संस्कृतातिदेशात् प्राप्तस्य क्यस्य स्थाने ईअ इज्ज इत्यादेशौ भवतः । हसीअइ हसिज्जइ, हसीअन्तो हसिज्जन्तो, हसीअमाणो हसिज्जमाणो, पढीअइ पढिज्जइ, होईअइ होइज्जइ, बहुलाधिकारात् क्वचित् क्योऽपि विकल्पेन भवति मए न वेज्ज मए न विज्जेज्ज, तेण लहेज्ज तेण लहिज्जेज्ज तेण [२] अच्छेज्ज तेण अच्छिज्जेज्ज तेण अच्छीअइ ॥

दृशि-वचेर्डीस-डुच्चौ ॥३॥१६१॥ दृशेर्वचेश्च परस्य क्यस्य स्थाने यथा संख्य डीस डुच्च इत्यादेशौ भवत. । ईअइ-ज्जापवाद दीसइ, वुच्चइ ॥

क्यङोर्यलुक् ॥३॥१३८॥ क्यङन्तस्य क्यजन्तस्य क्यषन्तस्य वा सम्बन्धिनो यस्य लुग् भवति, गरुआइ गरुआअइ (अगुरुर्गुरुर्भवति, गुरुरिवाचरति वेत्यर्थः) क्यङ्ष् दमदमाइ दमदमाअइ, लोहिआइ लोहिआअइ ॥

न वा कर्मभावे व्वः क्यस्य च लुक् ॥४॥२४२॥ च्यादीनां अष्टानां कर्मणि भावे च वर्त्तमानानामन्ते द्विरुक्तो

---

१ चिजिश्रुहुस्तुलूपूवूगा णो ह्रस्वश्च ॥४॥२४१॥ इति सूत्रोक्तानाम् ॥

२ गमिष्य मासा छ ॥४॥२१५॥ इति सूत्रेण छादेश. ॥

वकारागमो वा भवति। तत्सन्नियोगे च क्यस्य लुक्। चिव्वइ, चिणिज्जइ, जिव्वइ जिणिज्जइ, सुव्वइ सुणिज्जइ, हुव्वइ हुणिज्जइ, थुव्वइ थुणिज्जइ, लुव्वइ लुणिज्जइ, पुव्वइ पुणिज्जइ, धुव्वइ धुणिज्जइ। एवं भविष्यति, [१]चिव्विहिइ इत्यादि ॥

म्मश्चेः ॥४॥२४३॥ चिग कर्मणि भावे च अन्ते सयुक्तो मो वा भवति, तत्सन्नियोगे क्यस्य च लुक्। चिम्मइ चिव्वइ चिणिज्जइ 'भविष्यति' चिम्मिहिइ चिव्विहिइ चिणिहिइ ॥

हन्खनोरन्त्यस्य ॥४॥२४४॥ अनयो कर्मभावेऽन्त्यस्य द्विरुक्तो मो वा भवति, तत्सन्नियोगे क्यस्य च लुक्। हम्मइ हणिज्जइ, खम्मइ खणिज्जइ, 'भविष्यति' हम्मिहिइ हणिहिइ, खम्मिहिइ खणिहिइ, बहुलाधिकाराद् हन्ते. कर्तर्यपि, हम्मइ हन्तीत्यर्थः। क्वचिन्न भवति, हन्तव्वं हन्तूण हओ ॥

ब्भो दुह-लिह-वह-रुधामुच्चात. ॥४॥२४५॥ दुहादीनामन्त्यस्य कर्मभावे द्विरुक्तो भो वा भवति। तत्सन्नियोगे क्यस्य च लुक्, वहेरकारस्य च उकार.। दुब्भइ दुहिज्जइ, लिब्भइ लिहिज्जइ, वुब्भइ वहिज्जइ, रुब्भइ [२]रुन्धिज्जइ, भविष्यति, दुब्भिहिइ दुहिहिइ इत्यादि ॥

दहो ज्झः ॥४॥२४६॥ दहोऽन्त्यस्य कर्मभावे द्विरुक्तो झो वा भवति, तत्सन्नियोगे क्यस्य च लुक्। [३]डज्झइ डहिज्जइ, भविष्यति, डज्झिहिइ डहिहिइ ॥

---

१ एच्च क्त्वा–तुम् तव्य भविष्यत्सु ॥३॥१५७॥ इति इत्वे ॥ २ रुधो न्ध म्भौ च ॥४॥२१८॥ इति न्धादेशः ॥ ३ दश–दहोः ॥१॥ २१८॥ इति सूत्रेण दस्य डादेशे ॥

कराविज्जइ, आदेरिति किम्, संगामेइ । इह व्यवहितस्य मा भूत्, कारिअ इह अन्त्यस्य माभूत्, अत इति किं, दूसेइ, केचित्तु आवेआव्यादेशयोरपि आदेरत आत्त्वम् इच्छन्ति, कारावेइ । हासाविओ जणो सामलीए ॥

अथभावकर्मप्रक्रिया

ईअ-इज्जौ क्यस्य ॥३॥१६०॥ [1]चिजिप्रभृतीनां भावकर्मविधिं वक्ष्यामः, येषां तु न वक्ष्यते तेषां संस्कृतातिदेशात् प्राप्तस्य क्यस्य स्थाने ईअ इज्ज इत्यादेशौ भवतः । हसीअइ हसिज्जइ, हसीअन्तो हसिज्जन्तो, हसीअमाणो हसिज्जमाणो, पढीअइ पढिज्जइ, होईअइ होइज्जइ, बहुलाधिकारात् क्वचित् क्योऽपि विकल्पेन भवति मए न वेज्ज मए न विज्जेज्ज, तेण लहेज्ज तेण लहिज्जेज्ज तेण [2]अच्छेज्ज तेण अच्छिज्जेज्ज तेण अच्छीअइ ॥

दृशि-वचेर्डीस-डुच्चौ ॥३॥१६१॥ दृशेर्वचेश्च परस्य क्यस्य स्थाने यथा संख्य डीस डुच्च इत्यादेशौ भवत. । ईअइ-ज्जापवादः दीसइ, वुच्चइ ॥

क्यङोर्यलुक् ॥३॥१३८॥ क्यङन्तस्य क्यजन्तस्य क्यषन्तस्य वा सम्बन्धिनो यस्य लुग् भवति, गरुआइ गरुआअइ (अगुरुर्गुरुर्भवति, गुरुरिवाचरति वेत्यर्थः) क्यङ्ष् दमदमाइ दमदमाअइ, लोहिआइ लोहिआअइ ॥

न वा कर्मभावे व्वः क्यस्य च लुक् ॥४॥२४२॥ च्यादीनां अष्टानां कर्मणि भावे च वर्त्तमानानामन्ते द्विरुक्तो

---

१ चिजिश्रुहुस्तुलूपूधूगां णो ह्रस्वश्च ॥४॥२४१॥ इति सूत्रोक्तानाम् ॥

२ गमिष्य मासां छ ॥४॥२१५॥ इति सूत्रेण छादेश ॥

वकारागमो वा भवति । तत्सन्नियोगे च क्यस्य लुक् । चिव्वइ, चिणिज्जइ, जिव्वइ जिणिज्जइ, सुव्वइ सुणिज्जइ, हुव्वइ हुणिज्जइ, थुव्वइ थुणिज्जइ, लुव्वइ लुणिज्जइ, पुव्वइ पुणिज्जइ, धुव्वइ धुणिज्जइ । एवं भविष्यति, [१] चिव्विहिइ इत्यादि ॥

म्मश्चेः ॥४॥२४३॥ चिगः कर्मणि भावे च अन्ते संयुक्तो मो वा भवति, तत्सन्नियोगे क्यस्य च लुक् । चिम्मइ चिव्वइ चिणिज्जइ 'भविष्यति' चिम्मिहिइ चिव्विहिइ चिणिहिइ ॥

हन्खनोरन्त्यस्य ॥४॥२४४॥ अनयो कर्मभावेऽन्त्यस्य द्विरुक्तो मो वा भवति, तत्सन्नियोगे क्यस्य च लुक् । हम्मइ हणिज्जइ, खम्मइ खणिज्जइ, 'भविष्यति' हम्मिहिइ हणिहिइ, खम्मिहिइ खणिहिइ, बहुलाधिकाराद् हन्ते. कर्तर्यपि, हम्मइ हन्तीत्यर्थः । क्वचिन्न भवति, हन्तव्वं हन्तूण हओ ॥

ब्भो दुह-लिह-वह-रुधामुच्चात ॥४॥२४५॥ दुहादीनामन्त्यस्य कर्मभावे द्विरुक्तो भो वा भवति । तत्सन्नियोगे क्यस्य च लुक्, वहेरकारस्य च उकार. । दुब्भइ दुहिज्जइ, लिब्भइ लिहिज्जइ, वुब्भइ वहिज्जइ, रुब्भइ [२] रुन्धिज्जइ, भविष्यति, दुब्भिहिइ दुहिहिइ इत्यादि ॥

दहो ज्झः ॥४॥२४६॥ दहोऽन्त्यस्य कर्मभावे द्विरुक्तो झो वा भवति, तत्सन्नियोगे क्यस्य च लुक् । [३] डज्झइ डहिज्जइ, भविष्यति, डज्झिहिइ डहिहिइ ॥

---

१ एच्च क्त्वा–तुम् तव्य भविष्यत्सु ॥३॥१५७॥ इति इत्वे ॥ २ रुधो न्ध म्भौ च ॥४॥२१४॥ इति न्धादेशः ॥ ३ दश–दहो. ॥१॥ २१८॥ इति सूत्रेण दस्य डादेशे ॥

बन्धो न्धः ॥४॥२४७॥ बन्धेर्धातोरन्त्यस्य न्ध इत्य-वयवस्य कर्मभावे ज्झो वा भवति तत्सन्नियोगे क्यस्य च लुक्, । वज्झइ वन्धिज्जइ, भविष्यति, वज्झिहिइ वन्धिहिइ ॥

समनूपाद्रुधेः ॥४॥२४८॥ समनूपेभ्य. परस्य रुधे-रन्त्यस्य कर्मभावे ज्झो वा भवति, तत्सन्नियोगे क्यस्य च लुक्, सरुज्झइ अणुरुज्झइ उवरुज्झइ, पक्षे संरुन्धिज्जइ अणुरुन्धिज्जइ उवरुन्धिज्जइ, भविष्यति, संरुज्झिहिइ सरुन्धिहिइ, इत्यादि ॥

गमादीनां द्वित्वम् ॥४॥२४९॥ गमादीनामन्त्यस्य कर्मभावे द्वित्वं वा भवति, तत् सन्नियोगे क्यस्य च लुक् (गम्) गम्मइ गमिज्जइ, (हस्) हस्सइ हसिज्जइ, (भण्) भण्णइ भणिज्जइ, (छुप्) छुप्पइ छुविज्जइ, रुदनमोर्वः ॥४॥२२६॥ इति कृतवकारादेशो रुदिरत्र पठ्यते (रुव्) रुव्वइ रुविज्जइ (लभ्) लब्भइ लहिज्जइ, (कथ) कत्थइ कहिज्जइ, (भुज्) भुज्जइ [१] भुञ्जिज्जइ, भविष्यति गम्मिहिइ गमिहिइ इत्यादि ॥

हृ-कृ-तृ-ज्रामीरः ॥४॥२५०॥ एषामन्त्यस्य ईर इत्यादेशो वा भवति । तत्सन्नियोगे च क्यस्य लुक्, हीरइ हरिज्जइ, कीरइ करिज्जइ, तीरइ तरिज्जइ, जीरइ जरिज्जइ ॥

अर्जेर्विढप्पः ॥४॥२५१॥ अन्त्यस्येति निवृत्तम्, अर्जेर्विढप्प इत्यादेशो वा भवति । तत्सन्नियोगे च क्यस्य लुक्, विढप्पइ पक्षे विढविज्जइ अज्जिज्जइ ॥

ज्ञो णव्व-णज्जौ ॥४॥२५२॥ जानाते. कर्मभावे णव्व णज्ज इत्यादेशौ वा भवत., तत्सन्नियोगे च क्यस्य लुक्, णव्वइ

---

१ भुजो-भुञ्ज जिम .....॥४॥११०॥ इति भुज धातो भुञ्ज आदेश. ।

णज्जइ, पक्षे जाणिज्जइ मुणिज्जइ । म्नाज्ञोर्णः ॥२॥४२॥ इति णादेशे तु णाइज्जइ, नञ्पूर्वस्य अणाइज्जइ ॥

व्याहृगेर्वाहिप्पः ।४।२५३। व्याहरतेः कर्मभावे वाहिप्प इत्यादेशो वा भवति, तत्सन्नियोगे क्यस्य च लुक्, वाहिप्पइ, वाहरिज्जइ ।

आरभेराढप्पः ॥४॥२५३॥ आङ्पूर्वस्य रभेः कर्मभावे आढप्प इत्यादेशो वा भवति तत्सन्नियोगे क्यस्य च लुक् । आढप्पइ, पक्षे आढवीअइ ॥

स्निह-सिचोः सिप्पः ॥४॥२५५॥ अनयोः कर्मभावे सिप्प इत्यादेशो भवति तत्सन्नियोगे क्यस्य च लुक् । सिप्पइ स्निह्यते सिच्यते वा, ॥

ग्रहेर्घेप्प. ॥४॥२५६॥ ग्रहेः कर्मभावे घेप्प इत्यादेशो वा भवति, तत्सन्नियोगे च क्यस्य लुक् । घेप्पइ [1]गिण्हिज्जइ ॥

स्पृशेश्छिप्प ॥४॥२५७॥ स्पृशते. कर्मभावे छिप्पादेशो वा भवति, तत्सन्नियोगे क्यस्य च लुक् । छिप्पइ छिविज्जइ ॥

इदितो वा ॥४॥१॥ सूत्रे ये इदितो धातवो वक्ष्यन्ते तेषां ये आदेशास्ते विकल्पेन भवन्ति इति वेदितव्यं तत्रैव चोदाहरिष्यते ।

कथेर्वज्जर–पज्जरोप्पाल–पिसुण–संघ–बोल्ल–चव–जम्प सीस–साहाः ॥४॥२॥ कथेर्धातोर्वज्जरादयो दशादेशा वा भवन्ति । वज्जरइ, पज्जरइ, उप्पालइ, पिसुणइ, सघइ, बोल्लइ, चवइ, जम्पइ सीसइ, सासइ, उव्बुक्कइ इति तु उत्पूर्वस्य वुक्क भाषणे इत्यस्य, पक्षे कहइ, एते च अन्यैर्देशीषु पठिता अपि अस्माभिर्धात्वादेशीकृता विविधेषु प्रत्ययेषु प्रतिष्ठिता इति

---

[1] ग्रहो वल–गेण्ह–रह–पड्ग–निरुवाराहिपच्चुआ ।४।२०९। इति गेण्हादेशः।

तथा च वज्जिरो (कथितः) वज्जरिऊण (कथयित्वा) वज्जरणं (कथनम्) वज्जरन्तो (कथयन्) वज्जरिअव्व (कथयितव्यम्) इति रूपसहस्राणि सिध्यन्ति संस्कृतधातुवच्च प्रत्ययलोपागमादिविधि ।

दुःखे णिव्वरः ॥४॥३॥ दुःखविषयस्य कथेर्णिव्वर इत्यादेशो वा भवति । णिव्वरइ, दुःखंकथयतीत्यर्थः)

जुगुप्सेर्झुण-दुगुच्छ-दुगुंछाः ॥४॥४॥ जुगुप्सेर्झुण दुगुच्छ दुगुंछा एते त्रय आदेशा वा भवन्ति । झुणइ, दुगुच्छइ दुगुछइ पक्षे जुगुच्छइ, गलोपे दुउच्छइ, दुउंछइ, जुउच्छइ ॥

बुभुक्षि-वीज्योर्णीरव-वोज्जौ ॥४॥५॥ बुभुक्षेराचार-क्विबन्तस्य च वीजेर्यथासंख्यम् एतावादेशौ वा भवतः । णीरवइ, बुहुक्खइ, वोज्जइ, वीज्जइ ॥

ध्या-गोर्झा-गौ ॥४॥६॥ अनयोर्यथासंख्यं झा गा इत्यादेशौ भवतः । झाइ, [1]झाअइ, णिज्झाइ, णिज्झाअइ निपूर्वो दर्शनार्थः, गाइ गाअइ, झाण, गाणं, ।

ज्ञो जाण-मुणौ ॥४॥७॥ जानातेर्जाणमुण इत्यादेशौ भवतः । जाणइ, मुणइ, बहुलाधिकारात् क्वचित् विकल्पः, जाणिअं णायं, जाणिऊण, णाऊण, जाणण णाणं, मणइ, इति तु मन्यतेः ॥

उदो ध्मो धुमा ॥४॥८॥ उदः परस्य ध्माधातोर्धुमा इत्यादेशो भवति । उद्धुमाइ ॥

श्रदो धो दहः ॥४॥९॥ श्रदः परस्य दधातेः दह इत्यादेशो भवति । सद्दहइ, सद्दहमाणो जीवो,

पिबेः पिज्ज-डल्ल-पट्ट-घोट्टाः ॥४॥१०॥ पिवतेरेते चत्वार आदेशा वा भवन्ति । पिज्जइ, डल्लइ, पट्टइ, घोट्टइ पिअइ ।

---

१ स्वरादनतो वा ॥४॥२४०॥ इति अन्ते अकारागम ॥

उद्वातेरोरुम्मा वसुआ ॥४॥११॥ उत्पूर्वस्य वातेरोरुम्मा वसुआ इत्यादेशौ वा भवतः। ओरुम्माइ, वसुआइ उव्वाइ ॥

निद्रातेरोहीरोङ्घौ ॥४॥१२॥ निपूर्वस्य द्रातेरोहीर ओघ इत्यादेशौ वा भवत । ओहीरइ, ओघइ, निद्दाइ,

आघ्रेराइग्घ ॥४॥१३॥ आजिघ्रतेराइग्घ इत्यादेशो वा भवति । आइग्घइ, आग्घाअइ,

स्नातेरब्भुत्तः ॥४॥१४॥ स्नातेरब्भुत्त इत्यादेशो वा भवति । अब्भुत्तइ, [१] ण्हाइ,

समः स्त्य. खा ॥४॥१५॥ सम्पूर्वस्य स्त्यायतेः खा इत्यादेशो वा भवति । संखाइ, संखाइअ,

स्थष्ठा–थक्क–चिट्ठ–निरप्पाः ॥४॥१६॥ तिष्ठतेरेते चत्वार आदेशा भवन्ति । ठाइ ठाअइ, ठाणं, पट्ठिओ, उट्ठिओ, पट्ठाविओ, थक्कइ, चिट्ठइ, [२] चिट्ठिऊण, निरप्पइ, बहुलाधिकारात् क्वचित् न भवति, थिअं थाणं, उत्थिओ, थाऊण ।

उदष्ठ–कुक्कुरौ ॥४॥१७॥ उद परस्य तिष्ठते ठ कुक्कुर इत्यादेशौ भवतः, उट्ठइ उक्कुक्कुरइ ॥

म्लेर्वा-पव्वायौ ॥४॥१८॥ म्लायतेर्वा पव्वाय इत्यादेशौ वा भवत. । वाइ, पव्वायइ, [३] मिलाइ ॥

निर्मो निम्माण–निम्मवौ ॥४॥१९॥ नि.पूर्वस्य मिमीतेरेतावादेशौ भवतः । निम्माणइ निम्मवइ ॥

---

१ सूक्ष्म–श्न–ष्ण स्न ह्न ह्ल क्ष्णा ण्ह ॥२॥७५॥ इति ण्हादेश ।
२ एच्च क्त्वा तुम्–तव्य–भविष्यत्सु ॥३॥१५७॥ इति इत्वे, क्त्वस्तुमत्तूण–तुआणाः ॥२॥१४६॥ इति ऊणादेशे । ३ लात् ॥२॥१०६॥ इति इत्वे ॥

क्षेर्णिज्झरो वा ॥४॥२०॥ क्षयतेर्णिज्झर इत्यादेशो वा भवति । णिज्झरइ, पक्षे [1] झिज्जइ ॥

छदेर्णेर्णुम-नूम-सन्नूम-ढक्कौम्वाल-पव्वालाः ॥४-॥२१॥ छदेर्ण्यन्तस्य एते षडादेशा वा भवन्ति । णुमइ नूमइ सन्नूमइ ढक्कइ ओम्वालइ पव्वालइ, छायइ ॥

निवृपत्योर्णिहोडः ॥४॥२२॥ निवृगः पतेश्च ण्यन्तस्य णिहोड इत्यादेशो वा भवति । णिहोडइ, पक्षे, निवारेइ पाडेइ ।

दूङो दूम ॥४॥२३॥ दूङो ण्यन्तस्य दूम इत्यादेशो भवति । दुमइ मज्झहिअय ॥

धवलेर्दुमः ॥४॥२४॥ धवलयतेर्ण्यन्तस्य दुमादेशो वा भवति । दुमइ, धवलइ, स्वराणा स्वरा बहुलम् ॥४॥२३८॥ इति दीर्घत्वमपि दूमिअं (धवलितमित्यर्थः)

तुलेरोहामः ॥४॥२५॥ तुलेर्ण्यन्तस्य ओहाम इत्यादेशो वा भवति । ओहामइ, तुलइ, ॥

विरिचेरोलुण्डोल्लुण्ड-पल्हत्थाः ॥४॥२६॥ विरेच-तेर्ण्यन्तस्य ओलुण्डादयस्त्रय आदेशा वा भवन्ति । ओलुण्डइ, उल्लुण्डइ, पल्हत्थइ, विरेअइ ॥

तडेराहोड-विहोडौ ॥४॥२७॥ तडेर्ण्यन्तस्य एतौ आदेशौ वा भवतः । आहोडइ विहोडइ, पक्षे [2] ताडेइ ॥

मिश्रेर्वीसाल-मेलवौ ॥४॥२८॥ मिश्रयतेर्ण्यन्तस्य वीसाल मेलव इत्यादेशौ वा भवतः । वीसालइ मेलवइ मिस्सइ ।

---

१ मध्ये च स्वरान्ताद्वा ॥३॥१७८॥ इति ज्जादेशे ॥ २ अदेल्लुक्यादेरत आः ॥३॥१५३॥ इति आत्वे, णेरदेदावावे ॥३॥१४९॥ इति एत्वे ।

उद्धूलेर्गुण्ठः ॥४॥२९॥ उद्धूलेर्ण्यन्तस्य गुण्ठ इत्यादेशो वा भवति। गुण्ठइ पक्षे उद्धूलेइ ॥

भ्रमेस्तालिअण्ट-तमाडौ ॥४॥३०॥ भ्रमतेर्ण्यन्तस्य तालिअण्ट-तमाडौ आदेशौ वा भवतः। तालिअण्टइ तमाडइ, भामेइ [१]भमाडइ भमावेइ ॥

नशेर्विउड-नासव-हारव-विप्पगाल-पलावाः ॥४॥३१॥ नशेर्ण्यन्तस्य एते पञ्चादेशा वा भवन्ति। विउडइ नासवइ हारवइ विप्पगालइ पलावइ, पक्षे नासेइ ॥४॥

दृशेर्दाव-दंस-दक्खवाः ॥४॥३२॥ दृशेर्ण्यन्तस्य एते त्रय आदेशा वा भवन्ति। दावइ दंसइ दक्खवइ, [२]दरिसइ ॥

उद्घटेरुग्गः ॥४॥३३॥ उत्पूर्वस्य घटेर्ण्यन्तस्य उग्ग इत्यादेशो वा भवति। उग्गइ उग्घाडइ ॥

स्पृहः सिहः ॥४॥३४॥ स्पृहो ण्यन्तस्य सिह इत्यादेशो भवति। सिहइ ॥

संभावेरासंघः ॥४॥३५॥ संभावयतेरासंघ इत्यादेशो वा भवति। आसंघइ, संभावइ ॥

उन्नमेरुत्थंघोल्लाल-गुलुगुञ्छोप्पेलाः ॥४॥३६॥ उत्पूर्वस्य नमेर्ण्यन्तस्य एते चत्वार आदेशा वा भवन्ति। उत्थंघइ उल्लालइ गुलुगुञ्छइ उप्पेलइ, उन्नामइ, ॥

प्रस्थापेः पट्ठव-पेण्डवौ ॥४॥३७॥ प्रपूर्वस्य स्थापेर्ण्यन्तस्य पट्ठव पेण्डव इत्यादेशौ वा भवत.। पट्ठवइ पेण्डवइ, पट्ठावइ।

---

१ भ्रमेराडो वा ॥३॥१५१॥ इति णेराड आदेशः ॥ २ वृषादीनामरिः ॥४॥२३५॥ इति अरि-आदेशः

विज्ञपेर्वोक्कावुक्कौ ॥४॥३८॥ विपूर्वस्य जानातेर्ण्यन्तस्य वोक्क आवुक्क इत्यादेशौ वा भवतः। वोक्कइ आवुक्कइ विण्णवइ।

अर्पेरल्लिव-चच्चुप्प-पणामाः ॥४॥३९॥ अर्पेर्ण्यन्तस्य एते त्रय आदेशा वा भवन्ति। अल्लिवइ चच्चुप्पइ पणामइ, पक्षे अप्पेइ ॥

यापेर्जव ॥४॥४०॥ यातेर्ण्यन्तस्य जव इत्यादेशो वा भवति। जवइ जावेइ ॥

प्लावेरोम्वाल-पव्वालौ ॥४॥४१॥ प्लवतेर्ण्यन्तस्य एतावादेशौ वा भवत। ओम्वालइ पव्वालइ, पावेइ ॥

विकोशेः पक्खोड ॥४॥४२॥ विकोशयतेर्नामधातोर्ण्यन्तस्य पक्खोड इत्यादेशो वा भवति। पक्खोडइ विकोसइ ॥

रोमन्थेरोग्गाल--वग्गोलौ ॥४॥४३॥ रोमन्थेर्नामधातोर्ण्यन्तस्य एतावादेशौ वा भवत.। ओग्गालइ वग्गोलइ रोमन्थइ ॥

कमेर्णिहुवः ॥४॥४४॥ कमेः स्वार्थण्यन्तस्य णिहुव इत्यादेशो वा भवति। णिहुवइ कामेइ ॥

प्रकाशेर्णुव्वः ॥४॥४५॥ प्रकाशेर्ण्यन्तस्य णुव्व इत्यादेशो वा भवति। णुव्वइ पयासेइ ॥

कम्पेर्विच्छोलः ॥४॥४६॥ कम्पेर्ण्यन्तस्य विच्छोल इत्यादेशो वा भवति। विच्छोलइ कम्पेइ ॥

आरोहेर्वलः ॥४॥४७॥ आरुहेर्ण्यन्तस्य वल इत्यादेशो वा भवति। वलइ [1]आरोहेइ ॥

---

१ णेरदेदावावे ॥३॥१४९॥ इति पक्षे णेरेदादेश. ॥

दोलेरंखोल. ॥ ४ ॥४८॥ दुलेः स्वार्थे ण्यन्तस्य रंखोल इत्यादेशो वा भवति, रखोलइ दोलइ ।

रञ्जे रावः ॥ ४ ॥ ४९ ॥ रञ्जेर्ण्यन्तस्य राव इत्यादेशो वा भवति, रावइ रजेइ ।

घटेः परिवाड. ॥ ४ ॥ ५० ॥ घटेर्ण्यन्तस्य परिवाड इत्यादेशो वा भवति, परिवाडेइ घडेइ ।

वेष्टे परिआलः ॥ ४ ॥ ५१ ॥ वेष्टेर्ण्यन्तस्य परिआल इत्यादेशो वा भवति, परिआलेइ, [1] वेढेइ

क्रियः किणो वेस्तु क्के च ॥ ४ ॥ ५२ ॥ णेरिति निवृत्तम्, क्रीणातेः किण इत्यादेशो भवति, वे परस्य तु द्विरुक्तः केश्चकारात्किणश्च भवति, किणइ विक्केइ विकिणइ ।

भियो भा बीहौ ॥ ४ ॥ ५३ ॥ बिभेतेरेतावादेशौ भवतः, भाइ भाइअं, बीहइ बीहिअ, बहुलाधिकारात् भीओ ।

आलीङोल्ली ॥ ४ ॥ ५४ ॥ आलीयतेरल्ली इत्यादेशो भवति, अल्लीअइ, अल्लीणो ।

निलीङोर्णिलीअ – णिलुक्क – णिरिग्घलुक्कलिक्क ल्हिक्का ॥४॥ ५५॥ निलीङेरेते षडादेशा वा भवन्ति, णिलीअइ णिलुक्कइ णिरिग्घइ लुक्कइ लिक्कइ, ल्हिक्कइ, [2] निलिज्जइ ।

विलीङेर्विरा ॥ ४ ॥ ५६ ॥ विर्लङेर्विरा इत्यादेशो वा भवति, विराइ, विलिज्जइ ।

---

१ वेष्टेः ॥ ४ ॥ २२१ ॥ इति टकारस्य ढकारादेश ॥ २ मध्येच स्वरान्ताद्वा

रुते रुञ्ज-रुण्टौ ॥ ४ ॥ ५७ ॥ रौतेरेतावादेशौ वा भवतः, रुञ्जइ रुण्टइ, [1]रवइ,

श्रुटेर्हण ॥ ४ ॥ ५८ ॥ शृणोतेर्हण इत्यादेशो वा भवति, हणइ [2]सुणइ,

धूगेर्धुव. ॥ ४ ॥ ५९ ॥ धुनातेर्धुव इत्यादेशो वा भवति, धुवइ धुणइ,

भुवेर्हो-हुव-हवा ॥ ४ ॥ ६० ॥ भुवो धातोर्हो हुव हव इत्यादेशा वा भवन्ति, होइ होन्ति, हुवइ हुवन्ति हवइ हवन्ति पक्षे भवइ. परिहीणविहवो भविउं पभवइ, परिभवइ, सभवइ, क्वचिदन्यदपि उब्भुअइ भत्त,

अविति हु ॥ ४ ॥ ६१ ॥ विद्वर्जे प्रत्यये परे भुवो हु इत्यादेशो वा भवति, हुन्ति, (भवन्) हुन्तो, अवितीति किं होइ,

पृथक्-स्पृष्ट णिव्वड ॥ ४ ॥ ६२ ॥ पृथक् भूते स्पृष्टे च कर्तरि भुवो णिव्वड इत्यादेशो भवति, णिव्वडइ, पृथक् स्पृष्टो वा भवतीत्यर्थ.,

प्रभौ हुप्पो वा ॥ ४ ॥ ६३ ॥ प्रभुकर्तृकस्य भुवो हुप्प इत्यादेशो वा भवति, प्रभुत्व च प्रपूर्वस्यैवार्थः, अंगे च्चिअ न पहुप्पइ, पक्षे प्रभवेइ ।

क्ते हु ॥ ४ ॥ ६४ ॥ भुव. क्तप्रत्यये हुर् आदेशो भवति, हुअं अणुहुअं पहुअं,

---

१ ॥ १७८ ॥ इति ज्नादेशे २ चिजिश्रुहुस्तुलूपूधूगा णो ह्रस्वश्च ॥ ४। २४१ ॥ इति णकारागम. ॥ ३ उवर्णस्यावः ॥ ४ ॥ २३३ ॥ इति अवादेशे । व्यञ्जनाददन्ते । ४ ॥ २३१ ॥ इति अत्वे ।

कृगे: कुण: ॥ ४ ॥ ६५ ॥ कृगे: कुण इत्यादेशो वा भवति, कुणइ करइ,[1]

काणेक्षिते णिआर: ॥ ४ ॥ ६६ ॥ काणेक्षितविषयस्य कृगो णिआर इत्यादेशो वा भवति, णिआरइ, काणेक्षित करोति,

निष्टम्भावष्टम्भे णिट्ठुह-संदाणं ॥ ४ ॥ ६७ ॥ निष्टम्भविषयस्य अवष्टम्भविषयस्य च कृगो यथासख्यं णिट्ठुह संदाण इत्यादेशौ वा भवतः, णिट्ठुहइ निष्टम्भं करोति, सदाणइ अवष्टम्भं करोति,

श्रमे वावम्फ: ॥ ४ ॥ ६८ ॥ श्रमविषयस्य कृगो वावम्फ इत्यादेशो वा भवति, वावम्फइ, श्रमं करोति,

मन्युनौष्ठमालिन्ये णिव्वोल. ॥ ४ ॥ ६९ ॥ मन्युना करणेन यदोष्ठमालिन्य तद्विषयस्य कृगो णिव्वोल इत्यादेशो वा भवति, णिव्वोलइ मन्युना ओष्ठ मलिनं करोति,

शैथिल्य-लम्बने पयल्ल: ॥ ४ ॥ ७० ॥ शैथिल्यविषयस्य लम्बनविषयस्य च कृग पयल्ल इत्यादेशो वा भवति, पयल्लइ शिथिलीभवति लम्बते वा ॥

निष्पाताच्छोटे णीलुञ्छ. ॥४॥७१॥ निष्पतनविषयस्य आच्छोटनविषयस्य च कृगो णीलुञ्छ इत्यादेशो वा भवति, णीलुञ्छइ निष्पतति आच्छोटयति वा ॥

क्षुरे कम्म: ॥४॥७२॥ क्षुरविषयस्य कृग. कम्म इत्यादेशो वा भवति, कम्मइ, क्षुर करोति,

---

१ ऋवर्णस्यार ॥ ४ ॥ २३४ ॥ इति अर् आदेशे, व्यञ्जनाददन्ते ति अत्वे ।

चाटौ गुलल: ॥४॥७३॥ चाटुविषयस्य कृगो गुलल इत्यादेशो वा भवति, गुललइ, चाटु करोतीत्यर्थ ॥

स्मरेर्झर-झूर-भर-भल-लढ-विम्हर-सुमर-पयर पम्हुहा: ॥४॥७४॥ स्मरेरेते नवादेशा वा भवन्ति, झरइ झूरइ भरइ भलइ लढइ विम्हरइ सुमरइ पयरइ पम्हुहइ, सरइ ॥

विस्मु: पम्हुस-विम्हर-वीसरा ॥४॥७५॥ विस्मरतेरेते आदेशा भवन्ति, पम्हुसइ विम्हसइ वीसरइ ॥

व्याहृगे: कोक्क-पोक्कौ ॥४॥७६॥ व्याहरतेरेतावादेशौ वा भवत. । कोक्कइ ह्रस्वत्वे तु कुक्कइ, पोक्कइ, पक्षे वाहरइ ॥

प्रसरे: पयल्लोवेल्लौ ॥४॥७७॥ प्रसरते: पयल्ल उवेल्ल इत्येतावादेशौ वा भवत· पयल्लइ उवेल्लइ, पसरइ ॥

महमहो गन्धे ॥४॥७८॥ प्रसरतेर्गन्धविषये महमह इत्यादेशो वा भवति, महमहइ मालइ, मालईगन्धो पसरइ, गन्ध इति किं, पसरइ ॥

निस्सरेर्णीहर-नील-धाड-वरहाडा: ॥४॥७९॥ निम्सरतेरेते चत्वार आदेशा वा भवन्ति, णीहरइ नीलइ धाडइ वरहाडइ, नीसरइ ॥

जाग्रेर्जग्ग: ॥४॥८०॥ जागर्तेर्जग्ग इत्यादेशो वा भवति जग्गइ, पक्षे जागरइ ॥

व्याप्रेराअड्ड. ॥८१॥ व्याप्रियतेराअड्ड इत्यादेगो वा भवति, आअड्डेइ [१]वावरेइ

संवृगे. साहर साहट्टौ ॥४॥८२॥ संवृणोते. साहर साहट्ट इत्यादेर्गो वा भवत , साहरइ साहट्टइ, संवरइ ॥

---

१ वर्तमाना-पञ्चमी-शतृषु वा ॥३॥१५८॥ इति एत्वे ।

आद्दङेः सन्नामः ॥४॥८३॥ आद्रियतेः सन्नाम इत्यादेशो वा भवति, सन्नामइ आदरइ ॥

प्रहृगे सार ॥४॥८४॥ प्रहरते. सार इत्यादेशो वा भवति। सारइ । पहरइ ॥

अवतरेरोह ओरसौ ॥४॥८५॥ अवतरतेः ओह ओरस इत्यादेशौ वा भवत, ओहइ ओरसइ, ओअरइ[1] ॥

शकेश्चय-तर-तीर-पाराः ।४।८६। शक्नोतेरेते चत्वार आदेशा वा भवन्ति, चयइ तरइ तीरइ पायरइ, सक्कइ, त्यजतेरपि, चयइ हानि करोति, तरतेरपि तीरइ तीरयतेरपितीरइ पारतेरपि पारेइ कर्मसमाप्नोति ॥

फक्कस्थक्कः ॥४॥८७॥ फक्कतेस्थक्क इत्यादेशो भवति, थक्कइ, ॥

श्लाघ सलहः ॥४॥८८॥ श्लाघतेः सलह इत्यादेशो भवति, सलहइ,

खचेर्वेअड. ॥४॥८९॥ खचतेर्वेअड इत्यादेशो वा भवति, वेअडइ खचइ, ॥

पचे सोल्ल पउल्लौ ॥४॥९०॥ पचतेः सोल्ल पउल्ल इत्यादेशो वा भवतः, सोल्लइ पउल्लइ, पयइ ॥

मुचेश्छड्डावहेड-मेल्लोस्सिक्क-रेअव-णिल्लुञ्छ धंसाडा. ॥४॥९१॥ मुञ्चतेरेते सप्तादेशा वा भवन्ति, छड्डइ अवहेडइ मेल्लइ उस्सिक्कइ रेअवइ णिल्लुञ्छइ धसाडइ, पक्षे मुअइ॥

दुःखे णिव्वल ॥४॥९२ दुखविषयस्य मुचेः णिव्वल इत्यादेशो वा भवति, णिव्वलेइ, दुखं मुञ्चतीत्यर्थ. ॥

---

१ अवापोते च ॥१॥ १७२॥ इति अवास्थाने ओदादेशे ।

वञ्चेर्वेहव वेलव जूरवोमच्छा. ॥४॥९३॥ वञ्चतेरेते चत्वार आदेशा वा भवन्ति, वेहवइ वेलवइ जूरवइ उमच्छइ, वंचइ॥

रचेरुग्गहावह-विडविड्डा. ॥४॥९४॥ रचेर्धातोरेते त्रय आदेशा वा भवन्ति, उग्गहइ अवहइ, विडविड्डइ, रयइ ॥

समारचेरुवहत्थ-सारव-समार-केलायाः ॥४॥९५॥ समारचेरेते चत्वार आदेशा वा भवन्ति, उवहत्थइ सारवइ समारइ केलायइ, समारयइ ॥

सिचे. सिञ्चसिम्पौ ॥४॥९६॥ सिञ्चतेरेतावादेशौ वा भवतः ॥ सिञ्चइ सिम्पइ सेअइ ॥

प्रच्छे· पुच्छः ॥४॥९७॥ पृच्छे. पुच्छादेशो भवति, पुच्छइ॥

गर्जेर्बुक्कः ॥४॥९८॥ गर्जतेर्बुक्क इत्यादेशो वा भवति, बुक्कइ गज्जइ ॥

वृषेढिक्कः ॥४॥९९॥ वृषकर्तृकस्य गर्जेर्ढिक्क इत्यादेशो वा भवति ॥ ढिक्कइ, वृषभो गर्जति, ॥

राजेरग्घ-छज्ज-सह-रीर रेहा ॥४॥१००॥ राजेरेते पञ्चादेशा वा भवन्ति, अग्घइ छज्जइ सहइ रीरइ रेहइ, रायइ ॥

मस्जेराउड्ड णिउड्ड बुड्ड खुप्पा. ॥४॥१०१॥ मज्जतेरेते चत्वार आदेशा वा भवन्ति, आउड्डइ णिउड्डइ बुड्डइ खुप्पइ, मज्जइ ॥

पुज्जेरारोल-वमालौ ॥४॥ १०२ ॥ पुज्जेरेतावादेशौ वा भवत·, आरोलइ वमालइ पुज्जइ ॥

लस्जेर्जीहः ॥४॥१०३॥ लज्जतेर्जीह इत्यादेशो वा भवति, जीहइ, लज्जइ ॥

तिजेरोसुक्कः ॥४॥१०४॥ तिजेरोसुक्क इत्यादेशो वा भवति, ओसुक्कइ, तेअणं ॥

मृजेरुग्घुस लुजछ पुंछ पुंस फुस पुस लुह हुल रोसाणाः ॥४॥१०५॥ मृजेरेते नवादेशा वा भवन्ति ॥ उग्घुसइ लुछइ पुछइ पुसइ फुसइ पुसइ लुहइ हुलइ रोसाणइ, पक्षे मज्जइ ॥

भञ्जेर्वेमय–मुसुमूर–मूर–सूर–सूड–विर–पविरञ्ज करञ्ज नीरञ्जा ॥४॥१०६॥ भञ्जेरेते नवादेशा वा भवन्ति, वेमयइ मुसुमूरइ मूरइ सूरइ सूडइ विरइ पविरजइ करञ्जइ नीरञ्जइ भञ्जइ ॥

अनुव्रजेः पडिअग्गः ॥४॥१०७॥ अनुव्रजे पडिअग्ग इत्यादेशो वा भवति, पडिअग्गइ अणुवच्चइ[1] ॥

अर्जेर्विढव ॥४॥१०८॥ अर्जेर्विढव इत्यादेशो वा भवति, विढवइ अज्जइ, ॥

युजो जुञ्जो जुज्ज जुप्पाः ॥४॥१०९॥ युजो जुञ्ज जुज्ज जुप्प इत्यादेशा भवन्ति । जुञ्जइ जुज्जइ जुप्पइ ॥

भुजो भुज्ज जिम जेम कम्माण्ह चमढ समाण चड्डाः ॥४॥११०॥ भुजएतेऽष्टादेशा भवन्ति । भुज्जइ जिमइ जेमइ कम्मइ अण्हइ समाणइ चमढइ चड्डइ ॥

वोपेन कम्मव ॥४॥१११॥ उपेन युक्तस्य भुजेः कम्मव इत्यादेशो वा भवति । कम्मवइ उवहुञ्जइ ॥

घटेर्गढ ॥४॥११२॥ घटतेर्गढ इत्यादेशो वा भवति । गढइ घडइ ॥

---

१ व्रज–नृत–मदाच्च ॥ ४ ॥ २२५ ॥ इति जस्यच्चादेशे ।

समो गल ॥४॥११३॥ सम्पूर्वस्य घटतेर्गल इत्यादेशो वा भवति। सगलइ संघडइ॥

हासेन स्फुटेर्मुर ॥४॥ ११४॥ हासेन कारणेन यः स्फुटिस्तस्य मुरादेशो वा भवति। मुरइ हासेन स्फुटति॥

मण्डेश्चिञ्च चिञ्चअ चिञ्चिल्ल रीड टिविडिक्काः ॥ ४ ॥ ११५ ॥ मण्डेरेते पञ्चादेशा वा भवन्ति। चिञ्चइ चिञ्चअइ चिञ्चिल्लइ रीडइ टिविडिक्कइ, मण्डइ॥

तुडेस्तोड तुट्ट खुट्ट खुडोक्खुडोल्लुक्क णिलुक्कलुक्कोल्लूराः ॥४॥११६॥ तुडेरेते नवादेशा वा भवन्ति। तोडइ तुट्टइ खुट्टइ खुडइ उक्खुडइ उल्लुक्कइ णिलुक्कइ लुक्कइ उल्लूरइ, तुडइ॥

घूर्णो घुल घोल घुम्म पहल्लाः ॥४॥११७॥ घुर्णेरेते चत्वार आदेशा भवन्ति। घुलइ घोलइ घुम्मइ पहल्लइ॥

विवृतेर्ढंसः ॥४॥११८॥ विवृतेर्ढंस इत्यादेशो वा भवति। ढसइ [1] विवट्टइ॥

क्वथेरट्ट ॥ ४॥११९॥ क्वथेरट्ट इत्यादेशो वा भवति। अट्टइ [2] कढइ॥

ग्रन्थो गण्ठः ॥४॥१२०॥ ग्रन्थेर्गण्ठ इत्यादेशो वा भवति। गण्ठइ गण्ठी॥

मन्थेर्घुसलविरोलौ ॥४॥१२१॥ मन्थेर्घुसलविरोल इत्यादेशौ वा भवतः। घुसलइ विरोलइ, मन्थइ॥

---

१ र्त्तस्याधूर्तादौ ॥ २ ॥ ३० ॥ इति र्त्तस्य ट्टादेशः॥ २ **क्वथवर्धां ढः** ॥४॥२२०॥ इति थकारस्य ढकारादेशः॥

ह्लादेरवअच्छ ॥४॥१२२॥ ह्लादतेर्ण्यन्तस्याण्यन्तस्य च अवअच्छ इत्यादेशो भवति । अवअच्छइ (ह्लाते ह्लादयति वा) इकारो ण्यन्तस्यापि परिग्रहार्थम् ॥

नेःसदो मज्जः ॥४॥१२३॥ निपूर्वस्य सदो मज्ज इत्यादेशो भवति । अत्ता एत्थ [1]णुमज्जइ ॥

छिदेर्दुहाव णिच्छल्ल णिज्झोड णिव्वर णिल्लूर लूराः ॥४॥१२४॥ छिदेरेते षडादेशा वा भवन्ति, दुहावइ णिच्छल्लइ णिज्झोडइ णिव्वरइ णिल्लूरइ लूरइ, पक्षे [2]छिन्दइ ॥

आङा ओअन्द-उद्दालौ ॥४॥१२५॥ आङा युक्तस्य छिदेरोअन्द उद्दाल इत्यादेशौ वा भवत , ओअन्दइ उद्दालइ, अच्छिन्दइ ॥

मृदो मल मढ परिहट्ट खड्ड चड्ड मड्ड पन्नाडाः ॥४॥१२६॥ मृद्नातेरेते सप्तादेशा भवन्ति, मलइ मढइ परिहट्टइ खड्डइ चड्डइ मड्डइ पन्नाडइ ॥

स्पन्देश्चुलुचुलः ॥४॥१२७॥ स्पन्देश्चुलुचुल इत्यादेशो वा भवति, चुलुचुलइ फन्दइ ॥

निरः पदेर्वलः ॥४॥१२८॥ नि पूर्वस्य पदेर्वल इत्यादेशो वा भवति, निव्वलइ [3]निप्पज्जइ ॥

विसंवदेर्विअट्ट विलोट्ट फंसाः ॥४॥१२९॥ विसंपूर्वस्य वदेरेते त्रय आदेशा वा भवन्ति । विअट्टइ विलोट्टइ फंसइ विसवयइ ॥

---

१ ह्रिन्योरुत् ॥१॥९४॥ इति ने -इकारस्य उत्वे ॥

२ स्विदां ज्जः ॥४॥२२४॥ इति दकारस्य ज्जकारादेश ॥

३ छिदिभिदोन्दः ॥४॥२१६॥ इति अन्त्यस्य न्द इति आदेशः ॥

शदो झड पक्खोडौ ॥४॥१३०॥ शीयतेरेतावादेशौ भवतः । झडइ पक्खोडइ ॥

आक्रन्देर्णीहरः ॥४॥१३१॥ आक्रन्देर्णीहर इत्यादेशो वा भवति । णीहरइ अक्कन्दइ ॥

खिदेजूर विसूरौ ॥४॥१३२॥ खिदेरेतावादेशौ वा भवतः । जूरइ विसूरइ, खिज्जइ ॥

रुधेरुत्थंघ ॥४॥१३३॥ रुधेरुत्थघ इत्यादेशो वा भवति । उत्थंघइ [१]रुन्धइ ॥

निषेधेर्हक्कः ॥४॥१३४॥ निषेधतेर्हक्क इत्यादेशो वा भवति । हक्कइ निसेहइ ॥

क्रुधेर्जूरः ॥४॥१३५॥ क्रुधेर्जूर इत्यादेशो वा भवति । जूरइ [२]कुज्झइ ॥

जनो जा जम्मौ ॥४॥१३६॥ जायतेर्जा जम्म इत्यादेशौ भवतः, [३]जाअइ जम्मइ ॥

तनेस्तड तड्ड तड्डव विरल्लाः ॥४।१३७॥ तनेरेते चत्वार आदेशा वा भवन्ति, तडइ तड्डइ तड्डवइ विरल्लइ तणइ ॥

तृपस्थिप्पः ॥ ४ ॥ १३८ ॥ तृप्यतेस्थिप्प इत्यादेशो भवति, थिप्पइ, ॥

उपसर्पेरल्लिअः ॥४॥१३९॥ उपपूर्वस्य सृपेः कृतगुणस्य अल्लिअ इत्यादेशो वा भवति, अल्लिअइ उवसप्पइ ॥

---

१ रुधो न्धम्भौ च ॥४॥ २१८ ॥ इति धकारस्य स्थाने न्ध इत्यादेशः ॥
२ युधबुध गृध क्रुध सिध मुहां ज्झः ॥ ४ ॥ २१७ ॥ इति धकारस्थाने ज्झ इत्यादेशः ॥ ३ स्वरादनतो वा ॥ ४ ॥ २४० ॥ इति सूत्रेण अकारः ।

संतपेर्झंखः ॥४॥१४०॥ संतपेर्झंख इत्यादेशो वा भवति । झंखइ संतप्पइ ॥

व्यापेरोअग्गः ॥४॥१४१॥ व्याप्नोतेरोअग्ग इत्यादेशो वा भवति । ओअग्गइ वावेइ ॥

समापेः समाण ॥४॥१४२॥ समाप्नोतेः समाण इत्यादेशो वा भवति । समाणइ समावेइ ॥

क्षिपेर्गलत्थाड्डुक्ख सोल्ल पेल्ल णोल्ल छुन्ह हुल परी घत्ताः ॥४॥१४३॥ क्षिपेरेते नवादेशा वा भवन्ति । गलत्थइ अड्डुक्खइ सोल्लइ पेल्लइ णोल्लइ ह्रस्वत्वे तु णुल्लइ, छुहइ हुलइ परीइ घत्तइ, खिवइ ॥

उत्क्षिपेर्गुलगुञ्छोत्थंघाल्लत्थोब्भुत्तोस्सिक्क हक्खुवा ॥४॥१४४॥ उत्पूर्वस्य क्षिपेरेते षडादेशा वा भवन्ति । गुलगुञ्छइ उत्थंघइ अल्लत्थइ उब्भुत्तइ उस्सिक्कइ हक्खुवइ, उक्खिवइ ॥

आक्षिपेर्णीरवः ॥४॥१४५॥ आङ्पूर्वस्य क्षिपेर्णीरव इत्यादेशो वा भवति । णीरवइ अक्खिवइ ॥

स्वपेः कमवस लिस लोट्टाः ॥४॥१४६॥ स्वपेरेते त्रय आदेशा वा भवन्ति । कमवसइ लिसइ लोट्टइ, सुअइ ॥

वेपेरायम्बायज्झौ ॥४॥१४७॥ वेपेरायम्ब आयज्झ इत्यादेशौ वा भवतः । आयम्बइ आयज्झइ वेवइ ॥

विलपेर्झंख वडवडौ ॥४॥१४८॥ विलपेर्झंख वडवड इत्यादेशौ वा भवतः । झंखइ वडवडइ, विलवइ ॥

लिपो लिम्पः ॥४॥१४९॥ लिम्पतेर्लिम्प इत्यादेशो भवति । लिम्पइ ॥

गुप्येर्विरणडौ ॥४॥१५०॥ गुप्यतेरेतावादेशौ वा भवतः । विरइ णडइ, पक्षे गुप्पइ ॥

कृपोऽवहो णिः ॥४॥१५१॥ कृपेः अवह इत्यादेशो भवति, ण्यन्तेऽपि । अवहावेइ कृपा करोतीत्यर्थः ॥

प्रदीपेस्तेअव सन्दुम सन्धुक्काब्भुत्ताः ॥४॥१५२॥ प्रदीप्यतेरेते चत्वार आदेशा वा भवन्ति, तेअवइ सन्दूमइ सन्धुक्कइ अब्भुत्तइ, [1]पलीवइ ॥

लुभेः संभावः ॥४॥१५३॥ लुभ्यतेः संभाव इत्यादेशो वा भवति । संभावइ लुब्भइ ॥

क्षुभेः खउर पड्डुहौ ॥४॥१५४॥ क्षुभेः खउर पड्डुह इत्यादेशौ वा भवतः । खउरइ, पड्डुहइ, खुब्भइ ॥

आङो रभे रम्भ ढवौ ॥४॥१५५॥ आङः परस्य रभे रम्भढवौ आदेशौ वा भवतः । आरम्भइ आढवइ, आरभइ ॥

उपालम्भेर्झंख पच्चार वेलवाः ॥४॥१५६॥ उपालम्भेरेते त्रय आदेशा वा भवन्ति । झंखइ पच्चारइ वेलवइ, उवालम्भइ ॥

अवेर्जृम्भो जम्भा ॥४॥१५७॥ जृम्भेर्जम्भा इत्यादेशो भवति, वेस्तु न भवति, जम्भाइ जम्भाअइ, अवेरिति किम्, केलिपसरो विअम्भइ ॥

भाराक्रान्ते नमेर्णिसुढः ॥४॥१५८॥ भाराक्रान्ते कर्तरि नमेर्णिसुढ इत्यादेशो वा भवति, णिसुढइ [2]नवइ, भाराक्रान्तो नमतीत्यर्थः ॥

---

१ प्रदीपि दोहदे लः ॥१॥२२१॥ इति सूत्रेण दस्य लत्वे ।

२ रुदनमोर्वः ॥४॥२२६॥ इति मस्य व. ।

विश्रमेर्णिव्वा ॥४॥१५९॥ विश्राम्यतेर्णिव्वा इत्यादेशो वा भवति । णिव्वाइ, वीसमइ ॥

आक्रमेरोहावोत्थारच्छुन्दाः ॥४॥१६०॥ आक्रमते-रेते त्रय आदेशा वा भवन्ति । ओहावइ उत्थारइ छुन्दइ, अक्कम्मइ ॥

भ्रमेष्टिरिटिल्ल ढुण्ढुल्ल ढण्ढल्ल चक्कम भम्मड भमड भमाड तलअण्ट झण्ट झम्प भुम गुम फुम फुस ढुम ढुस परीपरा. ॥४॥१६१॥ भ्रमेरेतेऽष्टादशादेशा वा भवन्ति, टिरिटिल्लइ ढुण्ढुल्लइ ढण्ढल्लइ चक्कम्मइ भम्मडइ भमडइ भमाडइ तलअण्टइ झण्टइ झम्पइ भुमइ गुमइ फुमइ फुसइ ढुमइ ढुसइ परीइ परइ, भमइ ॥

गमेरई अइच्छाणुवज्जावज्जसोक्कुसाक्कुस पच्चड्ड पच्छन्द णिम्मह णी णीण णीलुक्क पदअ रम्भ परिअल्ल बोल परिअल णिरिणास णिवहाव सेहावहरा ॥४॥१६२॥ गमेरेते एकविंशतिरादेशा वा भवन्ति, अईइ अइच्छइ अणुवज्जइ अवज्जसइ उक्कुसइ पच्चड्डइ पच्छन्दइ णिम्महइ णीइ णीणइ णीलुक्कइ पदअइ रम्भइ परिअल्लइ बोलइ परिअलइ णिरिणा-सइ णिवहइ अवसेहइ अवहरइ ॥ पक्षे गच्छइ, हम्मइ णिहम्मइ णीहम्मइ आहम्मइ पहम्मइ, इत्येते तु हम्म गतावित्यस्यैव भविष्यन्ति, ॥

आङा अहिपच्चुअः ॥४॥१६३॥ आङा सहितस्य गमेः अहिपच्चुअ इत्यादेशो वा भवति । अहिपच्चुअइ ॥ पक्षे आगच्छइ ॥

समा अब्भिडः ॥४॥१६४॥ समा युक्तस्य गमेः अब्भिड इत्यादेशो वा भवति । अब्भिडइ सगच्छइ ॥

अभ्याङोम्मत्थः ॥४॥१६५॥ अभ्याङ्भ्या युक्तस्य गमेः उम्मत्थ इत्यादेशो वा भवति, उम्मत्थइ अब्भागच्छइ (अभिमुखमागच्छतीत्यर्थ.) ॥

प्रत्याङा पलोट्ट ॥४॥१६६॥ प्रत्याङ्भ्यां युक्तस्य गमे पलोट्ट इत्यादेशो वा भवति । पलोट्टइ पच्चागच्छइ ॥

शमेः पडिसा-परिसामौ ॥४॥१६७॥ शमेरेतावादेशौ वा भवतः । पडिसाइ परिसामइ ॥ समइ ॥

रमेः संखुड्ड खेड्डोब्भाव-किलिकिञ्च-कोट्टुममोट्टाय णीसर वेल्लाः ॥४॥१६८॥ रमतेरेतेऽष्टादेशा वा भवन्ति । संखुड्डइ खेड्डइ उब्भावइ किलिकिञ्चइ कोट्टुमइ मोट्टायइ णीसरइ वेल्लइ, रमइ ॥

पूरेरग्घाडाग्घवोदधुमाङ्गु–माहिरेमा. ॥४॥१६९॥ पूरेरेते पञ्चादेशा वा भवन्ति । अग्घाडइ अग्घवइ उद्धुमइ अङ्गुमइ अहिरेमइ, पूरइ ॥

त्वरस्तुवर-जअडौ ॥४॥१७०॥ त्वरतेरेतावादेशौ भवत. । तुवरइ जअडइ, तुवरन्तो जअडन्तो, ॥

त्यादिशत्रोस्तूरः ॥४॥१७१॥ त्वरतेस्त्यादौ शतरि च तूर इत्यादेशो भवति । तूरइ तूरन्तो ॥

तुरोऽत्यादौ ॥४॥१७२॥ त्वरोऽत्यादौ तुर आदेशो भवति । तुरिओ तुरन्तो ॥

क्षरः खिर–झर–पज्झर–पच्चड–णिच्चल–णिट्टुआः

॥४॥१७३॥ क्षरेरेते पडादेशा भवन्ति । खिरइ झरइ पज्झ-रइ पच्चडइ णिच्चलइ णिट्टुअइ ॥

उच्छल उत्थल्लः ॥४॥१७४॥ उच्छलते रुत्थल्ल इत्यादेशो भवति । उत्थल्लइ ॥

विगलेस्थिप्प णिट्टुहौ ॥४॥१७५॥ विगलतेरेतावा-देशौ वा भवत, थिप्पइ णिट्टुहइ, विगलइ ॥

दलि वल्योर्विसट्टवम्फौ ॥४॥१७६॥ दलेर्वलेश्च यथासंख्यं विसट्ट वम्फ इत्यादेशौ वा भवत. । विसट्टइ वम्फइ, पक्षे दलइ वलइ ॥

भ्रंशे फिड-फिट्ट-फुड-फुट्ट-चुक्क-भुल्ला: ॥४॥१७७॥ भ्रशेरेते षडादेशा वा भवन्ति। फिडइ फिट्टइ फुडइ फुट्टइ चुक्कइ भुल्लइ, पक्षे भंसइ ॥

नशेर्णिरणासणिवहावसेह-पडिसा-सेहाऽवहरा ॥४॥१७८॥ नशेरेते पडादेशा वा भवन्ति । णिरिणासइ णिवहइ अवसेहइ पडिसाइ सेहइ अवहरइ पक्षे नस्सइ ॥

अवात् काशो वास. ॥४॥१७९॥ अवात्परस्य काशो वास इत्यादेशो भवति । [1]ओवासइ ॥

संदिशेरप्पाहः ॥४॥१८०॥ सदिशतेरप्पाह इत्यादेशो वा भवति । अप्पाहइ, संदिसइ ॥

दृशो-निअच्छ-पेच्छावयच्छावयज्झ-वज्ज-सव्वव-देक्खौअक्खावक्खावअक्ख पुलोअ-पुलअ निआवआस पासाः ॥४॥१८१॥ दृशेरेते पञ्चदशादेशा भवन्ति। निअच्छइ पेच्छइ अवयच्छइ अवयज्झइ वज्जइ सव्ववइ देक्खइ ओअक्खइ अव-

१ अवापोते ॥१॥१७२॥ इति ओत्वम् ।

क्खइ अवअक्खइ पुलोअइ पुलअइ निअइ अवआसइ पासइ, निज्झाअइ इति तु निध्यायतेः स्वरादनतो वा (४।२४०) इति भविष्यति ॥

स्पृश फास फंस फरिस छिव छिहालुंखालिहा ॥४॥१८२॥ स्पृशतेरेते सप्त आदेशा भवन्ति । फासइ फसइ फरिसइ छिवइ छिहइ आलुखइ आलिहइ ॥

प्रविशे रिअ ॥४॥१८३॥ प्रविशे रिअ इत्यादेशो वा भवति ॥ रिअइ पविसइ ॥

प्रान्मृशमुषोर्म्हुस ॥४॥१८४॥ प्रात्परयोर्मृशतिमुष्णात्योर्म्हुस इत्यादेशो भवति । पम्हुसइ, प्रमृशति प्रमुष्णाति वा ॥

पिषेर्णिवह णिरिणास णिरिणज्ज रोंच चड्डाः ॥४॥१८५॥ पिषेरेते पञ्चादेशा वा भवन्ति । णिवहइ णिरिणासइ णिरिणज्जइ रोचइ चड्डइ । पक्षे पीसइ ॥

भषेर्भुक्क ॥४॥१८६॥ भषेर्भुक्क इत्यादेशो वा भवति, वुक्कइ भसइ ॥

कृषे कड्ढ साअड्ढाञ्चाणच्छायञ्छाइञ्छाः ॥४॥१८७॥ कृषेरेते षडादेशा वा भवन्ति । कड्ढइ साअड्ढइ अञ्चइ अणच्छइ अयञ्छइ, पक्षे करिसइ ॥

असावक्खोड ॥४॥१८८॥ असिविषयस्य कृषेरक्खोड इत्यादेशो भवति । अक्खोडेइ, असि कोशात्कर्षतीत्यर्थः ॥

गवेषेर्डुण्ढुल्ल ढण्ढोल गमेस घत्ताः ॥४॥१८९॥ गवेषेरेते चत्वार आदेशा वा भवन्ति । ढुण्ढुल्लइ ढण्ढोलइ गमेसेइ घत्तइ, गवेसइ ॥

श्लिषेः सामग्गावयास परिअन्ताः ॥४॥१९०॥
श्लिष्यतेरेते त्रय आदेशा वा भवन्ति । सामग्गइ अवयासइ परिअन्तइ, सिलेसइ ॥

म्रक्षेश्चोप्पड ॥४॥१९१॥ म्रक्षेश्चोप्पड इत्यादेशो वा भवति । चोप्पडइ, मक्खइ ॥

कांक्षेराहाहिलंघाहिलंख वच्च वम्फ मह सिह-विलुम्पा ॥४॥१९२॥ कांक्षतेरेतेऽष्टादेशा वा भवन्ति । आहइ अहिलंघइ अहिलंखइ वच्चइ वम्फइ महइ सिहइ विलुम्पइ, कंखइ ॥

प्रतीक्षेः सामय विहीर विरमालाः ॥४॥१९३॥
प्रतीक्षेरेते त्रय आदेशा वा भवन्ति । सामयइ विहीरइ विरमालइ, पडिक्खइ ॥

तक्षेस्तच्छ चच्छ रम्प रम्फा. ॥४॥१९४॥ तक्षेरेते चत्वार आदेशा वा भवन्ति । तच्छइ चच्छइ रम्पइ रम्फइ, तक्खइ ॥

विकसेः कोआस वोसट्टौ ॥४॥१९५॥ विकसतेरेतावादेशौ वा भवतः, कोआसइ वोसट्टइ विअसइ ॥

हसेर्गुञ्ज ॥४॥१९६॥ हसेर्गुञ्ज इत्यादेशो वा भवति, गुञ्जइ हसइ ॥

स्रंसेर्ल्हसडिम्भौ ॥४॥१९७॥ स्रंसेरेतावादेशौ वा भवत. । ल्हसइ, परिल्हसइ सलिलवसण, डिम्भइ, संसइ ॥

त्रसेर्डर बोज्ज वज्जा. ॥४॥१९८॥ त्रसेरेते त्रय आदेशा वा भवन्ति । डरइ बोज्जइ वज्जइ, तसइ ॥

न्यसो णिमणुमौ ॥४॥१९९॥ न्यस्यतेरेतावादेशौ भवतः, णिमइ णुमइ ॥

पर्यंस. पलोट्ट पल्लट्ट पल्हत्था ॥४॥२००॥ पर्यस्यतेरेते त्रय आदेशा भवन्ति, पलोट्टइ पल्लट्टइ पल्हत्थइ ॥

निःश्वसेर्झङ्खः ॥४॥२०१॥ निःश्वसेर्झङ्ख इत्यादेशो वा भवति । झंखइ निस्ससइ ॥

उल्लसेरूसलोसुम्भ णिल्लस पुलआअ गुञ्जोल्लारोआः ॥४॥२०२॥ उल्लसेरेते षडादेशा वा भवन्ति । ऊसलइ ऊसुम्भइ णिल्लसइ पुलआअइ गुञ्जोल्लइ ह्रस्वत्वे तु गुञ्जुल्लइ, आरोअइ, उल्लसइ ॥

भासेर्भिस ॥४॥२०३॥ भासेर्भिस इत्यादेशो वा भवति । भिसइ भासइ ॥

ग्रसेर्घिस ॥४॥२०४॥ ग्रसेर्घिस आदेशो वा भवति । घिसइ गसइ ॥

अवाद् गाहेर्वाहः ॥४॥२०५॥ अवात्परस्य गाहेर्वाह इत्यादेशो वा भवति । ओवाहइ, ओगाहइ ॥

आरुहेश्चडवलग्गौ ॥४॥२०६॥ आरुहेरेतावादेशौ वा भवत. ॥ चडइ वलग्गइ आरुहइ ॥

मुहेर्गुम्मगुम्मडौ ॥४॥२०७॥ मुहेरेतावादेशौ वा भवतः । गुम्मइ गुम्मडइ, मुज्झइ ॥

दहेरहिऊलालङ्खौ ॥४॥२०८॥ दहेरेतावादेशौ वा भवतः ॥ अहिऊलइ आलुङ्खइ ॥ डहइ ॥

ग्रहो वल गेण्ह हर पङ्ग निरुवाराहिपच्चुआः ॥४॥२०९॥ ग्रहेरेते षडादेशा भवन्ति, वलइ गेण्हइ हरइ पङ्गइ निरुवारइ अहिपच्चुअइ ॥

क्त्वा तुम् तव्येषु घेत् ॥४॥२१०॥ ग्रह क्त्वा तुम् तव्येषु घेत् इत्यादेशो भवति ॥ 'क्त्वा, घेत्तूण, घेत्तुआण, क्वचिन्न भवति, गेण्हिअ 'तुम्, घेत्तुं 'तव्य, घेत्तव्वं ॥

वचो वोत् ॥४॥२११॥ वक्तेर्वोत् इत्यादेशो भवति क्त्वातुम्तव्येषु ॥ वोत्तूण वोत्तुं वोत्तव्वं ॥

रुद भुज मुचां तोऽन्त्यस्य ॥४॥२१२॥ एषामन्त्यस्य क्त्वातुम्तव्येषु तो भवति, रोत्तूण रोत्तु रोत्तव्व, भोत्तूण भोत्तुं भोत्तव्वं, मोत्तूण मोत्तु मोत्तव्वं ॥

दृशस्तेन ट्ठ ॥४॥२१३॥ दृशोऽन्त्यस्य तकारेण सह द्विरुक्तष्ठकारो भवति, क्त्वातुम्तव्येषु, दट्ठूण दट्ठुं दट्ठव्वं ॥

आ कृगो भूतभविष्यतोश्च ॥४॥२१४॥ कृगोऽन्त्यस्य आ इत्यादेशो भवति, भूतभविष्यत्कालयोश्चकारात् क्त्वातुम् तव्येषु च, [१]काहीअ अकार्षीत् अकरोत् चकार वा, [२]काहिइ, करिष्यति कर्त्ता वा, (क्त्वा) काऊण (तुम्) काउ (तव्य) कायव्व ॥

गमिष्यमासां छ ॥४॥२१५॥ एषामन्त्यस्य छो भवति । गच्छइ इच्छइ जच्छइ अच्छइ ॥

छिदिभिदोन्द ॥४॥२१६॥ अनयोरन्त्यस्य नकाराक्रान्तो दकारो भवति । छिन्दइ भिन्दइ ॥

युध बुध गृध क्रुध सिध मुहां ज्झ ॥४॥२१७॥ एषामन्त्यस्य द्विरुक्तो झो भवति । जुज्झइ बुज्झइ गिज्झइ कुज्झइ सिज्झइ मुज्झइ ॥

---

१ सी ही हीअ भूतार्थस्य ॥३॥१६२॥ इति ही आदेश. । २ भविष्यति हिरादि ॥३॥१६६॥ इति हि आदेश. ।

रुधो न्ध-म्भौ च ॥४॥२१८॥ रुधोऽन्त्यस्य न्ध म्भ इत्येतौ चकारात् ज्झश्च भवति । रुन्धइ रुम्भइ रुज्झइ ॥

सदपतोर्ड. ॥४॥२१९॥ अनयोरन्त्यस्य डो भवति, सडइ पडइ ॥

क्वथवर्धां ढ. ॥४॥२२०॥ अनयोरन्त्यस्य ढो भवति, कढइ वड्ढइ पवयकलयलो, परिवड्ढइ लायण्ण, वहुवचनात् वृधेः कृतगुणस्य वर्धेश्चाविशेषेण ग्रहणम् ॥

वेष्टः ॥४॥२२१॥ वेष्ट वेष्टने इत्यस्य धातोः कगटड ॥२॥७७॥ इत्यादिना षलोपेऽन्त्यस्य ढो भवति। वेढइ वेढिज्जइ ॥

समो ल्लः ॥४॥२२२॥ संपूर्वस्य वेष्टतेरन्त्यस्य द्विरुक्तो लो भवति । सवेल्लइ ॥

वोदः ॥४॥२२३॥ उद परस्य वेष्टतेरन्त्यस्य ल्लो वा भवति । उव्वेल्लइ उव्वेढइ ॥

स्विदां ज्ज ॥४॥२२४॥ स्विदिप्रकाराणाम् अन्त्यस्य द्विरुक्तो जो भवति । सव्वंगसिज्जिरीए, सपज्जइ खिज्जइ, वहुवचनं प्रयोगानुसरणार्थम् ॥

व्रज नृत मदां च्च ॥४॥२२५॥ एषामन्त्यस्य द्विरुक्तश्चो भवति । वच्चइ, नच्चइ, मच्चइ ॥

रुद-नमोर्व. ॥४॥२२६॥ अनयोरन्त्यस्य वो भवति । रुवइ रोवइ नवइ ॥

उद्विजः ॥४॥२२७॥ उद्विजतेरन्त्यस्य वो भवति । उव्विवइ उव्वेवो ॥

खादधावोर्लुक् ॥४॥२२८॥ अनयोरन्त्यस्य लुक् भवति। खाइ, खाअइ, खाहिइ, खाउ, (खाओ) धाइ धाहिइ धाउ, (धाओ) बहुलाधिकारात् वर्तमानाभविष्य द्विध्याद्येकवचने एव भवति, तेनेह न भवति खादन्ति धावन्ति, क्वचिन्न भवति, धावइ पुरओ ॥

सृजोरः ॥४॥२२९॥ सृजो धातोरन्त्यस्य रो भवति, निसिरइ वोसिरइ वोसिरामि ॥

शकादीनां द्वित्वम् ॥४॥२३०॥ शकादीनामन्त्यस्य द्वित्वं भवति, शक् सक्कउ जिम्, जिम्मउ, लग् लग्गउ, मग्, मग्गउ कुप्पइ, नश् नस्सउ, अट् परि अट्टइ, लुट्, पलोट्टइ, तुट्, तुट्टइ नट् नट्टइ , सिव् सिव्वइ इत्यादि ॥

स्फुटि-चलेः ॥४॥२३१॥ अनयोरन्त्यस्य द्वित्वं वा भवति, फुट्टइ फुडइ, चल्लइ चलइ ॥

प्रादेर्मीलेः ॥४॥२३२॥ प्रादेः परस्य मीलेरन्त्यस्य द्वित्वं वा भवति, पमिल्लइ पमीलइ, निमिल्लइ निमीलइ, समिल्लइ संमीलइ, उम्मिल्लइ उम्मीलइ, प्रादेरिति किम्, मीलइ ॥

क्तेनाप्फुण्णादयः ॥४॥२५८॥ अप्फुण्णादयः शब्दा आक्रमिप्रभृतीनां धातूनां स्थाने क्तेन सह वा निपात्यन्ते, अप्फुण्णो, आक्रान्तः, उक्कोसं, उत्कृष्टम्, फुड स्पष्टम्, वोलीणो अतिक्रान्त , वोसट्टो विकसितः, निसुट्टो निपातित , लुग्गो रुग्णः, ल्हिक्को नष्टः, पम्हुट्ठो प्रमृष्ट , प्रमुषितो वा, विढत्तं अर्जितम्, छित्तं स्पृष्टम्, निमिअ स्थापितम्, चक्खिअ आस्वादितम्, लुअं लूनम्, जढं त्यक्तम्, झोसिअ क्षिप्तम्, निच्छूढं उद्वृत्तम्

प्लहत्थ पल्लोट्टं च पर्यस्तम्, हीसमणं हेषितम्, इत्यादि ॥

धातवोऽर्थान्तरेऽपि ॥४॥२५९॥ उक्तादर्थादर्थान्तरेऽपि धातवो वर्त्तंते, बलि. प्राणने पठितः, खादनेऽपि वर्त्तते, वलइ खादति प्राणनं करोति वा, एव कलिः सख्याने संज्ञानेऽपि, कलइ जानाति संख्यान करोति वा। रिगिर्गतौ प्रवेशेऽपि, रिगइ प्रविशति गच्छति वा, काङ्क्षतेर्वम्फ आदेशः प्राकृते, वम्फइ। अस्यार्थः इच्छति प्रच्छति खादति वा, फक्कतेस्थक्क आदेश., थक्कइ नीचां गति करोति, विलम्बयति वा, विलप्युपालम्भयोर्झङ्ख आदेश', झंखइ विलपति उपालभते भाषते वा, एवं पडिवालेइ प्रतीक्षते रक्षति वा, केचित् कैश्चिदुपसर्गैर्नित्यम्, पहरइ युध्यते, सहरइ सवृणोति, अणुहरइ सदृशीभवति, नीहरइ पुरीषोत्सर्गं करोति, विहरइ क्रीडति, आहरइ खादति, पडिहरइ पुनः पूरयति, परिहरइ त्यजति, उवहरइ पूजयति, वाहरइ आह्वयति पवसइ देशान्तरं गच्छति, उच्चुपइ चटति, उल्लुहइ नि सरति, ॥

अथ शौरसेनी

तोदोऽनादौ शौरसेन्यामयुक्तस्य ॥४॥२६०॥

शौरसेन्या भाषायाम् अनादौ अपदादौ वर्त्तमानस्य तकारस्य दकारो भवति, न चेदसौ वर्णान्तरेण संयुक्तो भवति, [१] 'तदो पूरिद पदिञ्जेन मारुदिना मन्तिदो, (एतस्मात्) एदाहि, एदाओ, अनादावित्ति किम्, तधा करेध जधा तस्य राइणो अणुकम्पणीआ भोमि, अयुक्तस्येति किम्, मत्तो, अय्यपुत्तो असभाविद सक्कार, हला सउन्तले ॥

---

१ तत. पूरितप्रतिज्ञेन मारुतिना मन्त्रित. ॥

अधः क्वचित् ॥४॥२६१॥ वर्णान्तरस्याधो वर्तमानस्य तस्य शौरसेन्या दो भवति, क्वचिल्लक्ष्यानुसारेण ॥ महन्दो निच्चिन्दो अन्देउरं ॥

वादेस्तावति ॥४॥२६२॥ शौरसेन्यां तावच्छब्दे आदेस्तकारस्य दो वा भवति, ताव दाव ॥

आ आमन्त्रणे सौ वेनो न ॥४॥२६३॥ शौरसेन्याम् इनो नकारस्य आमन्त्रणे सौपरे आकारो वा भवति, भो कञ्चुइआ? सुहिआ? पक्षे भो तवस्सि, भो मणस्सि ॥

मो वा ॥४॥२६४॥ शौरसेन्याम् आमन्त्रणे सौ परे नकारस्य मो वा भवति, भो राय, भो विअयवम्मं, सुकम्मं भयवं कुसुमाउह भयवं तित्थं पवत्तेह, पक्षे, [१] सयललोअअन्तेआरि भयव हुदवह ॥

भवद्भगवतोः ॥४॥२६५॥ आमन्त्रण इति निवृत्तम् ॥ शौरसेन्याम् अनयो सौ परे नस्य मो भवति, किं एत्थ भवं, हिदएण चिन्तेदि, एदु भवं, समणे भगवं महावीरे, पञ्जलिदो भयवं हुदासणो, क्वचिदन्यत्रापि, मघवं पाग सासणे, संपाइअवं सीसो कयवं करेमि काहं च ॥

न वा र्यो य्यः ॥४॥२६६॥ शौरसेन्या र्यस्य य्यो वा भवति, अय्यउत्त पय्याकुलीकदम्हि, सुय्यो, पक्षे अज्जो पज्जाकुलो, कज्जपरवसो, ॥

थो ध ॥४॥२६७॥ शौरसेन्या थस्य धो वा भवति, कधेदि कहेदि, नाधो नाहो, कधं कहं, राजपधो राजपहो, अपदादावित्येव थामं थेओ ॥

---

१ सकललोकान्ते चारिन् भगवन् हुतवह ॥

इह-हचोर्हस्य ॥४॥२६८॥ इहशब्दसम्बन्धिनो मध्यमस्येत्थाहचौ ॥३॥१४३ इति विहितस्य हचश्च हकारस्य शौरसेन्या धो वा भवति, इध, होध, परित्तायध, पक्षे इह, होइ, परित्तायह ॥

भुवो भः ॥४॥२६९॥ शौरसेन्या भवतेर्हकारस्य भो वा भवति, भोदि होदि, भुवदि हुवदि भवदि हवदि ॥

पुरस्य पुरवः ॥४॥२७०॥ शौरसेन्या पूर्वस्य पुरव इत्यादेशो वा भवति, [1]अपुरव नाडय, [2]अपुरवागद, पक्षे अपुव्व पदं, अपुव्वागदं ॥

क्त्व इय दूणौ ॥४॥२७०॥ शौरसेन्यां क्त्वप्रत्ययस्य इयदूण इत्यादेशौ वा भवतः, भविय भोदूण, हविय होदूण, । पठिय पठिदूण, । रमिय रन्दूण, पक्षे भोत्ता, होत्ता, पठित्ता रन्ता ॥

कृ-गमो डडुअः ॥४॥२७२॥ आभ्या परस्य क्त्वाप्रत्ययस्य डित् अडुअ इत्यादेशो वा भवति, कडुअ, गडुअ पक्षे करिय करिदूण गच्छिय गच्छिदूण ॥

दिरिचेचोः ॥४॥२७३॥ त्यादीनामाद्यत्रयस्याद्यस्यैचेचौ ॥३॥१३९॥ इति विहितयोरिचेचो स्थाने दिर्भवति, । वेति निवृत्तम्, नेदि, देदि, भोदि, होदि, ॥

अतो देश्च ॥४॥२७४॥ अकारात्परयोरिचेचो. स्थाने देश्चकाराद् दिश्च भवति । अच्छदे अच्छदि, गच्छदे गच्छदि, रमदे रमदि, किज्जदे किज्जदि, अत इति किम्, वसुआदि, नेदि, भोदि ॥

---

१ अपूर्वम् नाटकम् । २ अपूर्वम् आगतम् ।

भविष्यति स्सिः ॥४॥२७५॥ शौरसेन्यां भविष्यदर्थे- विहिते प्रत्यये परे स्सिर्भवति, हिस्सा हामपवादः, भविस्सिदि, करिस्सिदि, गच्छिस्सिदि ॥

अतोङसेर्डादो डादू ॥४॥२७६॥ अतः परस्य ङसेः शौरसेन्याम् आदो आदु इत्यादेशौ डितौ वा भवतः, दूरादो य्येव दूरादु ॥

इदानीमो दाणि ॥४॥२७७॥ शौरसेन्यामिदानीम. स्थाने दाणिमित्यादेशो भवति, अनन्तरकरणीयं दाणि आणवेदु अय्यो, व्यत्ययात् प्राकृतेऽपि, अन्न दाणि बोहिं ॥

तस्मात्ताः ॥४॥२७८॥ शौरसेन्यां तस्माच्छब्दस्य ता इत्यादेशो भवति, ता जाव पावेसामि ता अलं एदिणा माणेण ।

मोऽन्त्यात् णो वेदेतो. ॥४॥२७९॥ शौरसेन्याम् अन्त्यान्मकारात् पर इदेतो. परयो. णकारागमो वा भवति, (इकारे) [1]जुत्तं णिम, जुत्तमिणं, सरिस [2]णिमं, सरिसमिण, (एकारे) किं णेदं किमेद, एवं णेदं, एवमेदं ॥

एवार्थे य्येव ॥४॥२८०॥ शौरसेन्याम् एवार्थे य्येव इति निपातः प्रयोक्तव्यः ॥ मम य्येव बम्भणस्स, सो य्येव एसो ॥

हञ्जे चेट्याह्वाने ॥४॥२८१॥ शौरसेन्या चेट्या- ह्वाने हञ्जे इति निपातः प्रयोक्तव्यः । [3]हञ्जे चदुरिके ॥

हीमाणहे विस्मयनिर्वेदे ॥४॥२८२॥ शौरसेन्या हीमाणहे इत्ययं निपातो विस्मये निर्वेदे च प्रयोक्तव्यः 'विस्मये' हीमाणहे जीवन्तवच्छा मे जणणी । 'निर्वेदे' हीमाणहे पलिस्सन्ता

---

१ युक्त इदम् । २ सदृश् इदम् । ३ हे चतुरिके । हे ।

हगे एदेण नियविहिणो दुव्ववसिदेण, ॥

णं नन्वर्थे ॥४॥२८३॥ शौरसेन्यां नन्वर्थे णमिति निपात: प्रयोक्तव्य: । णं अफलोदया, णं [१]अय्यमिस्सेहिं, पुढमं य्येव आणत्तं, णं [२]भवं मे अग्गदो चलदि, आर्षे वाक्यालंकारेऽपि दृश्यते नमोत्थु णं जया ण, तया णं ॥

अम्महे हर्षे ॥४॥२८४॥ शौरसेन्याम् अम्महे इति निपातो हर्षे प्रयोक्तव्य: । अम्महे एआए सुम्मिलाए सुपलिगढिदो भवं ॥

हीही विदूषकस्य ॥४॥२८५॥ शौरसेन्या हीही इति निपातो विदूपकाणा हर्षे द्योत्ये प्रयोक्तव्य. । हीही भो संपन्ना मणोरधा पियवयस्सस्स ॥

शेषं प्राकृतवत् ॥४॥२८६॥ शौरसेन्यामिह प्रकरणे यत्कार्यमुक्तं ततोऽन्यच्छौरसेन्यां प्राकृतवदेव भवति, दीर्घन्हस्वौ मिथोवृत्तौ ॥१॥४॥ इत्यारभ्य तोदोऽनादौ शौरसेन्यामयुक्तस्य ॥४॥२६०॥ एतस्मात्सूत्रात् प्राग् यानि सूत्राणि, एषु यानि उदाहरणानि, तेपु मध्ये अमूनि तदवस्थान्येव शौरसेन्या भवन्ति, अमूनि पुनरेव विधानि भवन्तीति विभाग. प्रतिसूत्र स्वयम् अभ्युह्य दर्शनीय. । यथा अन्दावेदी, जुवदिजणो, मणसिला इत्यादि ॥

अथ मागधी

अत एत्सौ पुंसि मागध्याम् ॥४॥२८७॥ मागध्या भाषायां सौ परे अकारस्य एकारो भवति, पुसि पुल्लिङ्गे, (एष मेप.) एशे मेशे, एशे पुलिशे, (करोमि भदन्त) करेमि भन्ते, अत इति किम्, णिही, कली, गिली, पुसीति किम्, जलं,

---

१ ननु आर्य मिस्सैः । २ ननु भवान् मे अग्रतः चलति ।

यद्यपि 'पोराणमद्धमागह भासा निययं हवइ सुत्तं, इत्यादिना आर्षस्य अर्धमागधभाषानियतत्वम् आम्नायि वृद्धैस्तदपि प्रायोऽस्यैव विधानात्, न वक्ष्यमाणलक्षणस्य, कयरे आगच्छइ, से तारिसे दुक्खसहे जिइन्दिए, इत्यादि ॥

रसोर्लशौ ॥४॥२८८॥ मागध्यां रेफस्य दन्त्यसकारस्य च स्थाने यथासंख्यं लकारस्तालव्यशकारश्च भवति, नले, कले (नरः करः) 'स' हंशे [१]शुदं शोभणं, उभयोः, शालशे पुलिशे ॥

[१]लहश--वश-नमिल-शुल-शिल-विअलिद-मन्दाल-लायिदंहियुगे, । वीलयिणे पक्खालदु मम शयलमवय्य यम्बालं ॥ सषोः संयोगे सोऽग्रीष्मे ॥४॥२८९॥ मागध्यां सकारषकारयोः संयोगे वर्तमानयो. सो भवति, ग्रीष्मशब्दे तु न भवति, ऊर्ध्वलोपाद्यपवादः, 'स' पस्खलदि हस्ती, बुहस्पदी, मस्कली, विस्मये, 'ष' शुस्कदालुं, कस्टं, विस्नुं, शस्यकवले उस्मा, निस्फलं, धनुस्खण्डं, अग्रीष्म इति किम्, गिम्हवाशले ॥

ट्टष्ठयोः स्टः ॥४॥२९०॥ द्विरुक्तस्य टकारस्य षकाराक्रान्तस्य च ठकारस्य मागध्यां सकाराक्रान्तः टकारो भवति, 'ट्ट' पस्टे भस्टालिका भस्टिणी 'ष्ठ' शुस्टु कदं, कोस्टागालं ॥

स्थर्थयोः स्त. ॥४॥२९१॥ स्थर्थ इत्येतयोः स्थाने मागध्यां सकाराक्रान्तः तो भवति, स्थ, उवस्तिदे, 'र्थ' अस्तवदी, शस्तवाहे ॥

जद्ययां यः ॥४॥२९२॥ मागध्यां जद्ययां स्थाने यो भवति, 'ज' याणदि यणवदे अय्युणे दुय्यणे गय्यदि गुणवय्यिदे,

---

१ हसः सुत सोभन सारस पुरुप. ।, २ रहसवशनम्रसुरशिरो विगलित-मन्दारराजिताङ्घ्रियुग, । वीरजिन, प्रक्षालयतु मम सकलमवद्य जम्बालम्।

'द्य' मय्यं अय्य किल विय्याहले आगदे, 'य' यादि यधा शलूवं याणवत्त, यदि, यस्य यत्वविधानम् आदेर्योजः ॥१॥२४५॥ इति बाधनार्थम् ॥

न्यण्यज्ञञ्जां ञ्ञः ॥४॥२९३॥ मागध्यां न्यण्यज्ञञ्ज इत्येतेषा द्विरुक्तो ञो भवति, 'न्य' अहिमञ्ञु कुमाले, अञ्ञदिशं, शामञ्ञगुणे कञ्ञाका वलणं, ण्य, पुञ्ञवन्ते अवम्हञ्ञं पुञ्ञाहं पुञ्ञं, ज्ञ, पञ्ञाविशाले, शव्वञ्ञे अवञ्ञा, ञ्ज, अञ्ञली धणञ्ञाए पञ्ञले ॥

व्रजो जः ॥४॥२९४॥ मागध्या व्रजेर्जकारस्य ञ्जो भवति, यापवादः, वञ्जदि ॥

छस्य श्चोऽनादौ ॥४॥२९५॥ मागध्यामनादौ वर्तमानस्य छस्य तालव्यशकाराक्रान्तश्चो भवति, गश्च, उश्चलदि, पिश्चिले, पुश्चदि, लाक्षणिकस्यापि (आपन्नवत्सलः) [१] आपन्नवश्चले, (तिर्यग् प्रेक्षते) तिरिच्छि पेच्छइ, तिरिश्चिपेस्कदि, अनादाविति किम्, छाले, ॥

क्षस्य ᳵकः ॥४॥२९६॥ मागध्यामनादौ वर्त्तमानस्य क्षस्य ᳵको जिव्हामूलीयो भवति, यᳵके लᳵकशे, अनादावित्येव, खय-यलहला (क्षयजलधरा) ॥

स्कः प्रेक्षाचक्षो ॥४॥२९७॥ मागध्यां प्रेक्षेराचक्षेश्च क्षस्य सकाराक्रान्तः को भवति, जिव्हामूलीयापवादः, पेस्कदि, आचस्कदि ॥

---

१ अत्र 'ह्स्वात् थ्यश्चत्सप्साम् अनिश्चले ॥२॥२१॥ इति त्सस्य स्थाने छा कारादेशः पश्चाच्छकारस्य श्च ॥

तिष्ठश्चिष्ठः ॥४॥२९८॥ मागध्यां स्थाधातोर्यस्तिष्ठ इत्यादेशस्तस्य चिष्ठ इत्यादेशो भवति, चिष्ठदि ॥

अवर्णाद्वा ङसो डाहः ॥४॥२९९॥ मागध्यामवर्णात् परस्य ङसो डिद् आह इत्यादेशो वा भवति, [१]हगे न एलिशाह कम्माह काली, [२]भगदत्तशोणिदाह कुम्भे, पक्षे [३]भीमशेणस्स पश्चादो हिण्डीअदि, हिडिम्बाए घडुक्कय शोकेण उवशमदि, ॥

आमो डाहँ वा ॥४॥३००॥ मागध्यामवर्णात्परस्य आमोऽनुनासिकान्तो डित् आह आदेशो वा भवति, शयणाँ सुहं (स्वजनानां सुखम्) पक्षे नलिन्दाणं (नरीन्द्राणाम्) व्यत्ययात्प्राकृतेऽपि, ताहँ तुम्हाहँ अम्हाहँ सरिआहँ कम्माहँ ॥

अहं वयमोर्हगे ॥४॥३०१॥ मागध्याम् अहंवयमोः स्थाने हगे इत्यादेशो भवति, [४]हगे शक्कावदालतित्तणिवाशी धीवले, हगे शंपत्ता, वयं संप्राप्ताः ॥

शेषं शौरसेनीवत् ॥४॥३०२॥ मागध्यां यदुक्तं ततोऽन्यच्छौरसेनीवत् द्रष्टव्यम् ॥ तत्र 'तो दो नादौ शौरसेन्यामसंयुक्तस्य ॥४॥२६०॥ पविशदु आयुत्ते शामिपशादाय, अधः क्वचित् ॥४॥२६१॥ अले किं एशे महन्दे कलयले ॥ वादेस्तावति ॥४॥२६२॥ मालेध वा धलेध वा, अयं दाव शे आगमे, 'आ आमन्त्र्ये सौवेनो नः ॥४॥२६३॥ भो कञ्चुइआ (भो कञ्चुकिन्) 'मो वा ॥४॥२६४॥ भो रायं ॥ भवद्भगवतोः ॥४॥२६५॥ एदु भव, शमणे भयवं महावीले, भयव कदन्ते ये

---

१ अह न ईदृशस्य कर्मण कारी ॥ २ भगदत्तशोणितस्य कुम्भ ॥
३ भीमसेनस्य पश्चाद् हिण्डति ॥ ४ अह शक्रावतारतीर्थनिवासी धीवरो ॥

अप्पणो प⌒कं उज्झिय पलस्स प⌒कं पमाणी कलेशि ॥ नवार्येय्यः ॥४॥२६६॥ अय्य एशे खु कुमाले मलयकेदू ॥ थोधः ॥४॥२६७॥ अले कुम्भिला कधेहि ॥ इहहचोर्हस्य ॥४॥२६८॥ ओशलध अय्या ओशलध ॥ (अपसरथ आर्य्या अपसरथ) भुवो भः ॥४॥२६९॥ भोदि ॥ पूर्वस्य पुरवः ॥४॥२७०॥ अपुरवे ॥ क्त्व इयदूणो ॥४॥२७१॥ किं खु शोभणे बम्हणे शित्ति कलियलज्जा पलिग्गहे दिण्णे, कृगमो डडुअः ॥४॥२७२॥ कडुअ गडुअ ॥ दिरिचेचोः ॥४॥२७३॥ अमच्च ल⌒कश पिक्खिदु इदो य्येव आगश्चदि ॥ अतो देश्च ॥४॥२७४॥ अले किं एशे महन्दे कन्चयले शुणीअदे ॥ भविष्यति स्सिः ॥४॥२७५॥ ता कहिं न गदे लुहिलप्पिए भविस्सिदि। अतो ङसेर्डादो डादू ॥४॥२७६॥ अहंपि भागुलायणादो मुद्दं पावेमि ॥ इदानीमो दाणिं ॥४॥२७७॥ शुणध दाणिं हगे शक्कावयाल तित्तणिवाशी धीवले ॥ तस्मात्ताः ॥४॥२७८॥ ता याव पविशामि ॥ मोऽन्त्याण्णो वेदेतोः ॥४॥२७९॥ युत्तं णिमं शलिशं णिमं ॥ एवार्थे य्येव ॥४॥२८०॥ मम य्येव ॥ हज्जे चेटचाव्हाने ॥४॥२८१॥ हज्जे चदुरिके ॥ हीमाणहे विस्मयनिर्वेदे ॥४॥२८२॥ विस्मये यथा उदात्तराघवे राक्षस. हीमाणहे जीवन्त वश्चा मे जणणी ॥ निर्वेदे यथा 'विक्रान्तभीमे राक्षस.' हीमाणहे पलिस्सन्ता हगे एदेण नियविहिणो दुव्ववशिदेण ॥ णं नन्वर्थे ॥४॥२८३॥ णं [1] अवशलोपशप्पणीया लायाणो ॥ अम्महे हर्षे ॥४॥२८४॥ अम्महे एयाए शुम्मिलाए शुपलिगढिदे भव ॥ हीही विदूषकस्य ॥४॥

---

[1] ननु अवसरोपसर्पणीया राजान. ॥

२८५॥ हीही संपन्ना मे मणोलधा पियवयस्सस्स ॥ शेषं प्राकृत-वत् ॥४॥२८६॥ मागध्यामपि दीर्घह्रस्वौ मिथोवृत्तौ ॥१॥४॥ इत्यारभ्य तो दोऽनादौऽशौरसेन्यामयुक्तस्य ॥४॥२६०॥ इत्या-स्मात्प्राग् यानि सूत्राणि तेषु यानि उदाहरणानि सन्ति तेषु मध्ये अमूनि तदवस्थान्येव, मागध्या पुनरमूनि एवं विधानि भवन्तीति विभागः स्वयमभ्यूह्य दर्शनीय ॥

अथ पैशाची ॥

ज्ञो ञ्ञः पैशाच्याम् ॥४॥३०३॥ पैशाच्या भाषायां ज्ञस्य ञ्ञो भवति, पञ्ञा सञ्ञा सव्वञ्ञो ञाण विञ्ञाणं ॥

राज्ञो वा चिञ् ॥४॥३०४॥ पैशाच्यां राज्ञ इति शब्दे यो ज्ञस्तस्य चिञ् आदेशो वा भवति, राचिञा लपित, रञ्ञा लपित, राचिञो धनं, रञ्ञो धन, ज्ञ इत्येव राजा ॥

न्यण्ययोर्ञ्ञः ॥४॥३०५॥ पैशाच्यां न्यण्ययो. स्थाने ञ्ञो भवति. कञ्ञका (कन्यका) अभिमञ्ञु पुञ्ञकम्मो पुञ्ञाह ॥

णो नः ॥४॥३०६॥ पैशाच्या णकारस्य नो भवति, गुनगनयुत्तो, गुनेन ॥

तदोस्तः ॥४॥३०७॥ पैशाच्यां तकारदकारयोस्तो भवति, तस्य, भगवती, पव्वती, सत, दस्य, मतनपरवसो, सतन, तामोतरो, पतेसो, वतनक, होतु, रमतु, तकारस्यापि तकार-विधानम् आदेशान्तरबाधनार्थम्, तेन पताका वेतिसो, इत्याद्यपि सिद्ध भवति ॥

लो ळः ॥४॥३०८॥ पैशाच्या लकारस्य ळकारो भवति, सीळं कुळ जळ सळिळ कमळ ॥

शषोः सः ॥४॥३०९॥ पैशाच्यां शषो सो भवति, श, सोभति, सोभनं ससी, सक्को संखो, (ष) विसमो किसानो, न कगचजादिपट् शम्यन्तसूत्रोक्तम् ॥४॥३२४॥ इत्यस्य बाध-कस्य बाधनार्थोऽयं योगः ॥

हृदये यस्य पः ॥४॥३१०॥ पैशाच्यां हृदयशब्दे यस्य पो भवति, हितपकं, किंपि किंपि हितपके अत्थं चिन्तयमानी ॥

टोस्तुर्वा ॥४॥३११॥ पैशाच्यां टोः स्थाने तुर्वा भवति, कुतुम्बकं कुटुम्बकं ॥

क्त्वस्तूनः ॥४॥३१२॥ पैशाच्यां क्त्वाप्रत्ययस्य स्थाने तून इत्यादेशो भवति, गन्तून, रन्तून, हसितून, कढितून, कधितून ॥

द्धूनत्थूनौ ष्ट्वः ॥४॥३१३॥ पैशाच्यां ष्ट्वा इत्यस्य स्थाने द्धून त्थून इत्यादेशौ भवतः, पूर्वस्यापवादः, नद्धून, नत्थून तद्धून, तत्थून (नष्ट्वा दृष्ट्वा इत्यर्थः) ॥

र्यस्नष्टां रिय-सिन-सटाः क्वचित् ॥४॥३१४॥ पैशाच्यां र्यस्नष्टां स्थाने यथा संख्यं रिय सिन सट इत्यादेशाः क्वचिद् भवन्ति, भार्या, भारिया, स्नातम्, सिनातं, कष्टम्, कसटं, क्वचिदिति किम्, सुज्जो, सुनुसा तिट्ठो ॥

क्यस्येय्यः ॥४॥३१५॥ पैशाच्यां क्यप्रत्यय इय्य इत्यादेशो भवति, गिय्यते दिय्यते रमिय्यते पढिय्यते, ॥

कृगो डीरः ॥४॥३१६॥ पैशाच्यां कृगः परस्य क्यस्य स्थाने डीर इत्यादेशो भवति, पुधुमतसने सव्वस्स य्येव सम्मान कीरते ॥

यादृशादेर्दुस्तिः ॥४॥३१७॥ पैशाच्यां यादृश इत्येवमादीनां दृ इत्यस्य स्थाने तिरित्यादेशो भवति, यातिसो,

तातिसो केतिसो, एतिसो, भवातिसो, अञ्आतिसो युम्हातिसो अम्हातिसो ॥

इचेचः ॥४॥३१८॥ पैशाच्याम् इचेचोः स्थाने तिरादेशो भवति, वसुआति, भोति, नेति, तेति, ॥

आत्तेश्च ॥४॥३१९॥ पैशाच्यामकारात्परयोः इचेचोः स्थाने तेश्चकारात् तिश्चादेशो भवति, लपते लपति, अच्छदे अच्छति, गच्छते गच्छति, रमते रमति, आदिति किम् होति नेति ॥

भविष्यत्येय्य एव ॥४॥३२०॥ पैशाच्याम् इचेचोः स्थाने भविष्यति एय्य एव भवति, न तु स्सिः ॥ तं तद्धून चिंतित रञ्आ का एसा हुवेय्य ॥

अतो ङसेर्डातो डातु ॥४॥३२१॥ पैशाच्यामकारात्परस्य ङसेर्डितौ आतो आतु इत्यादेशौ भवतः, ताव च तीए दूरातो य्येव तिट्ठो, तूरातु, तुमातो तुमातु, ममातो ममातु ॥

तदिदमोष्टा नेन स्त्रियां तु नाए ॥४॥३२२॥ पैशाच्यां तदिदमोः स्थाने टाप्रत्ययेन सह नेन इत्यादेशो भवति, स्त्रीलिङ्गे तु नाए इत्यादेशो भवति, तत्थ च नेन कतसिनानेन स्त्रियाम्, पूजितो च नाए पातग्गकुसुमप्पतानेन, टेति किम् एवं चिन्तयतो गतो सो ताए समीपं ॥

शेषं शौरसेनीवत् ॥४॥३२३॥ पैशाच्यां यदुक्तं ततोऽन्यच्छेषं पैशाच्या शौरसेनीवत् भवति ॥ अध ससरीरो भयवं मकरधजो, एत्थ परिब्भमन्तो हुवेय्य, एव विधाए भगवतीए कध तापसवेसगहनं कतं, एतिस अतिट्ठपुरवं महाधनं तद्धून। भयव यदि मं वरं पयच्छसि, राज च दाव लोक, ताव च तीए

दूरातो य्येव तिट्ठो सो आगच्छमानो राजा ॥

न कगचजादिषट् शम्यन्तसूत्रोक्तम् ॥४॥३२४॥ पैशाच्यां कगचजतदपयवां प्रायो लुक् ॥१॥१७७॥ इत्यारभ्य षट्शमीशावसुधासप्तपर्णेष्वादेश्छः ॥१॥२६५॥ इति यावद्यानि सूत्राणि तैर्यदुक्तं कार्यं तन्न भवति, मकरकेतू, सगरपुत्तवचणं, विजयसेनेन लपित, मतनं पाप आयुधं, तेवरो, एवमन्यसूत्राणा-मपि उदाहरणानि द्रष्टव्यानि ॥

अथ चूलिका पैशाची

चूलिकापैशाचिके तृतीयतुर्ययोराद्यद्वितीयौ ॥४॥३२५॥ चूलिकापैशाचिके वर्गाणां तृतीयतुर्ययोः स्थाने यथासंख्यम् आद्य-द्वितीयौ भवतः' (नगरम्) नकरं (मार्गणः) मक्कनो (गिरि-तटम्) किरितटम्' मेघः' मेखो 'व्याघ्रः' वक्खो 'घर्मः' खम्मो, 'राजा' राचा' 'जर्जरम्' चच्चरं, 'जीमूतः' चीमूतो, 'निर्झरः निच्छरो 'झर्झरः' छच्छरो, 'तडागम्' तटाकं, 'मण्डलम्' मण्टलं 'डमरूकः' टमरुको, 'गाढम्' काठं 'षण्ढः' सण्ठो 'ढक्का' ठक्का 'मदन.' मतनो 'कन्दर्पः' कन्तप्पो 'दामोदर.' तामोतरो, मधु-रम्, मथुरं, बान्धवः, पन्थवो, 'धूली, थूली, 'वालकः, पालको 'रभसः' रफसो 'रम्भा' रम्फा, 'भगवती' फकवती, 'नियोजि-तम्, नियोचितं, क्वचिल्लाक्षिणकस्यापि पडिमा इत्यस्य स्थाने पटिमा, दाढा इत्यस्य स्थाने ताठा ॥

रस्य लो वा ॥४॥३२६॥ चूलिका पैशाचिके रस्य स्थाने लो वा भवति, ॥

[1]पनमथ पनयप्पकुप्पितगोली-चलनग्ग-लग्ग-पतिबिम्बं ।
तससु नखतप्पनेसुं एकातस तनुथलं लुद्दं ।१।
[2]नच्चन्तस्स य लीलापातुक्खेवेन कम्पिता वसुधा ।
उच्छल्लन्ति समुद्दा सइला निपतन्ति तं हलं नमथ ॥

नादियुज्योरन्येषाम् ॥४॥३२७॥ चूलिकापैशाचिकेऽपि अन्येषामाचार्याणां मतेन तृतीयतुर्ययोरादौ वर्तमानयोर्युजि धातौ च आद्यद्वितीयौ न भवतः ॥ 'गतिः' गती 'धर्मः' धम्मो, 'जीमूतः' जीमूतो, 'झर्झरः' झच्छरो, 'डमरुकः' डमरुको, 'ढक्का' ढक्का, 'दामोदरः' दामोतरो 'वालकः' बाळको 'भगवती, भकवती, 'नियोजितम्' नियोजितं ॥

शेषं प्रागवत् ॥४॥३२८॥ चूलिकापैशाचिके तृतीय–तुर्ययोरित्यादि यदुक्तं ततोऽन्यच्छेषं प्राक्तनपैशाचिकवत् भवति । नकरं मक्कनो अनयोर्नो णत्वं न भवति, णस्य च नत्वं स्यात् एवमन्यदपि ॥

अथ अपभ्रंशभाषा ॥

स्वराणां स्वरा प्रायोऽपभ्रंशे ॥४॥३२९॥ अपभ्रंशे स्वराणां स्थाने प्राय. स्वरा भवन्ति, कच्चु काच्च, वेण वीण, वाह बाहा बाहु, पट्ठि पिट्ठि पुट्ठि, तणु तिणु तुणु, सुकिदु सुकिओ सुकृदु, किन्नओ किलिन्नओ, लिह लीह लेह, गउरि गोरि, प्रायो

१ प्रणमथ प्रणयप्रकुपितगौरीचरणाग्रलग्नप्रतिविम्बम् ।
दशसु नखदर्पणेष्वेकादशतनुधर रुद्रम् ॥१॥
२ नृत्यतश्च लीलया पादोत्क्षेपेण कम्पिता वसुधा ।
उच्छलन्ति समुद्रा. शैला निपतन्ति तं हर नमथ ॥२॥

ग्रहणाद्यस्य अपभ्रंशे विशेषो वक्ष्यते तस्यापि क्वचित्प्राकृतवत् शौरसेनीवच्च कार्यं भवति, ॥

स्यादौ दीर्घह्रस्वौ ॥४॥३३०॥ अपभ्रंशे नाम्नोऽन्त्यस्वरस्य दीर्घह्रस्वौ स्यादौ प्रायो भवतः ॥

[1] 'ढोल्ला सामला धण चम्पा वण्णी,
णाइ सुवण्णरेह कसवट्टइ दिण्णी,

आमन्त्ये ॥

[2] ढोला मइं तुहुं वारिया मा कुरु दीहा माणु,
निद्दए गमिही रत्तडी दडवड होइ विहाणु ॥

स्त्रियाम् ॥

[3] बिट्टीए मइ भणिय तुहं मा कुरु वंकी दिट्ठि,
पुत्ति सकण्णी भल्लि जिवँ मारइ हिअइ पइट्ठि ॥

जसि ॥

[4] एइ ति घोडा एह थली एइ ति निसिआ खग्ग ॥
एत्थु मुणीसिम जाणीअइ जो नवि वालइ वग्ग ॥

एवं विभक्त्यन्तरेष्वपि उदाहार्यम् ॥

स्यमोरस्योत् ॥४॥३३१॥ अपभ्रंशे अकारस्य स्यमोः परयो. उकारो भवति, ॥

नायक श्यामल प्रिया चम्पावर्णा, यथा सुवर्णरेखा कषपट्टके दत्ता ॥ २ नायक ? मया त्व वारितो मा कुरु दीर्घ मानम् । निद्रया गमिष्यति रात्रि', शीघ्र भवति प्रभातम् ॥ ३ पुत्रिके? मया भणिता त्व मा कुरु वक्रा दृष्टिम्, पुत्रि ? सकर्णाभल्लिर्यथा मारयति हृदये प्रविष्टा ॥ ४ एते ते घोटका एषा स्थली, एते, ते निशिता. खड्गा , अत्र मनुष्यत्वं ज्ञायते यो नापि घालयति वल्गाम् ॥

[१]दहमुह भुवण भयंकरु तोसिअ
संकरु णिग्गउ रहवरि चडिअउ ॥
चउ मुहु छंमुहु झाइवि एक्कहिं
लाइवि णावइ दइवें घडिअउ ॥

सौ पुंस्योद्वा ॥४॥३३२॥ अपभ्रंशे पुल्लिङ्गे वर्तमानस्य नाम्नोऽकारस्य सौ परे ओकारो वा भवति, ॥

[२]अगलिह नेह निवट्टाहं जोअण लक्खुवि जाउ ॥
वरिससएण वि जो मिलइ सहि सोक्खहं सो ठाउ ॥

पुंसीति किम्, ॥

[३]अङ्गहिं अङ्गु न मिलिउ हलि अहरें अहरु न पत्तु ॥
पिअ जोअन्तिहे मुहकमलु एम्वइ सुरउ समत्तु ॥

एट्टि ॥४॥३३३॥ अपभ्रंशे अकारस्य टायाम् एकारो भवति, ॥

[४]जे महु दिण्णा दिअहडा दइएणं पवसन्तेण ॥
ताण गणन्तिए अङ्गुलिउ जज्जरिआउ नहेण ॥

ङिनेच्च ॥४॥३३४॥ अपभ्रंशे अकारस्य ङिना सह इकार एकारश्च भवति, ॥

[५]सायरु उप्परि तणु धरइ तलि घल्लइ रयणाइं ॥

---

१ दशमुखो भुवनभयङ्करस्तो-पितशङ्करो निर्गतो रथवरे रथोपरि आसुह चटित, चतुर्मुख षण्मुखं ध्यात्वैकस्मिन्लँगित्वा ज्ञायते दैवेन घटितः॥

२ अगलितस्नेहनिवृत्ताना योजनलक्षमपि यातु (यात्वा) ॥ वर्षशतेनापि यो मिलति सखि ? सौख्यानां स स्थानम् ॥ ३ अङ्गैरङ्ग न मिलित सखि? अधरेणाऽधर न प्राप्तम्, प्रियस्य पश्यन्त्या मुखकमलमेवमेव सुरत समाप्तम् ॥ ४ ॥ ये मम दत्ता दिवसा दयितेन प्रवसता, तान् गणयन्त्या अङ्गुल्यो जर्जरिता नखेन ॥ ५ सागर उपरि तृण धरति तले क्षिपति रत्नानि, स्वामी सुभृत्यमपि परिहरति समानयति खलान् ॥

सामि सुभिच्चु वि परिहरइ सम्माणेइ खलाइं ॥

तले घल्लइ ॥

भिस्येद्वा ॥४॥३३५॥ अपभ्रंशे अकारस्य भिसि परे एकारो वा भवति, ॥

[1]**गुणहिं न संपइ कित्ति पर फल लिहिआ भुञ्जन्ति ॥**
केसरि न लहइ बोडिअवि गय लक्खेहिं घेप्पन्ति ॥

ङसेर्हेहू ॥४॥३३६॥ अस्तेति पञ्चम्यन्तं विपरिणम्यते ॥ अपभ्रंशे अकारात्परस्य ङसेर्हेहु इत्यादेशौ भवतः, ॥

[2]**वच्छहे गिण्हइ फलइं जणु कडुपल्लव वज्जेइ ॥**
तो वि महद्दुमु सुअणु जिवँ ते उच्चङ्गि धरेइ ॥

वच्छहु गिण्हइ ॥

भ्यसो हुं ॥४॥३३७॥ अपभ्रंशे अकारात्परस्य भ्यसः पञ्चमीवहुवचनस्य हुं इत्यादेशो भवति ॥

[3]**दूरुड्डाणें पडिउ खलु अप्पणु जणु मारेइ ॥**
जिह गिरिसिङ्गहुं पडिअ सिल अन्नु वि चूरु करेइ ॥

ङसः सुहोस्सवः ॥४॥३३८॥ अपभ्रंशे अकारात्परस्य ङसः स्थाने सु हो स्सु इति त्रय आदेशा भवन्ति, ॥

[4]**जो गुण गोवइ अप्पणा पयडा करइ परस्सु ॥**

---

१ गुणैर्न सम्पद कीर्त्तिः पर फलानि लिखितानि भुञ्जन्ति, केसरी न लभते कपर्दिकामपि गजा लक्षैर्गृह्यन्ते ॥ २ वृक्षाद् गृह्णाति फलानि जनो कटुपल्लवान् वर्जयति, ततोऽपि महाद्रुम सुजन इव तान् उत्सङ्गे धरति ॥ ३ दूरोड्डीनेन पतित खल आत्मान जनं मारयति, यथा गिरिश्रृङ्गेभ्यः पतिता शिला (खम्) अन्यमपि चूर्णीकरोति ॥ ४ यो गुणान् गोपयति आत्मन. प्रकटीकरोति परस्य, तस्याहं कलियुगे दुर्लभस्य वलि क्रिये सुजनस्य ॥

तसु हउं कलिजुगि दुल्लहहो बलि किज्जउं सुअणस्सु ॥

आमो हं ॥४॥३३९॥ अपभ्रंशे अकारात्परस्य आमो हम् इत्यादेशो भवति, ॥

[१] तणहं तइज्जी भङ्गि नवि तें अवडयडि वसन्ति ॥
अह जणु लग्गि वि उत्तरइ अह सह सइं मज्जन्ति ॥

हुं चेदुद्भ्याम् ॥४॥३४०॥ अपभ्रंशे इकारोकाराभ्यां परस्यामो हुं हं च इत्यादेशो भवतः ॥

[२] दइवु घडावइ वणि तरुहुं सउणिहं पक्क फलाइं ॥
सो वरि सुक्खु पइट्ठ णवि कण्णहिं खल वयणाइं ॥

प्रायोधिकारात्क्वचित्सुपोऽपि हुं ॥

[३] धवलु विसूरइ सामिअहो गरुआ भरु पिक्खेवि ॥
हउं कि न जुत्तउ दुहुं दिसिहिं खण्डइं दोण्णि करेवि ॥

ङसिभ्यस्ङीनां हे हुं हयः ॥४॥३४१॥ अपभ्रंशे इदुद्भ्यां परेषां ङसिभ्यस्ङि इत्येतेषां यथासख्यं हे हुं हि इत्येते त्रय आदेशाः भवन्ति, ङसेर्हे ॥

[४] गिरिहे सिलायलु तरुहे फलु घेप्पइ नीसावन्नु ॥
घरु मेल्लेप्पिणु माणुसहं तो वि न रुच्चइ रन्नु ॥

भ्यसो हुं ॥

---

१ तृणाना तृतीया भङ्गी नापि तेन अवटतटे वसन्ति, अथ जनो लगि-त्वापि उतरति अथ सह स्वय मज्जन्ति ॥ २ दैव घटयति वने तरूणा शकु-नीनां पक्वफलानि, तद् वर सुख प्रविष्ट नापि कर्णयो. खलवचनानि ॥ ३ धवलो विषीदति स्वामिनो गुरुभार प्रेक्ष्य ॥ अह किं न योजितो द्वयोर्दिशोः खण्डयित्वा द्वौ कृत्वा ॥ ४ गिरे शिलातल तरो. फल गृह्णाति नि.सामान्यः गृहं मुक्त्वा मनुष्येभ्यस्ततोऽपि न रोचतेऽरण्यम् ॥

[१]तरुहुं वि वक्कलु फलु मुणि वि परिहणु असणु लहन्ति ॥

सामिहुं एत्तिउ अग्गलउं आयरु भिच्चु गृहन्ति ॥

ङेर्हि, [२]अह विरलपहाउ जि कलिहि धम्मु ॥

आट्टो णानुस्वारौ ॥४॥३४२॥ अपभ्रंशे अकारात्परस्य टावचनस्य णानुस्वारावादेशौ भवतः, [३] दइएं पवसन्तेण ॥

एँ चेदुतः ॥४॥३४३॥ अपभ्रंशे इकारोकाराभ्यां परस्य टावचनस्य एँ चकारात् णानुस्वारौ च भवन्ति, एँ

[४]अग्गिएं उण्हउ होइ जगु वारिएं सीअलु तेवँ ॥

जो पुणु अग्गि सीयला तसु उण्हत्तणु केवँ ॥

णानुस्वारौ ॥

[५]विप्पिअ आरउ जइ वि पिउ तो वि तं आणाहि अज्जु ॥

अग्गिण दड्ढा जइवि घरु तो तें अग्गि कज्जु ॥

एवमुकारादपि उदाहार्यम् ॥

स्यम् जस् शसां लुक् ॥४॥३४४॥ अपभ्रंशे सि अम् जस् शस् इत्येतेषां लोपो भवति, एइ ते घोडा एह थलि, इत्यादि अत्र स्यम्जसां लोपः ॥

[६]जिवँ जिवँ वंकिम लोअणहं णिरु सामलि सिक्खेइ ॥

---

१ तरुभ्योऽपि वल्कलं फलं मुनयोऽपि परिधानमशनं लभन्ते, स्वामिभ्य इयदधिकमादरं भृत्या गृह्णन्ति ॥ २ अथ विरलप्रभाव एव कलौ धर्मः ॥ ३ दयितेन प्रवसता ॥ ४ अग्निनोष्णं भवति जगद् वारिणा शीतलं तथैव, यः पुनरग्निनापि शीतलस्तस्योष्णत्वं कथम् ॥ ५ विप्रियकारको यद्यपि प्रियस्तथापि तमानय आर्ये ?, अग्निना दग्धं यद्यपि गृहं ततोऽपि तेनाग्निना कार्यम् ॥ ६ यथा यथा वक्रत्वं लोचनानां निश्चितं श्यामला शिक्षते, तथा तथा मन्मथो निजशरान् खरप्रस्तरे तीक्ष्णयति ॥

तिवँ तिवँ वम्महु निअसरा लरपत्थरि तिक्खेइ ॥

अत्र स्यम्शसां लोपः ॥

षष्ठ्याः ॥४॥३४५॥ अपभ्रंशे षष्ठ्या विभक्त्या. प्रायो लुक् भवति, ॥

[1] **संगरसएहिं जु वण्णिअइ देक्खु अम्हारा कन्तु ॥**

अइमत्तहं चत्तङ्कुसहं गय कुम्भइं दारेन्तु ॥

पृथग् योगो लक्ष्यानुसारार्थः ॥

आमन्त्र्ये जसो होः ॥४॥३४६॥ अपभ्रंशे आमन्त्र्येऽर्थे वर्तमानान्नाम्नः परस्य जसो हो इत्यादेशो भवति, लोपापवादः,

[2]तरुणिहो मुणिउ मइं करहुं म अप्पहो घाउ ॥

भिस्सुपोर्हिम् ॥४॥३४७॥ अपभ्रंशे भिस्सुपोः स्थाने हि इत्यादेशो भवति, गुणहिं न संपइ कित्ति पर, सुप्, [3]भाईरहि जिवँ भारइ मग्गेहिं तिहिं पि पयट्टइ ॥

स्त्रियां जश्शसोरुदोत् ॥४॥३४८॥ अपभ्रंशे स्त्रियां वर्त्तमानान्नाम्न. परस्य जसः शसश्च प्रत्येकमुदोतौ आदेशौ भवतः ॥ लोपापवादौ, 'जसः' अंगुलिउ जज्जरियाओ नहेण, शस., [4]सुन्दरसव्वङ्गाउ विलासिणीओ, पेच्छन्ताण ॥ वचनभेदान्न यथासख्यम् ॥

ट ए ॥४॥३४९॥ अपभ्रंशे स्त्रिया वर्तमानान्नाम्नः

---

१ सगरशतेपु यो वर्ण्यते पश्य मदीय कान्तम् ॥ अतिमत्ताना त्यक्ताङ्कुशानां गजाना कुम्भान् दारयन्तम् ॥ २ हे तरुण्यः ज्ञात्वा मा कुरुत मा आत्मनो घातम् ॥ ३ भागीरथी यथा भारते मार्गेपु त्रिष्वपि प्रवर्त्तते ॥ ४ सुन्दरसर्वाङ्गिन्यो विलासिन्यः पश्यताम् ॥

परस्याण्टाया: स्थाने ए इत्यादेशो भवति ॥

[१] **निअ मुह करहिं वि मुद्ध कर अन्धारइ पडिपेक्खइ ॥**
ससिमण्डलचन्दिमए पुणु काइं न दूरे देक्खइ ॥

[२] जहिं मरगयकन्तिए संवलिअं ॥

ङस्ङस्योर्हे ॥४॥३५०॥ अपभ्रंशे स्त्रियां वर्तमाना-न्नाम्न: परयोर्ङस्ङसि इत्येतयोर्हे इत्यादेशो भवति, ङस:, ॥

[३] **तुच्छमज्झहे तुच्छ जम्पिरहे ॥**
तुच्छच्छरोमावलिहे तुच्छराय तुच्छयरहासहे ॥
पिअ वयणु अलहन्तिअहे तुच्छकायवम्मह निवासहे ॥

[४] **अन्नु जु तुच्छउं तहे धणहे तं अक्खणहे न जाइ ॥**
कटरि थणंतरु मुद्धडहे जें मणु विच्चि ण माइ ॥

ङसे:, ॥

[५] **फोडेन्ति जे हियडउं अप्पणउं ताहं पराई कवण घण ।**
रक्खेज्जहु लोअहो अप्पणा बालहे जाया विसम थण ॥

भ्यसामोर्हु: ॥४॥३५१॥ अपभ्रंशे स्त्रियां वर्तमानान्नाम्न: परस्य भ्यस आमश्च हु इत्यादेशो भवति ॥

---

१ निजमुखकरैरपि मुग्धा करम् अन्धकारे प्रतिप्रेक्षते ॥ शशिमण्डल-चन्द्रिकया पुन कथ न दूरे पश्यति ॥ २ यथा मरकतकान्त्या सवलितम् ॥ ३ तुच्छमध्यायास्तुच्छजल्पनशीलायास्तुच्छाच्छरोमावल्यास्तुच्छरागतुच्छतर-हासाया. प्रियवचनम् अलभमानायास्तुच्छकायमन्मथनिवासाया ॥ १ ॥ ४ अन्यद्यत्तुच्छ तस्या नायिकायास्तदाख्यातु न यात्याश्चर्य। स्तनान्तर मुग्धाया येन मनोवर्त्मनि न माति ॥२॥ युग्मम् ॥ ५ स्फोटयन्तौ यौ हृदयमात्मीय तयो. परकीया का घृणा ॥ रक्षत लोका! आत्मान बालाया जातौ विषमौ स्तनौ ॥

[1]भल्ला हुआ जु मारिआ बहिणि महारा कन्तु ।
लज्जेज्जं तु वयंसिअहु जइ भग्गा घरु एन्तु ॥
वयस्याभ्यो वयास्यानां वेत्यर्थः ॥

ङेर्हि ॥४॥३५२॥ अपभ्रंशे स्त्रियां वर्तमानान्नाम्नः परस्य ङेः सप्तम्येकवचनस्य हि इत्यादेशो भवति ॥

[2]वायसु उड्डावन्तिअए पिउ दिट्ठउ सहसत्ति ।
अद्धा वलया महिहि गय अद्धा फुट्ट तडत्ति ॥

क्लीबे जश्शसोरिं ॥४॥३५३॥ अपभ्रंशे क्लीबे वर्तमानान्नाम्नः परयोः जश्शसोः इम् इत्यादेशो भवति ॥

[3]कमलइं मेल्लवि अलिउलइं करिगण्डाइं महन्ति ॥
असुलहमेच्छण जाहं भलि ते णवि दूर गणन्ति ॥

कान्तस्यात उं स्यमोः ॥४॥३५४॥ अपभ्रंशे क्लीबे वर्तमानस्य ककारान्तस्य नाम्नो योऽकारस्तस्य स्यमोः परयोः उं इत्यादेशो भवति, अन्नु जु तुच्छउं तहे धणहे ॥

[4]भग्गउं देक्खिवि निअयवलु बलु पसरिअउं परस्सु ।
उम्मिल्लइ ससिरेह जिवं करि करवालु पियस्सु ॥

सर्वादेर्ङसेर्हां ॥४॥३५५॥ अपभ्रंशे सर्वादिरकारान्तात्

---

१ भव्य भूत यन्मारितो भगिनि । मदीय. कान्तः, लज्जेय तु वयस्याभ्यो यदि भग्नो गृहमैष्यत् ॥ २ वायसमुड्डाययन्त्या प्रियो दृष्ट सहसेति, अर्द्धं वलयाना मह्या गता अर्द्धं स्फुट्ट तडदिति, तडदिति कृत्वा स्फुटित इत्यर्थं ॥ ३ कमलानि मुक्त्वा अलिकुलानि करिगण्डानि काङ्क्षन्ति, असुलभमेषणं येषा कदाग्रहस्ते नापि दूर गणयन्ति ॥ ४ भग्नकं दृष्ट्वा निजवल वल प्रसृतकं परस्य ॥ शोभते शशिरेखा यथा करे करवाल प्रियस्य ॥

परस्य ङसेः हां इत्यादेशो भवति, [१]जहा होन्तउ आगदो, [२]तहां होन्तउ आगदो, कहा होन्तउ आगओ, ।।

किमो डिहे वा ।।४।।३५६।। अपभ्रंशे किमोऽकारान्तात् परस्य ङसेर्डिहे इत्यादेशो वा भवति ।।

[४]जइ तहो तुट्टउ नेहडा मइं सहुं नवि तिलतार ।
तं किहे वङ्केहिं लोअणेहिं जोइज्जउं सयवार ।।

ङेर्हि ।।४।।३५७।। अपभ्रंशे सर्वादेरकारान्तात् परस्य ङेः सप्तम्येकवचनस्य हिम् इत्यादेशो भवति । [५]जहिं कप्पिज्जइ सरिण सरु छिज्जइ खग्गिण खग्गु । तहिं तेहइ भड घड निवहि कन्तु पयासइ मग्गु ।।१।।

[६]एक्कहिं अक्खिहिं सावणु अन्नहिं भद्दवउ ।
माहउ महिअल सत्थरि गण्डत्थले सरउ ।।
[७]अङ्गहिं गिम्ह सुहच्छी तिलवणि मग्गसिरु ।
तहे मुद्धहे मुहपङ्कइ आवासिउ सिसिरु ।।
[८]हिअडा फुट्टि तडत्ति करि कालक्खेवें काइं ।
देक्खउ हयविहि कहिं ठवइ पइं विणु दुक्खसयाइं ।।

---

१ यस्माद् भवान्नागत. ।। २ तस्माद् भवान्नागत. ।। ३ कस्माद् भवान्नागत ।। ४ यदि तव त्रुटितः स्नेहो मया सह नापि तिलतार ! तत्कस्मात् वक्रैर्लोचनैर्विलोक्यते शतवारम् ।। ५ यत्र कर्त्यते शरेण शरश्छिद्यते खड्गेन खड्ग । तत्र तादृशे (स्थाने) भटघटनिवहे कान्त प्रकाशयति मार्गम् ।। ६ एकस्मिन्नक्षिणि श्रावणोऽन्यस्मिन् भाद्रपद । माधवो महितलस्रस्तरे गण्डस्थले शरत् ।। ७ अङ्गेषु ग्रीष्म सुखासिका तिलवने मार्गशीर्ष ।। तस्या. मुग्धाया. मुखपङ्कजे आवासित शिशिर. ।। युग्मम् ।। ८ हे हृदय स्फुट त्रटडिति कृत्वा कालाक्षेपेन किम् ।। पश्यामि हतविधि कुत्र स्थापयति मया विना दुःखशतानि ।।

यत्तत्किभ्यो ङसो डासुर्न वा ॥४॥३५८॥ अपभ्रंशे यत्तत्किम् इत्येतेभ्योऽकारान्तेभ्य. परस्य ङसो डासु इत्यादेशो वा भवति । '[1]कन्तु महारउ हलि सहिए निच्छइं रूसइ जासु । अत्थिहिं सत्थिहिं हत्थिहिं वि ठाउ वि फेडइ तासु ॥१॥ [2]जीविउ कासु न वल्लहउ धणु पुणु कासु न इट्ठु । दोण्णि वि अवसर-निवडि-आइं तिणसम गणइ विसिठ्ठु ॥१॥

स्त्रियां डहे ॥४॥३५९॥ अपभ्रंशे स्त्रीलिङ्गे वर्तमानेभ्यो यत्तत्किभ्यः परस्य ङसो डहे इत्यादेशो वा भवति। [3]जहे केरउ, [4]तहे केरउ, [5]कहे केरउ ॥

यत्तदः स्यमोर्ध्रुं त्रं ॥४॥३६०॥ अपभ्रंशे यत्तदोः स्थाने स्यमोः परयोर्यथासंख्य ध्रु त्रं इत्यादेशौ वा भवतः । [6]प्रङ्गणि चिट्ठदि नाहु ध्रु त्रं रणि करदि न भ्रन्त्रि, पक्षे, तं [7]बोल्लिअइ जु निव्वहइ ॥

इदम इमुः क्लीबे ॥४॥३६१॥ अपभ्रशे नपुसकलिङ्गे वर्तमानस्य इदम स्यमो परयोः इमु इत्यादेशो भवति। [8]इमु कुलु, तुह तणउं, इमु कुलु देक्ख ॥

एतदः स्त्रीपुंक्लीबे एह एहो एहु ॥४॥३६२॥ अपभ्रंशे स्त्रियां पुंसि नपुसके वर्तमानस्य एतद स्थाने स्यमो पर-

---

१ कान्तो मदीयो हले ! सखि ! निश्चयेन रुष्यति यस्य । अर्थै शस्त्रै र्हस्तैरपि स्थानमपि स्फोटयति तस्य ॥ २ जीवितं कस्य न वल्लभ धन पुनः कस्य नेष्टम्, द्वेऽप्यवसरपतिते तृणसमे गणयति विशिष्ट. ॥ ३ यस्या सम्बन्धी ॥ ४ तस्या सम्बन्धी ॥ ५ कस्या सम्बन्धी ॥ ६ प्राङ्गणे तिष्ठति नाथो य स रणे करोति न भ्रान्ति ॥ ७ तत्कथ्यते यन्निर्वाह्यते ॥ ८ इद कुलं, तव सम्बन्धि, इद कुल पश्य ॥

ष्योर्यथासंख्यम् एह एहो एहु इत्यादेशा भवन्ति, एह कुमारी, एहो नरु, एहु मणोरह ठाणु ॥ एहउं वढ चिन्तन्ताह पच्छइ होइ विहाणु ॥१॥

एइर्जश्शसोः ॥४॥३६३॥ अपभ्रंशे एतदो जश्शसोः परयोः एइ इत्यादेशो भवति। एइ ति घोडा एह थलि, एइ पेच्छ ॥

अदस ओइ ॥४॥३६४॥ अपभ्रंशे अदसःस्थाने जश्शसोः परयोः ओइ इत्यादेशो भवति। [२]जइ पुच्छह घर वड्डाइं तो वड्डा घर ओइ ॥ विहलिअजणअब्भुद्धरणु कन्तु कुडीरइ जोइ ॥ १॥ अमूनि वर्तन्ते पृच्छ वा ॥

इदम आयः ॥४॥३६५॥ अपभ्रंशे इदम्शब्दस्य स्यादौ आय इत्यादेशो भवति। [३]आयइं लोअहो लोअणइं जाईं सरइं न भन्ति ॥ अप्पिए दिट्ठइ मकुलि अहिं पिए दिट्ठइ विहसन्ति ॥१॥ [४]सोसउ म सोसउ च्चिअ उअही वडवानलस्य किं तेण ॥ जं जलइ जले जलणो आएण वि किं न पज्जत्तं ॥२॥ [५]आयहो दड्ढकलेवरहो जं वाहिउ त सारु ॥ जइ उट्ठब्भइ तो कुहइ अह डज्झइ तो छारु ॥३॥

---

१ एषा कुमारी, एष नरः, एतन्मनोरथस्थानम् ॥ एतन्मूर्खाणां चिन्तयतां पश्चाद् भवति प्रभातम् ॥ २ यदि पृच्छथ बृहन्ति गृहाणि ततो बृहन्ति गृहाण्यमूनि ॥ विह्वलितजनाभ्युद्धरण कान्त कुटीरके पश्य ॥ ३ इमानि लोकस्य लोचनानि जातिं स्मरन्ति न भ्रान्ति ॥ अप्रिये दृष्टे मुकुलितन्ति प्रिये दृष्टे विकसन्ति ॥ ४ शुष्यतु मा शुष्यतु निश्चयेनोदधिर्वडवानलस्य किं तेन ॥ यज्ज्वलति जले ज्वलनोऽनेनापि किं न पर्याप्तम् ॥ ५ अस्य दग्धकलेवरस्य यद्वाहितं तत्सारम् ॥ यद्याच्छाद्यते तदा कुथ्यति अथ दह्यते तदा क्षारः ॥

सर्वस्य साहो वा ॥४॥३६६॥ अपभ्रंशे सर्वशब्दस्य साह इत्यादेशो वा भवति। [१]साहुवि लोउ तडप्फडइ वड्डत्तणहो तणेण ॥ वड्डप्पणु परिपाविअइ हत्थि मोक्कलडेण ॥ १ ॥ पक्षे सव्वु वि ॥

किमः काइं कवणौ वा ॥४॥३६७॥ अपभ्रंशे किमः स्थाने काइं कवण इत्यादेशौ वा भवतः ॥ [२]जइ न सु आवइ दूइ घरु काइं अहोमुहु तुज्झु ॥ वयणु जु खण्डउ तउ सहि एसो पिउ होइ न मज्झु ॥१॥ [३]काइं न दूरे देक्खइ फोडिन्ति जे हिअडउं अप्पणउं ताहं पराई कवण घण ॥ रक्खेज्जहु लोअहो अप्पणा बालहे जाया विसम थण ॥२॥ [४]सुपुरिस कङ्गुहे अणुहरहिं भणकज्जे कवणेण ॥ जिवँ जिवँ वड्डत्तणु लहहिं तिवँ तिवँ णवहिं सिरेण ॥३॥ पक्षे ॥ [५]जइ स सणेहि तो मुइअ अह जीवइ निन्नेह ॥ बिहिं वि पयारेंहि गइअ धण कि गज्जहि खल मेह ॥४॥

युष्मदः सौ तुहं ॥४॥३६८॥ अपभ्रंशे युष्मदः सौ परे

---

१ सर्वोऽपि लोक आकुलीभवति महत्त्वस्यार्थम् । महत्त्व परिप्राप्यते हस्तेन मुक्तेन ॥ २ यदि न स आगच्छति दूति ! गृह किं अधोमुख तव ॥ वचन यः खण्डयति तव सखि ! एष प्रियो भवति न मम ॥ ३ किं न दूरे पश्यति ॥ ४ सुपुरुषा कङ्गो (धान्यविशेष) रनुहरन्ति भण कार्येण केन ॥ यथा यथा वृद्धत्व लभन्ते तथा तथा नमन्ति शिरसा ॥ ५ यदि सा सस्नेहा तदा मृता अथ जीवति निःस्नेहा ॥ द्वाभ्या अपि प्रकाराभ्या गतिका प्रिया किं गर्जति खल मेघ ! ॥

तुहुं इत्यादेशो भवति । [१]भमरु मा रुणझुणि रण्डइ सा दिसि जोइ म रोइ । सा मालइ देसन्तरिअ जसु तुहु मरहि विओइ ॥१॥

जश्शसोस्तुम्हे तुम्हइं ॥४॥३६९॥ अपभ्रंशे युष्मदो जसि शसि च प्रत्येक तुम्हे तुम्हइ इत्यादेशौ भवत. । [२]तुम्हे तुम्हइं जाणह, तुम्हे तुम्हइ पेच्छइ, वचनभेदो यथासख्या निवृत्त्यर्थः ।

टाड्यमा पइं तइं ॥४॥३७०॥ अपभ्रंशे युष्मद. टा ङि अम् इत्येतै. सह पइं तइ इत्यादेशौ भवत. । टा, पइं [३]मुक्काहं वि वरतरु फिट्टइ पत्तत्तणं न पत्ताणं । तुहुं पुणु छाया जइ होज्ज कहवि ता तेहिं पत्तेहिं ॥१॥ [४]महु हिअउ तइ ताए तुहु सवि अन्ने वि नडिज्जइ । पिअ काइ करउ हउ काइ तुहु मच्छे मच्छु गिलिज्जइ ॥२॥ ङिना । [५]पइं मइ बेहिं वि रणगयहिं को जयसिरि तक्केइ ॥ केसहिं लेप्पिणु जमघरिणि भण सुहु को थक्केइ ॥३॥ एव तइ ॥ अमा ॥ [६]पइ मेल्लन्तिहे महु मरणु मइ मेल्लन्तहो तुज्झु ॥ सारस जसु जो वेग्गला सोवि कृदन्तहो सज्झु ॥४॥ एव तइ ॥

---

१ भ्रमर ! मा रुणझुणि (शब्दकुरु) अरण्ये ता दिशा विलोक्य मा रुदिहि । सा मालती देशान्तरिता यस्यास्त्व म्रियमे वियोगे ॥ २ यूय जानीत, युष्मान् पश्यतु ॥ ३ त्वया मुक्ताना वरतरो ! फिट्टइ (याति) पत्रत्व न पत्राणाम् । तव पुनश्छायायद्यभविष्यत् कयमपि तावत् तैः पत्रै ॥ ४ मम हृदय त्वया तया त्व साऽप्यन्येनापि नट्यते । प्रिय ! किं करोम्यऽह किं त्व मत्स्येन मत्स्यो गिल्यते ॥ ५ त्वयिमयि द्वयोरपि रणगतयो को जयश्रिय तर्कयति ॥ केशैर्गृहीत्वा यमगृहिणी भण सुख कस्तिष्ठति ॥ ६ त्वा मुञ्चन्त्या मम मरण मा मुञ्चतस्तव ॥ सारस ! यस्य यो दूरे सोऽपि कृतान्तस्य साध्यः ॥

जे गया पहिय पराया केवि । अवस न सुअहि सुअच्छिअहिं जिवँ अम्हइं तिवँ तेवि ॥२॥ अम्हे देक्खइ, अम्हइं देक्खइ, वचनभेदो यथासंख्या निवृत्त्यर्थः ॥

टाङ्यमा मइं ॥४॥३७७॥ अपभ्रंशे अस्मदः टा ङि अम् इत्येतैः सह मइं इत्यादेशो भवति । 'टा' [1]मइं जाणिउं पिअ विरहिअहं कवि धर होइ विआलि । णवर मिअङ्कु वि तिह तवइ जिह दिणयरु खयगालि ॥१॥ ङिना, पइं मइं बेहिंपि रणगयहिं, अमा, मइं मेल्लन्तहो तुज्झु ॥

अम्हेहिं भिसा ॥४॥३७८॥ अपभ्रंशे अस्मदो भिसा सह अम्हेहिं इत्यादेशो भवति । तुम्हेहिं अम्हेहिं ज किअउ ॥

महु मज्झु ङसिङस्भ्याम् ॥४॥३७९॥ अपभ्रंशे अस्मदो ङसिना ङसा च सह प्रत्येक महु मज्झु इत्यादेशौ भवतः । महु होन्तउ गदो मज्झु होन्तउ गदो, ङसा, [2]महु कन्तहो बे दोसडा हेल्लि म झंखहि आलु । देन्तहो हउं पर उव्वरिअ जुज्झन्तहो करवालु ॥१॥ जइ भग्गा पारक्कडा तो सहि मज्झु पिएण । अह भग्गा अम्हह तणा तो ते मारिअडेण ॥२ ।

अम्हहं भ्यसाम्भ्याम् ॥४॥३८०॥ अपभ्रंशे अस्मदो भ्यसा आमा च सह अम्हहं इत्यादेशो भवति । अम्हह होन्तउ

---

१ मया ज्ञात प्रिये ! विरहिताना कापि धरा भवति विकाले । नवर मृगाङ्कोऽपि तथा तपति यथा दिनकर क्षयकाले ॥ २ मम कान्तस्य द्वौ दोषौ हेल्ले मा जल्प स्त' अलीक । ददतोऽह पर उद्धरितो युध्दत. करवाल. ॥ ३ यदि भग्नाः परकीयास्ततो सखि ! मम प्रियेण । अथ भग्ना अस्माक ततस्तेन मारितेन ॥

आगदो, 'आमा, अह भग्गा अम्हहं तणा ॥

सुपा अम्हासु ॥४॥३८१॥ अपभ्रंशे अस्मदः सुपा सह अम्हासु इत्यादेशो भवति। अम्हासु ठिअं।

स्यादेराद्यत्रयस्य बहुत्वे हिं न वा ॥४॥३८२॥ स्यादीनामाद्यत्रयस्य सम्बन्धिनो बहुष्वर्थेषु वर्तमानस्य वचनस्य अपभ्रंशे हिं इत्यादेशो वा भवति। [1]मुहकबरिबन्धे तहे सोह धरहिं नं मल्लजुज्झु ससिराहु करहिं। [2]तहे कुरल सहहिं भमर उलतुलिअ नं तिमिरडिम्भ खेल्लन्ति मिलिअ ॥

मध्यत्रयस्याद्यस्य हिः ॥४॥३८३॥ त्यादीनां मध्यत्रयस्य यदाद्यं वचनं तस्यापभ्रंशे हि इत्यादेशो वा भवति। [3]बप्पिआ पिउ पिउ भणवि कित्तिउ रुअहि हयास। तुह जलि महु पुणु वल्लहइ बिहुंपि न पूरिअ आस ॥१॥ आत्मनेपदे [4]बप्पीहा कइं बोल्लिएण निग्घिण वारइ वार। सायरि भरिअइ विमलजलि लहहि न एक्कइ धार ॥२॥ सप्तम्याम् ॥ [5]आयहिं जम्महिं अन्नहिं वि गोरि सु दिज्जहि कन्तु। गय मत्ताहं चत्तङ्कुसहं जो अब्भिडइ हसन्तु ॥१॥ पक्षे रुअसि इत्यादि ॥

---

१ मुखकवरीबन्धौ तस्या शोभां धरत इव (ननुपेक्षायाम्) मल्लयुद्धं शशिराहू कुरुतः ॥ २ तस्याः केशाः शोभन्ते भ्रमरकुलतुलिता, इव तिमिरडिम्भा क्रीडन्ति मिलित्वा ॥ ३ हे चातक ! पियु पियु (पक्षे प्रिय प्रिय) इति भणित्वा कियद् रोदिषि हताश ! ॥ तव जले मम पुनर्वल्लभे द्वयोरपि न पूरिताऽऽशा ॥ ४ चातक ! किं कथितेन निर्लज्ज ! वारं वारम् । सागरे भृते विमलजले लभसे नैकां धाराम् ॥ ५ अस्मिञ्जन्मन्यन्यस्मिन्नपि गोरि! स दीयतां कान्तः। गजानां मत्तानां त्यक्ताङ्कुशानां योऽभ्येति हसन् ॥

बहुत्वे हुः ॥४॥३८४॥ त्यादीनां मध्यमत्रयस्य सम्बन्धि बहुष्वर्थेषु वर्त्तमानं यद्वचनं तस्यापभ्रंशे हु इत्यादेशो वा भवति। [1]वलि अब्भत्थणि महुमहणु लहुई हूआ सोइ। जइ इच्छहु वड्डुत्तणउं देहु म मग्गहु कोइ ॥ पक्षे इच्छदे इत्यादि ॥

